Bsp 3

2 Copy
IA 47

शब्देन्दुसुधा

लेखकः—रामलोचनशास्त्री,

ओं नमः शिवाय

शब्देन्दुसुधा

बरेली ईस्टर्न इङ्गलिश् मेमोरियल हाई स्कूले
संस्कृतप्रधानाध्यापकेन वैयाकरणकेसरीत्याद्यनेकलब्धपदवीकेन
द्विवेदिना—

पं० श्रीरामलोचनशास्त्रिणा

सङ्कलिता ।

पं० श्रीभीमसेनशास्त्रिपुत्रेण व्याकरणाचार्येण

पं० चन्द्रभूषणशास्त्रिणा

संशोध्य

विष्णुविद्यालयाधीशेन

महन्त—श्रीमहाबीरदासेन

काश्यां "ज्योतिष प्रकाश नाम्नि" यन्त्रालये मुद्रयित्वा
प्रकाशिता च ।

अस्याः पुनर्मुद्रणाद्यधिकारः सङ्कलयित्रा स्वायत्तीकृतः ।

प्राप्तिस्थानम्—

मास्टर खेलाड़ीलाल एण्ड सन्स,
संस्कृत बुकडिपो,
कचौड़ीगली, काशी ।

द्वितीयसंस्करणे सं १०००] संवत् २००२ [मूल्यम् १॥)

MEHARCHAND LACHHMANDAS SANSKRIT BOOK-DEPOT JAIN STREET LAHORE.

अभ्यर्थना ।

अयि गीर्वाणगीर्ज्ञाः पाणिनीयाः समेषां सदृक्षमिदं प्रचुरतरं वरीवर्त्ति यन्महामहोपाध्यायश्रीनागेशभट्टमहोदयानां ग्रन्थकाठिन्यमस्तीति तद्रचितेषु च ग्रन्थेषु शब्देन्दुशेखरो नाम सर्वाङ्गपूर्णतया धीधनसमाजेऽतिश्लाघ्यः। यस्य च विचारसमये श्रीगुरुवर्यादीनामपि सशिरःकम्पं सुसंशावचनं समुदचरत्। यस्य च संलापनाय पदे पदे परिष्कारपद्धतिरनेकविधा क्षणे क्षणेऽभिनवा तैरेव रचिता यावज्जीवमध्यापिता च तथापि तेषां तदानींतनच्छात्रविचक्षणानां च सन्तोषो न जातः। अद्यत्वे च अनेकचिन्ताचिन्तिताः परीक्षासाफल्योत्कण्ठिताः सदालस्यभराः (परिष्कारो बहुकालयापकः शुष्कतृण इव निस्सारः) तत्र कालयापनं निरर्थकमिति मन्यमानाः परीक्ष्यवर्गाः केवलं परीक्षाफलसाधकमल्पकालेनायाससाध्यं वस्तु सहर्षमाददते। अतस्तेषामितरेषाञ्च मनोऽनुकूलां श्रीमन्महामहोपाध्याय "तात्याशास्त्री" इति प्रसिद्धानां भूतपूर्व-काशीस्थराजकीयप्रधानपाठशालाप्रधानाध्यापकानां श्रीमतां "रामकृष्णशास्त्रि" महोदयानां सच्छिष्येण सम्प्रति बरेलीनगरे ई० आई० एम्० हाईस्कूले संस्कृतश्रेणिप्रधानाध्यापकेन विद्वन्मण्डललब्धप्रतिष्ठेन व्याख्यानवाचस्पति, तर्कमहोदधि, वेदालङ्कार, वैयाकरणकेसरीत्यादिलब्धानेकपदवीकेन राजाधिराजसम्मानितेन गौडवंशावतंसेन व्याकरणाचार्येण "श्रीमद्रामलोचनशास्त्रिणा" संक्षिप्तरूपां सकलार्थसंपादिकां प्राच्यनव्यमतज्ञापिकां निखिलप्रश्नसमाधानभूतां "शब्देन्दुसुधाम्" विरच्य सकलजनदृग्गोचराय मुद्रापयित्वा प्रकाशतामनाययत्। मन्ये च एतस्याः सदभ्यासवशेन नियतं सच्छात्राः स्वपरिश्रमसाफल्यं प्राप्य ग्रन्थकर्त्तुः परिश्रमफलं यशःपताकाश्च सम्पादयिष्यन्ति, अस्या गुणस्तुतिञ्च लोके ख्यापयिष्यन्तीति च। किमधिकेन प्रत्यक्षभूते लपनेनेति शिवम्।

प्रार्थी—

चन्द्रभूषण शर्म्मा,
ऋषिकुल संस्कृत पाठशाला,
भूड़, बरेली।

॥ ॐ नमः शिवाय ॥

॥ शब्देन्दुसुधा ॥

लास्यक्षणक्षणविलोकनदत्तचित्त-
देवप्रमोदकृतकौतुकभूरिलीलः ।
हेरम्बशैलतनयाननहृत्कटाक्षः
श्रीशङ्करो नटवरोऽवतु मां समन्तात् ॥ १ ॥
यः सर्वतन्त्रेषु निजां स्वतन्त्रतां
भूत्यादिसूक्त्या विदुषां समाजे ।
विस्तार्य शैवीं सुतनुं दधार
तं रामकृष्णं गुरुदेवमीडे ॥ २ ॥
गुरुदेवप्रसादेन या सुधा मिलिता पुरा ।
रचिता सैव संक्षिप्य रामलोचनशास्त्रिणा ॥ ३ ॥

अइउणादिव्याख्याने नागेशेन विलसितं विशद्य लिख ॥ १ ॥

ननु "संज्ञा च परिभाषा च विधिर्नियम एव च । प्रतिषेधोऽधिकारश्च षड्विधं सूत्रलक्षणम्" इत्युक्त्या कस्मिन्नेषामन्तर्भाव इतिचेच्छृणु-क्रमबोधकानामप्येषामादिरन्त्येन सहेतेत्यादिना आदिरकारादिरन्त्येनेतासहशेन णकारादिना सहोच्चार्यमाण आद्यन्ताक्षिप्तानां संज्ञेत्येवं रूपयैकवाक्यतया वृत्तिपरिच्छेदकत्वेन संज्ञासूत्रत्वात्तदन्तर्भावः ।

एवमेव स्वौजसित्यादीनां संज्ञासूत्रत्वं विधिसूत्रत्वं चेति ग्रन्थाशयः। केचित्तु—उभयसूत्रत्वे षड्विधं सूत्रलक्षणमिति विधापदार्थानुपपत्तिः। तत्त्वञ्च—स्वसमभिव्याहृतपदार्थतावच्छेदकव्याप्यमिथोविरुद्धं यावद्धर्मबोधनत्वमिति संज्ञासूत्रत्वविधिसूत्रत्वयोरेकत्र सत्त्वेन क्रमबोधकत्वैकवाक्यत्वयोरेकत्र सत्त्वेन च विधापदार्थघटकविरोधासम्भवादित्याहुः। एषु च संहिताया अविवक्षणान्न सन्धिकार्यम्। प्रत्येकं वर्णेभ्यो विभक्तिस्तु नाशङ्क्या, सौत्रत्वादभेदानुकरणात्प्रातिपदिकत्वाभावात्। कैयटे तु—अजादिसंज्ञाग्रहकाले आद्गुण इत्यादेरनिष्पत्त्या सन्ध्यप्रवृत्तावविकृतरूपाकारादिषु आदिरन्त्येनेति गृहीताजादिपदशक्तिः पश्चादच्प्रत्याहारे ज्ञाते उपेन्द्र इवात्रापि तत्प्रवृत्तौ विरुध्येतेति उपजीव्यविरोधान्न सन्धिरित्युक्तं तन्न, सन्धावप्यर्थान्तरे शक्त्यग्रहेण शक्तिविरोधाभावात्। सन्धौ सन्देहस्तु न, व्याख्यानतो निर्णयसम्भवात्। वर्णात्कार इति सूत्रे रोगाख्यायामिति सूत्राद्बहुलग्रहणानुवृत्त्या नात्र तत्प्रवृत्तिः। एतानि सूत्राणि श्रुतिरेव, श्रुतिमूलकत्वादस्यैव प्रधानं वेदाङ्गत्वम्—"येनाक्षरसमाम्नायमधिगम्य महेश्वरात्। सोऽयमक्षरसमाम्नाय इत्यादौ श्रुतिवाचकाम्नाय-समाम्नायशब्दयोः प्रयोगेणैतेषां श्रुतित्वमुपगम्यते। एवं ऋक्तन्त्रव्याकरणे शाकटायनोऽपि, इदमक्षरं छन्दोवर्णशः समनुक्रान्तमित्याद्युक्त्वा तं खल्विममक्षरसमाम्नायमित्याचक्षते, न भुक्त्वा, न नक्तं ब्रूयादित्याद्याह। एवं व्याकरणमुपक्रम्य वेदानां वेद इति छन्दोगश्रुतिरप्येतत्परैव। भाष्येऽप्येतद्वेदैकदेशज्ञाने सर्ववेदपारायणजं फलमित्युक्तम्। अमङणनमित्यत्र भाष्ये मकारप्रत्याख्यानन्तु नास्य दृष्टफलकत्वं किन्तु अदृष्टफलकत्वमेवेत्यभिप्रायकमिति न तद्विरोधः। अनुबन्धकरणार्थश्च वर्णानामुपदेश इति भाष्येण "अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम्। धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये" इत्युक्त्वा च अनुबन्धानां महेश्वरकर्तृत्वं चतुर्दशसूत्राणां ब्रह्मोपदेशरूपवेदवाक्यवदनादित्वं च इत्यादिविलासो द्रष्टव्य इति दिक्॥ १॥

रप्रत्याहारे विवदमानमतोपपादनपुरःसरं नागेशसिद्धान्तमविकलं वर्णय॥ २॥

लपरत्वं वक्ष्यामीति भाष्याल्लण्सूत्रेऽकारस्येत्संज्ञकत्वमिति कैयटोक्त्या रप्रत्याहारसिद्धौ तवल्कार इत्यत्र लपरत्वसिद्धिरिति प्राञ्चः। नागेशस्तु—अस्यानुनासिकत्वेनेत्संज्ञकत्वे अतोल्रान्तस्येति सूत्रे रप्रत्याहारेणैव सिद्धे लकारोच्चारणवैयर्थ्यापत्तिः। न चानेनैव रप्रत्याहारस्य क्वाचित्कत्वबोधनाद्रदाभ्यामित्यत्र न दोष इति वाच्यम्, यण्घटितसूत्रेषु अर्धमात्रालाघवानुरोधेन यप्रत्याहारेणैव निर्वाहे सिद्धे णकारोच्चारणस्य वैयर्थ्यापत्तेः। न च इको योऽचीत्यादिकरणे मात्रागौरवान्न तथा कृतमिति वाच्यम्, अनुबन्धानां प्रत्याहारे ग्रहणाभावाय 'आचारादप्रधानत्वाल्लोपश्च बलवत्तर' इति भाष्योक्ततृतीयहेतोरव्यापकत्वापत्तेः। तथाहि—अनुबन्धाः प्रत्याहारजन्यशाब्दबोधीयविषयताशून्याः तस्य लोप इति शास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वादिति पक्षतावच्छेदकावच्छेदेनानुमितौ हेतोर्व्यापकत्वमपेक्षते तन्न सिद्ध्येत्। तव लोपस्य बलवत्त्वेऽपि, हल्प्रत्याहारसिद्धेः प्रागच्पदार्थनिष्पत्त्यभावेनोपदेशेऽजित्यस्य वाक्यार्थबोधाभावेन लणित्यकारस्येत्संज्ञालोपयोरभावेन, इत्संज्ञायोग्यत्वरूपानुबन्धत्वस्य तस्मिन्सत्त्वेन इत्संज्ञकत्वरूपहेतोरसत्त्वेन चाव्यापकत्वं सुवचमिति भागासिद्धिः। न च—अच्प्रत्याहारबोधकसूत्रघटकानुबन्धस्यैव पक्षत्वेन न भागासिद्धिरिति वाच्यम्, प्रत्याहारेषु जातिग्रहणपक्षस्यैव भाष्यकृता सिद्धान्तितत्वेन हल् प्रत्याहारे लणित्यकारप्रवेशे मां आन्त्रायस्वेत्यर्थे मा माँस्त्रायस्वेत्यत्रानुनासिकपक्षेऽनुस्वारापत्तेः; सोऽस्तीत्यादौ सुलोपापत्तेश्च। तस्मादस्यानुनासिकत्वमप्रामाणिकमेव, उरण् रपर इत्यत्र लग्रहणं कर्त्तव्यमेवेत्यादिसिद्धान्तमवर्णयदिति दिक्॥ २॥

अन्योन्याश्रये का वाचोयुक्तिर्नागेशस्येति सुस्पष्टं भणत॥३॥

ननु—न विभक्तावित्यादेः सार्थक्याय उपदेशेऽन्त्यं हलिदिति हलन्त्यमित्यस्य वाक्यार्थबोध आवश्यकः। तत्र च हल्पदार्थज्ञानमित्यपदार्थज्ञानाधीनमित्पदार्थज्ञानं हल्पदार्थज्ञानाधीनम्, वाक्यार्थबोधे पदार्थज्ञानस्य कारणत्वादिति हलन्त्यमादिरन्त्येनेत्यनयोः परस्परा-

पेक्षत्वेनान्योन्याश्रय इति चेन्न; हलन्त्यमित्यस्यावृत्त्या बोद्धुर्हल्सूत्रान्त्यं हलूरूपान्त्यं चेदिति बोधेन तदनवकाशात्, अन्त्ये च राहोः शिर इतिवत्षष्ठी। उच्चारयितुस्तु—एकशेषनिर्देशात् समीहितार्थलाभः, अत एव भाष्ये "एकशेषनिर्देशाद्वा सिद्धम्" इत्युक्तम्। न च—हयवरेत्यादेरावृत्त्या शषसरित्यन्तं समुदायमुद्दिश्य हलित्यनेन हल्संज्ञाविधानान्नोक्तदोष इति वाच्यम्, दशसूत्रावृत्तौ गौरवात्। न च उपदेशे इदन्त्यम्, अच्, अनुनासिक इति सूत्रत्रयमस्तु, अजित्यन्त्यार्थम्, तृतीये चाजित्यनुवृत्तिसामर्थ्यादच्चेदिद्भवति तर्ह्यनुनासिक एवेति नियमाद्भूप्रभृतौ न दोषः। योगविभागसामर्थ्याच्च अनन्तरस्येति न्यायं बाधित्वा व्यवहितस्यापि तेन नियमः। अनुनासिक इद्भवति चेदजेवेति विपरीतनियमस्तु न, मिदचोऽन्त्यादितिज्ञापकात्; एवञ्च हल्ग्रहणं व्यर्थमन्योन्याश्रयश्च नेति वाच्यम्, योगविभागनियमज्ञापकाश्रयणेऽतिगौरवात्। न च सह आसमन्तादेति गच्छतीति सहेता, मध्यमो वर्ण इत्यादिरन्त्येन सहेतेत्यस्यार्थे इत्पदार्थस्यानिवेशान्नान्योऽन्याश्रय इति वाच्यम्, योगमर्यादया सहेतेत्यत उक्तार्थालाभात्, भाष्यासम्मतत्वाच्च। नन्वेवमपि न विभक्तौ तुस्मा इति विभक्तिपदबोध्यसुप्तिङ्बोधो हलन्त्यमिति वाक्यार्थबोधाधीनः, तद्बोधश्च न विक्ताविति निषेधवाक्यार्थबोधाधीन इत्यन्योन्याश्रयस्तदवस्थ एवेति चेन्न; हलन्त्यमित्यस्य वाक्यार्थबोधे न विभक्ताविति वाक्यार्थस्याकारणत्वात्, प्रत्युत निषेधवाक्यार्थं प्रति प्रतियोगिज्ञानसम्पादनद्वारा हलन्त्यमिति वाक्यार्थबोधस्यैव कारणत्वात्, प्रकल्प्य चापवादविषयमिति न्यायेन न विभक्ताविति शास्त्रे तुस्मपदार्थज्ञानमात्रेण पादीनामेतद्विषयत्वाभावबुद्ध्या। तेषु हलन्त्यसूत्रप्रवृत्तौ सुप्तिङ्रूपविभक्तिपदार्थज्ञानं सुलभमिति दिक्॥ ३॥

आदिरन्त्येनेति सूत्रे प्राच्यनव्ययोर्विशेषमुपपाद्य पदानां सार्थक्यं दर्शयत॥ ४॥

अवयवत्वेन बोधकाभ्यामाद्यन्तपदाभ्यां समुदाय आक्षिप्तः संज्ञी। तस्य च लक्ष्ये प्रयोगाभावात्तदवयवेष्ववतरन्ती संज्ञा मध्यगेषु विश्रा-

म्यति, न त्वाद्यन्तयोः; तयोर्हि संज्ञास्वरूपान्तर्भावेण पारार्थ्यनिर्णयात्। ततश्च स्वं रूपमित्यतः स्वमित्यनुवृत्त्या आदेरेव ग्रहणन्नान्त्यस्य, अन्त्येनेत्यप्रधानतृतीयानिर्देशात्, सर्वनाम्नाञ्च प्रधानपरामर्शित्वादिति प्राञ्चः। नवीनास्तु—आद्यन्तपदाभ्यां स्वघटितः समुदाय आक्षिप्यते, तस्य लक्ष्ये प्रयोगाभावात्प्रत्येकं संज्ञित्वम्, अन्त्यस्य तु न तत्कार्यम्, तस्येत्संज्ञालोपाभ्यामपहारात्, एतत्फलितमेव भाष्ये मूले च स्वस्य च रूपस्येति, स्वमित्यनुवृत्तौ फलाभाव इत्याहुः, अत्रत्यविस्तरस्तु शब्दरत्ने द्रष्टव्यः। अत्रान्त्यशब्देन पूर्वेषामाक्षेपादिगादिप्रत्याहारेऽकारादिग्रहणं माभूदत आदिरित्युक्तम्। एवमादिशब्देन परेषामाक्षेपादिणादिप्रत्याहारेषु आदीनां ग्रहणं माभूदत अन्त्येनेत्युक्तम्। "परस्मिन्सति यस्मात्पूर्वो नास्ति स आदिः। पूर्वस्मिन्सति यस्मात्परो नास्ति सोऽन्त्यः" इति भाष्योक्त्या अकारादिग्रहणे इकारणकारादीनामाद्यन्तत्वस्यैवानापत्तेः। अमङणनमित्येतद्घटकणकारादिभिः प्रत्याहारो माभूदत इतेत्युक्तम्। न चान्त्यस्येत्संज्ञालोपाभ्यामपहारादिदमसंगतमिति वाच्यम्, सूत्रेष्वित्संज्ञायामपि इगादिशब्देषु तदभावात्। इतान्त्येनेत्यस्य इदन्त्यसदृशेनेत्यर्थान्न दोषः। सहग्रहणात्समुदाय एव संज्ञेति समुदायादेव इक इत्यादौ विभक्तिर्नादिमात्रादिति दिक्॥ ४॥

अनुबन्धविनिर्मुक्तपदार्थोपस्थितिरिति सिद्धान्तं युक्तिप्रमाणाभ्यामुपपद्य मनिनाद्यनकारस्येत्संज्ञावारिकायुक्तिः प्रदर्श्यताम्॥५॥

यद्यपि अइउणित्यादौ णादीनां हल्प्रत्याहारसिद्ध्युत्तरमित्संज्ञासिद्धये हलन्त्यमित्यस्य उपदेशे विद्यमानमन्त्यं हलिदित्यर्थस्यावश्यकत्वेऽपि चुटू इत्यादेस्तथाभावेन तैरन्तङ्गत्वादुच्चारणेनाभिव्यक्तस्य सूत्रेष्वेवेत्संज्ञा, अतएवोपदेशोत्तरकालेत्संज्ञेति भाष्ये उक्तम्—अतः प्रयोगेऽनुबन्धविनिर्मुक्तपदार्थस्यैवोपस्थितिरिति सिद्धान्तः। अनुबन्धसहिताद्धुडित्यादौ विभक्तिस्तु तेनैवानुबन्धविनिर्मुक्तोपस्थितिरिति तस्यैवार्थवत्त्वात्सिद्धा। वैयाकरण इत्यादौ चित इति स्वरस्तु नाशङ्क्यः तस्येच्चकारसदृशत्वेऽपि तत्त्वाभावात्, एवं विभक्तिसंज्ञा प्रत्ययसंज्ञा च सूत्रान्तर्गतानामेवेति तत्रैव न विभक्तावित्यादेः प्रवृत्तिः। गुस्निज्-

किदित्यादिविधिसूत्राणां नकारेत्संज्ञकः सो भवतीत्यादिरर्थः। सन्यत इत्यादेस्तु नकारेत्संज्ञके सशब्दे परे इत्यादिरर्थ इति भाष्यादिसिद्धान्त इति दिक् ॥ १ ॥

ननु मनिनाद्यनकारोऽपि मनिनि समुदायस्यान्त्य इति तस्येत्संज्ञा कुतो नेति चेन्न, अन्त्यपदोपदेशपदाभ्यां प्रत्यासत्त्या अज्ञातस्वस्वरूपज्ञापकोच्चारणविषयसमुदायान्त्यस्यैव ग्रहणेनादोषात्, समुदायोपदेश एव मुनितात्पर्यमित्यवयवानां नान्तरीयकतया अज्ञातस्वस्वरूपज्ञापकत्वाभावात्। अतएव मकारेत्संज्ञावारणार्थं थमोरुकारश्चरितार्थ इतिसंक्षेपः ॥ ५ ॥

प्राच्यनव्ययोरुपदेशपदव्युत्पत्तौ प्रमाणयुक्तीः प्रदर्श्य तत्रत्य नागेशोक्तसन्दर्भाशयं विशद्य लिख ॥ ६ ॥

इत्संज्ञाविधावुच्चारणवचनउपदिशिर्गृह्यते इति येषां स्वरूपज्ञापनायापूर्वमुच्चारणन्तेषामेवोपदेशव्यवहार इति च कैयटोक्त्या उच्चार्यवर्णानाह उपदिष्टा इमे वर्णा इति प्रत्यक्षमाख्यानमुपदेश इति च भाष्योक्त्या च उपदेश इति भावसाधनम्। उपस्याद्यर्थत्वाद्दिशेरुच्चारणक्रियत्वादाद्योच्चारणमिति तदर्थः। आद्यत्वञ्च अज्ञातस्वस्वरूपज्ञापकत्वम्, उच्चारणञ्च प्रत्यासत्त्या एतच्छास्त्रप्रवर्त्तकाचार्याणामेव। करणे ल्युटा बाधेन घञो दौर्लभ्याद्भाष्योक्तकरणसाधनं प्रौढिवादमात्रमित्यादिः प्राचां पन्थाः ॥ नव्यास्तु—उपदेश इति भाष्यादिपर्यालोचनया करणसाधनमेव। तथाहि भाष्ये—उपदेश इति किमर्थम्, अभ्रआंअप इत्युक्त्वा कः पुनरुद्देशोपदेशयोर्विशेष इत्युक्तम्, तस्यायं भावः; यदि प्रत्यक्षमाख्यानमुपदेशो गुणैः प्रापणमुद्देश इत्युच्यते चेत्तर्हि लटः सद्वा निष्ठेति विहितानां राजसूयेत्यादिनिपातानुमितानां चावयवस्येत्संज्ञानापत्तिः अतोऽत्र सूत्रे उपदेशशब्देनोद्देशस्यापि ग्रहणं वक्तव्यम्। एवञ्च अभ्रआँअप इत्यत्रापि प्राप्नोतीति तेषां संग्रहोऽस्य व्यावृत्तिर्भवति येन स विशेषः क इति एतत्परिहाराय वार्तिककृता, उपदेशनेऽजनुनासिक इति वक्तव्यं, किं पुनरुपदेशनं? शास्त्रमित्युक्तम्। तत्र शास्त्रपदेन प्रयोगशासनकरणभूता धातुप्रातिपदिकप्रत्ययनिपातागमादेशा उच्यन्ते।

अत्र चादेशपदेन स्ववृत्त्यानुपूर्व्यवच्छिन्नश्रावणप्रत्यक्षविषयतावच्छेदकधर्मवत एव ग्रहणान्न दोषः। तस्य च वार्त्तिकस्य बाहुलकात्करणे घञा प्रत्याख्यानं भाष्ये कृतम्। यदि च बाहुलकं त्वगतिकगतिरित्युच्यते चेत्तर्हि हलन्त्यसूत्रे भावघञन्तोपदेशपदानुवृत्तौ भवतष्टक्छसावित्यादि विहितेष्विक्त्वानापत्तेः, परस्य सत्त्वेन कादेरन्त्यत्वाभावात्। नचोपदेशे प्रत्ययत्वादिविशिष्टान्त्यमित्यर्थ इति नोक्तदोष इति वाच्यम्, अन्त्यपदसामर्थ्येनैवोक्तार्थलाभे उपदेश इत्यस्य वैयर्थ्यात्; तस्माद्धलन्त्यमित्यत्रोपदेश इति नैवानुवर्तते। अतएवोपदेशग्रहणस्य अनुबन्धा अनेकान्ता इत्यसिद्धान्तपक्षे स्वसमीपेऽनुबन्धे स्वनिरूपतावयवत्वमारोप्य अभ्रआँअदित इति प्रयोजनं भाष्ये दत्तन्तूत्तरार्थमित्युक्तम्। न च करणसाधनोपदेशपदानुवृत्त्या सिद्धे हलन्त्यमिति सूत्रे व्यवसितान्त्यमिति वक्तव्यमिति वार्तिकानुत्थितिरिति वाच्यम्, समुदायद्वाराऽवयवस्याप्युपदेशकरणत्वेन तदन्त्यस्यापि लोपापत्तिरित्याशयाद्। भाष्ये तु—अन्त्यग्रहणसामर्थ्येन तत्प्रत्याख्यातम्। किञ्चात्र भावसाधनोपदेशशब्दानुवृत्तौ उदश्विदादिप्रातिपदिकान्त्यलोपवारणाय प्रातिपदिकानां प्रतिषेधो वाच्योऽकृत्तद्धितान्तानामिति वार्तिकस्य फलाभावान्नेत्संज्ञेति तत्प्रत्याख्यानपरकभाष्यस्य चासङ्गत्यापत्तिः, उद्देशश्च प्रातिपदिकानां नोपदेश इति भाष्योक्तेः। अग्रहणप्रातिपदिकानामुपदेशः कर्तव्य इति भाष्ये उपदेशशब्दो ग्रहणं कर्तव्यमित्यर्थकः, एतद्भाष्यैकवाक्यत्वादिति न तद्विरोधः। न च हलन्त्यमित्यत्रोपदेशपदाननुवृत्तौ उपदेश इत्युच्यमानेत्संज्ञा न प्रकल्पेतेति तस्मिन्निति सूत्रस्थभाष्यविरोध इति वाच्यम्, तद्भाष्यस्य सन्दर्भपर्यालोचनया एकदेश्युक्तित्वेनासाधकत्वात्। पूर्वोक्तलक्ष्यासिद्ध्या कैयटाद्युक्तिश्चिन्त्यैवेत्यादिरीतिर्मूले स्पष्टेति दिक्॥ १॥

न चानुबन्धविनिर्मुक्तस्यैव लक्ष्ये सम्भवेन अकृत्तद्धितान्तानामिति व्यर्थं एवेति वाच्यम्, उपसंजनिष्यमाणन्यायेन अपवादभूतप्रातिपदिकानां विषयं त्यक्त्वा इत्संज्ञाशास्त्रप्रवृत्तौ तदनुबन्धानामित्संज्ञानापत्त्या दोषापत्तावुक्तस्य सार्थक्यात्। न चोदश्विदादाविव नदट्देवडित्यादौ

प्रातिपदिकान्त्यप्रयुक्तेत्संज्ञानिषेधापत्तिरिति वाच्यम्, स्ववृत्त्यानुपूर्व्यवच्छिन्नबोधकप्रातिपदिकान्त्यभिन्नं भवतीत्यर्थेनादोषात्। अत्रत्यविशदविचारस्तु बहुकालसाध्य इति दिक् ॥ ६ ॥

उकालोऽच्ह्रस्व इति वाक्येऽण्त्वात्सवर्णग्रहणे दोषपरिहारायुपवर्ण्यं तितउच्छत्रमित्यत्र दीर्घादिति तुग्वारणीयः ॥ ७ ॥

ननु—उकालोऽच्ह्रस्व इति वाक्येऽण्त्वात्सवर्णग्रहणे द्वित्रिमात्रयोरपि ह्रस्वसंज्ञायां प्रदाय, प्रलूयेत्यत्र ह्रस्वस्येति तुक् कथन्नेति चेन्न, उअजित्येव, अज्ग्रहणसामर्थ्यात्सदृशोऽजित्यर्थे सादृश्यस्य व्याख्यानात्कालकृतस्यैव ग्रहणमिति सिद्धे सूत्रस्थकालग्रहणमुच्चारितसम्बन्धिकालसदृशकालकस्यैव संज्ञा, न तु तेन गृहीतसम्बन्धिकालसदृशकालकस्येति ज्ञापयतीत्यदोषात्। अतएव भाष्ये यावत्तपरकरणान्तावदत्र कालग्रहणमित्युक्तम् ॥ १ ॥

ननु—अजिति वर्णग्रहणे जातिग्रहणस्य दुर्वारतया तितउच्छत्रमित्यत्र दीर्घात्पदान्ताद्धेति वैकल्पिकस्तुक् कथन्नेति चेन्न, वर्णग्रहणे जातिग्रहणमित्यस्य ज्ञापकसिद्धत्वेनासार्वत्रिकत्वेनादोषात्, ह्रस्वत्वप्रयुक्ततुकोऽन्तरङ्गत्वाच्चेति दिक् ॥ ७ ॥

तुल्यास्येतिसूत्रे सफलं सप्रमाणं च यावदास्यभवतुल्यत्वं विविच्य कङ्योः सावर्ण्यं प्रसाध्यताम् ॥ ८ ॥

ननु—यज्जनकस्थानप्रयत्नैतद्द्वयं यदीयेन स्थानप्रयत्नद्वयेन तुल्यं तत्तत्सवर्णमितिस्वारसिकार्थे एकारैकारयोः सावर्ण्यन्दुर्वारमिति चेन्न; यजुष्येकेषामितिनिर्देशेन यावदास्यभवतुल्यत्वविवक्षणेनादोषात्। अतएवैचोः सावर्ण्यमाशङ्क्य नैतौ तुल्यस्थानाविति भाष्ये समाहितम्। तेन वलयोर्न्न सावर्ण्यम्, अतएव तद्धानासावित्यादौ तोर्लीति न। न च—यावदास्यभवतुल्यत्वविवक्षणे प्रयत्नस्याप्यास्यभवत्वेन तद्ग्रहणं व्यर्थमिति वाच्यम्, आस्यभवानां कण्ठादीनामेव ग्रहणमिति बोधनाय तत्सार्थक्यात्। अन्यथा ह्रस्वदीर्घयोर्जनकानां वायुसंयोगानामतुल्यतया तयोः सावर्ण्यानापत्तेः। एवञ्च स्वविशिष्टं वर्णं स्वसवर्णमित्यर्थः फलितः। वै० स्वजनकस्थानप्रयत्नजन्यत्व-स्वाजनकस्थान-

प्रयत्नाजन्यत्व–स्ववृत्तिद्वित्वावस्त्वैतत्त्रितयसम्बधेन । विस्तरस्तु ग्रन्थान्तरेऽवसेयः ॥१॥ कड्योस्तु सावर्ण्यं भवत्येव; नासिका आस्यवाह्या इति मते आस्यभवपदेन तस्याग्रहणात् । किञ्च आस्ये तुल्यदेशप्रयत्नमिति वार्तिके किमास्योपादाने प्रयोजनमिति प्रश्ने प्रयत्नविशेषणमास्योपादानमित्युक्त्वा तद्व्यावर्त्यत्वेन वाह्यप्रयत्नान्प्रदर्श्य यथातृतीयास्तस्थापञ्चमा आनुनासिक्यमेषामधिको गुण इति भाष्येण तस्य ग्राह्यत्वोक्त्याऽत्र सूत्रे आस्यशब्देन नासिकायाः प्रयत्नशब्देन तत्रत्यप्रयत्नस्य चाग्रहणबोधनादिति दिक् ॥८॥

पूर्वत्रासिद्धमित्यस्याधिकारत्वे फलं सम्यगुपपाद्य कार्यासिद्धत्वे दोषमुद्भाव्य तत्रत्यविशेष उपपादनीयः ॥९॥

अयमधिकारस्तेनानेन त्रिपाद्यामप्यसिद्धत्वं सिद्ध्यति, अतएव इच्युत्वं धुटि सिद्धं वाच्यमित्यादिचरितार्थम्, तेन गोधुङ्मानित्यत्रापवादत्वाद् धत्वे कृते जश्त्वानुनासिकयोरसिद्धत्वात्पूर्वं भष्भावे, ततो जश्त्वानुनासिकयोः कृतयोरुक्तरूपसिद्धिः । अन्यथा तयोः कृतयोर्झपन्तत्वाभावेन भष्भावानापत्तेः । नचापवादत्वाज्जश्त्वं बाधित्वा अन्तरङ्गत्वाच्चानुनासिकं बाधित्वा भष्भावः स्यादेवेति वाच्यम् । त्रिपाद्यामन्तरङ्गपरिभाषाया अप्रवृत्तेः । प्राचीनमते तत्र प्रवृत्तावपि प्रतिपदोक्तत्वाज्झय इति वस्वापत्तेः । पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति भाष्येण विप्रतिषेधे परमित्यस्य यथोद्देशत्वबोधनेन त्रिपाद्यां तदप्रवृत्तिः । यत्रास्याधिकारस्तस्यानेनासिद्धत्वं बोध्यते । तद्यथा—होढ इत्यादावस्योपस्थितौ वाक्यभेदेन हस्य ढो भवति । इदञ्च शास्त्रं पूर्वत्रासिद्धमित्येवंरूपेणार्थः । अतएव नमुने इत्यादिभिस्तन्निषेधः सिद्धः ॥१॥

अनेन च शास्त्राणामेवासिद्धत्वं बोध्यते । तेन यत्राप्यन्तरङ्गत्वात्त्रैपादिकं प्रवृत्तं तत्रापि तत्तच्छास्त्रे एवाभावारोपेण तन्निर्वृत्तिबुद्धेरभावः लक्ष्ये जातत्वबुद्धभावश्च । कार्यासिद्धत्वस्वीकारे तु निरधिष्ठानारोपासम्भवाल्लक्ष्ये कार्यप्रवृत्तेरावश्यकतया अमू इत्यादौ अदअ औ इतिस्थिते पूर्वं मुत्वे तस्यासिद्धत्वेऽपि देवदत्तहन्तृहतन्यायेनाकाराभावेन

इष्टपररूपाद्यनापत्तिः। न च पूर्वं मुत्वेऽपि तस्यासिद्धतया अकारबुध्यै-वोकारस्यैव पररूपे सन्नियोगशिष्टन्यायेन मकारनिवृत्तौ वृद्धिरेचीति वृद्धौ अदौ इति जाते पुनर्मुत्वे अमू इत्यस्य सिद्धिः। लक्ष्ये लक्षणन्याय-स्य तु न विषयः। तन्मात्रस्थानिकविकाराभावेन तल्लक्ष्यत्वाभावा-दिति वाच्यम्, अमूभ्यां अमूदृगित्यादौ तन्मात्रस्थानिकविकारसत्त्वेन लक्ष्ये लक्षणन्यायेन पुनर्मुत्वाप्रवृत्त्यापत्तेरिति दिक्॥ २॥

ननु—पूर्वत्र नेत्येव सूत्रमस्त्विति चेन्न; पूर्वशास्त्रप्राप्तौ निषेध इत्यर्थे राजन् अश्व इत्यस्यामवस्थायां कस्यापि शास्त्रस्याप्राप्त्या उक्त-निषेधाप्रवृत्तौ नलोपे जाते भुक्तवन्तन्यायेनैतदप्रवृत्तौ राजाश्वेति दीर्घसिद्धौ नियमानुपयोगेन नलोपः सुबितिसूत्रासङ्गतेः। राजभ्या-मित्यादावपि दीर्घाद्यापत्तेश्च। पूर्वशास्त्रविषयसम्भावनायामित्यर्थे तु नलोपे सुब्विधिदीर्घादिविषयसम्भावनया राजभ्यामित्यादौ सर्वथा नलोपानापत्तेरिति दिक्॥ ९॥

अणुदित्सूत्रे प्राच्यनव्ययोः को विशेषः, कश्चास्यार्थः, अण्ग्रहणस्य प्रयोजनमस्ति न वा, प्रत्याहाराद्यवर्णेतरे कथं प्रवृत्तिरिति लिख॥१०॥

अण्घटकवर्णबोधकं पदं स्वबोध्यसवर्णानां बोधकं (ग्राहकं) भव-तीत्यर्थः। प्रतीयते विधीयते इति प्रत्यय इति मूलोक्तप्राच्यसम्मता-र्थस्तु न युक्तः, अत्यल्पमिदमुक्तमप्रत्यय इति अप्रत्ययादेशटित्किन्मि-त्सूपसंख्यानं कर्त्तव्यमिति वार्त्तिकोक्तेः। भाष्ये च अप्रत्ययग्रहणमेक-देशानुमत्या भाव्यमानेति परिभाषां ज्ञापयतीत्युक्तम्, तेन जातिपक्षेण गुणाभेदकत्वेन तपरसूत्रेण च प्राप्तसवर्णग्रहणनिषेधः सिद्धः। अतएव घटवदित्यादौ नानुनासिको वकारः। व्यक्तिपक्षे—णकारादिचिह्न प्रत्याहारस्थोऽयमिति बुद्ध्या प्रत्याहाराद्यवर्णेषु अस्य प्रवृत्तावपि द्वितीयादिवर्णे उच्चारितस्यैव प्रत्यायकत्वेनाप्रवृत्तौ अस्य च्वावि-त्यादौ हल्षु चाप्रवृत्त्या सर्वत्र जातिपक्षेणैव निर्वाहसम्भवेऽण्ग्रहणं भाष्ये प्रत्याख्यातम्। अत्र पक्षे—ऋलृवर्णयोः साजात्यं वक्तव्यम्, तच्चानित्यं, धातुषु अनुबन्धद्वयकरणात्; तेन न ऋदित्लृदित्प्रयुक्त-कार्यसंकर इति दिक्॥ १०॥

तपरस्तत्कालस्येत्यस्य सप्रमाणं सोदाहरणमर्थं निरूप्य विधित्वं नियमत्वं चोल्लिख्य नागेशोक्तविशेष उपपादनीयः ॥ ११ ॥

अतो भिस इत्यादौ तपरकरणेन सहिवहोरोदवर्णस्येत्यत्र वर्णग्रहणेन भाष्यव्याख्यानेन च तपरपदे बहुव्रीहिपञ्चमीतत्पुरुषाश्रयणेन तः पर इत्यादिमूलोक्तार्थः सम्पन्नः । न च वृद्धिरादैजित्यत्र संज्ञा तात्परा नहि तत्कालस्तत्सवर्णो वा प्रसिद्धोऽस्तीति वाच्यम्, व्याख्यानादिना तात्परशब्दबोध्यो वर्णः स्वसमकालग्राहक इत्यर्थेनादोषात्। तत्कालस्येत्यस्य तदुच्चारणकालसमकालस्येत्यर्थस्तत्फलितम्मूले उक्तं समकालस्यैवेति । व्यक्तिपक्षे गुणानां भेदकत्वमिति मते वृद्धिरादैजित्यत्रानणि आकारांशेऽस्य सावकाशत्वेन अतो भिस इत्यादौ परत्वादणुदित्सूत्रबाधः। गुणानामभेदकत्वमिति मते तु अनवकाशत्वादेव बाधः। एवञ्चानणि विधित्वेऽपि समकालस्यैवेत्येवकारो न्यायसिद्धबाध्यबाधकभावानुवादकः। सिद्धान्तभूते जातिपक्षे गुणानामभेदकत्वमिति मते नियमार्थमेव । उपसर्गादतीति तपरकरणाद्भिक्तितकारे इदन्न प्रवर्त्तत इति आद्गुण इत्यादौ न दोष इति दिक् ॥ ११ ॥

नवेति विभाषेति सूत्रस्थं प्रवृत्तिस्थलं सम्यगुपपाद्य प्रत्याख्यानरीतिरुपपादनीया ॥ १२ ॥

अत्रेतिशब्दबलेन नवा शब्दावर्थपदार्थकौ तेन निषेधविकल्पयोर्विभाषासंज्ञा सिद्ध्यति । प्राप्तविभाषासु नास्योपयोगः, भावसामानाधिकरण्येनाभावमात्रविधानेपीष्टसिद्धेः। एवमप्राप्तविभाषास्वपि नास्योपयोगः, तत्राभावसामानाधिकरण्येन भावमात्रविधानेप्युपपत्तेः। किन्तु उभयत्र विभाषास्थले विभाषाश्वेरित्यादावस्योपयोगित्वम्, तत्र यद्यभावसामानाधिकरण्येन संप्रसारणमात्रं विधीयते तर्हि पित्स्वेव विकल्पः स्यात् कित्सु तु नित्यमेव सम्प्रसारणं स्यात्; निषेधमुखेन प्रवृत्तौ तु कित्स्वेव प्रवर्तेत न पित्सु, उभयमुखेन प्रवृत्तिस्तु वाक्यभेदापत्तेरशक्या । संज्ञाकरणे तु श्रुतक्रमानुरोधात्पूर्वं कित्सु निषेधः, तदा किदकिद्रूपे सर्वस्मिँल्लिटि ऐक्यरूप्यं प्रापिते सति पक्षे भवतीत्येकरूपेण विधिमुखेनैव विकल्पः । भाष्ये तु अन्यतरस्यां वा इत्यादिपद-

घटितसूत्रेषु विभाषापदाभावात्तत्रावश्यमुभयमुखेन प्रवृत्तिर्वाच्येति विभाषापदघटितेष्वपि लक्ष्यानुरोधादुभयमुखेन प्रवृत्तिं स्वीकृत्य सूत्रमिदं प्रत्याख्यातमिति दिक् ॥ १२ ॥

स्वं रूपं शब्दस्येति सूत्रप्रयोजनं विविच्य भाष्योक्तान्यथासिद्धिः प्रदर्शनीया ॥ १३ ॥

अग्नेर्ढगित्यादौ लौकिकव्युत्पत्त्या उपस्थितार्थस्य प्रत्ययेन पौर्वापर्यासम्भवात्तदर्थकशब्दमात्रग्रहणापत्तौ सूत्रमिदं नियमयति अत्रात्मीयवाचिना स्वशब्देनार्थो गृह्यते रूपशब्देन च स्वरूपम्, तथा चार्थविशिष्टः शब्दस्वरूप एव संज्ञीत्यर्थादर्थवद्ग्रहणपरिभाषासिद्धा। स चार्थो मुख्यः प्रसिद्धश्चेति गौणमुख्यन्यायोऽपि सिद्धः। दाधाघ्वदादित्यस्य ईहल्यघोरित्यादौ चारितार्थ्येन उपसर्गे घोः किरित्यत्र स्वं रूपमित्यनेन परत्वाद्वाधशङ्कापनोदाय अशब्दसंज्ञेत्युपात्तम्, नात्र षष्ठीतत्पुरुषः, तथा सति कर्मसंज्ञादेरर्थसंज्ञात्वेन तत्र निषेधाप्रवृत्तौ कर्मण्यणित्यादौ स्वरूपग्रहणापत्तेः। भाष्ये तु उपस्थितार्थस्य शब्दम्प्रति विशेषणत्वसम्भवे तत्त्यागे मानाभावेन सकलेष्टसिद्धौ सूत्रमिदं प्रत्याख्यातम्। षान्तसंख्यावाचकषष्शब्दस्य षट्संज्ञाविधानात् तत्तत्संज्ञाकरणज्ञानरूपप्रकरणाच्च शब्दशास्त्रीयसंज्ञायां स्वरूपाग्रहणबोधनेन अशब्दसंज्ञेत्यपि प्रत्याख्यातम्। परेश्च घाङ्कयोरित्यत्र घशब्देन स्वरूपस्यैव ग्रहणं, नदीपौर्णमासीत्यत्र स्वरूपस्यैव ग्रहणं, जनपदादिशब्देभ्योऽर्थस्यैव ग्रहणमित्यादि लक्ष्यानुसारिव्याख्यानादेवेतिदिक ॥ १३ ॥

येनविधिरित्यस्यार्थं युक्तियुक्तं विविच्य तत्रत्य विशेष उपपादनीयः ॥ १४ ॥

येनेति करणे तृतीया, विधिरिति भावे किः, कर्मात्रविधेयं, कर्त्ता च पाणिनिस्तथा च पाणिनिकर्तृकयत्करणकविधानन्तत्तदन्तबोधकं भवतीति वाच्योऽर्थः। यथा—अचो यदित्यादौ अच्करणकयत्प्रत्ययकर्मकविधानमित्यच्पदमजन्तबोधकम्। तत्र करणस्य व्यापारवत्वनियमात् अन्येषाञ्च व्यापाराभावाद्विशेषणमेवात्र करणतृतीयान्तेनोच्यते। तस्य

चेतरव्यावृत्तिकरणमेव व्यापार इति भाष्यतो लब्धः। तत्र शब्दोपस्थित-विशेष्यस्य तादृशमेव विशेषणं तदन्तग्राहकम्, क्वचित्सति गमकेऽतादृशमपि शब्दरूपं विशेष्यमादाय तदन्तग्रहणम्, यथा सर्वादीनीत्यादौ॥ विशेषणादिकञ्चान्तरङ्गत्वात्समानाधिकरणमेव गृह्यते, अत्र च सति तदन्तविधौ तथाविशेषणत्वयोग्यताप्येतत्प्रवृत्तौ निमित्तम्, अतएव इन्हन्नित्यादौ इनंशे तदन्तग्रहणन्नहीनङ्गमित्यन्वयसम्भवः। एरजित्यनेन अय इत्यत्राच्सिद्धये स्वं रूपमित्यतः स्वमित्यनुवृत्त्या षष्ठ्या विपरिणामः। तत्प्रत्याख्याने तस्य चेति पाठो बोध्य इति दिक्॥१४॥

हलोऽनन्तरा इत्यनेन प्रत्येकं द्वयोर्बहूनां वा संयोगसंज्ञेति विविच्य लिख॥ १५॥

'गर्गाः शतं दण्ड्यन्तामि'ति न्यायेन अनन्तरा इत्युक्तेश्च समुदायस्यैव संज्ञेति सिद्धान्तः। केचित्तु संयुज्यन्ते वर्णा यत्रेत्यन्वर्थसंज्ञाबलान्न प्रत्येकं संज्ञेत्याहुस्तन्न, घटपटौ संयुज्येते यत्रेत्यादाविव संयुज्यमानपदार्थातिरिक्तद्घटितपदादेः संज्ञापत्तावनिष्टापत्तेः। महासंज्ञा तुप्राचामनुरोधेनैव। अतएव सुद्यद्धातीत्यत्र संयोगान्तलोपो न। यत्तु हल इति बहुवचनेन हलौ च हलश्चेत्येकशेषः, तेन द्वयोर्बहूनां वा संज्ञेत्याहुस्तद्भ्रमसात्। भाष्ये बहूनां संज्ञेतिपक्षस्य फलाभावेन खण्डितत्वात्। बहुवचनन्तु सौत्रमितिगृहाण। झलि परे संयोगादिलोपस्य वैयर्थ्यापत्तेश्चेति दिक्॥ १५॥

इकोगुणवृद्धी इत्यस्य व्याख्याने नागेशप्रणालीं लिख॥ १६॥

अत्र गुणवृद्धिग्रहणानुवृत्त्यासिद्धे पुनर्गुणवृद्धिग्रहणसामर्थ्यात्तृतीयान्ततया विपरिणामेन विधीयत इत्यध्याहारेण च मूलोक्तार्थलाभात्त्यदादीनाम इत्यादौ न दोषः। नच लक्षणप्रतिपदोक्तपरिभाषया यत्र प्रतिपदोक्ततया गुणवृद्धिविधानन्तत्रैवास्या उपस्थितिरिति त्यदादीनाम इत्यादौ दोषाभावेन मूलोक्तार्थो विफल इति वाच्यम्; यस्मिन्पदे परिभाषा प्रवर्त्तनीया तत्पदवृत्त्यानुपूर्व्यवच्छिन्नोद्देश्यता विधेयत्वान्यतरप्रयोजकपदघटितशास्त्रविधेयत्वरूपप्रतिपदोक्तत्वस्य स्वीकारेणात्र

प्रतिपदोक्तपरिभाषाया अप्रवृत्तेः। अस्याश्च विधेयसमर्थकगुणवृद्धि-पदश्रुतिर्लिङ्गन्तेनातो गुणे वृद्धिर्यस्येत्यादौ नास्याः प्रवृत्तिः। एतन्मूलक-एव विधौ परिभाषोपतिष्ठते नानुवादे इति प्राचां प्रवादः। इयञ्च पधिते-त्यादौ व्यञ्जनानां गुणव्यावृत्त्यर्थं भिन्नमित्यादौ निषेधप्रवृत्तये इग्लक्ष-णत्वसम्पादनार्थञ्चेति भाष्ये स्पष्टमित्यन्यत्र विस्तरः ॥ १६ ॥

स्थानिवत्सूत्रस्य प्रयोजनमुपपाद्य वद्ग्रहणफलं आदेशग्रहण-फलञ्च विविच्य विधिग्रहणस्य सफलतां प्रदर्श्य उभयमतेऽनल्विधा-वित्यस्यार्थं प्रकाश्य शास्त्रकार्यातिदेशयोः सप्रमाणं सिद्धान्तं लिख ॥१७॥

ननु तत्स्थानापन्नस्तद्धर्मं लभते यथा गुरोः स्थाने शिष्यो याज्य-कुलानि गत्वाऽग्रासनादीनि लभते इति लौकिकन्यायेन सिद्धे किमर्थं सूत्रमिति चेन्न ; लौकिकस्थान्यादेशापेक्षया शास्त्रीयस्थान्यादेशयो-र्भेदात्। दृष्टान्तस्य पुरुषारम्भो निवर्त्तको भवतीतिन्यायात् स्वं रूपमिति शास्त्रेण लौकिकन्यायबाधे आङो यमहन इत्यनेन वधेरात्मनेपदानुपप-त्तेश्च। सति त्वस्मिन्नतिदेशविषये स्वंरूपशास्त्राप्रवृत्तावदोषः। न च युष्मदस्मदोरनादेश इत्यत्रानादेशग्रहणेनादेशः स्थानिवदिति कल्पनात्, अदोजग्धिर्ल्यपीति सूत्रे ल्यबग्रहणेन अल्विधौ न स्थानिवदिति कल्पनाच्चसिद्धे व्यर्थमिदं सूत्रमिति वाच्यम् ; ज्ञापकसिद्धन्न सर्वत्रेति परिभाषाज्ञापनेन चारितार्थ्यात् ॥ १ ॥

ननु अब्राह्मणे ब्राह्मणोऽयमित्युक्तौ ब्राह्मणवदयमिति प्रतीतिवत् स्थानीत्युच्यमाने स्थानवदिति प्रतीतिसिद्धौ वद्ग्रहणं व्यर्थमिति चेन्न ; आदेशः स्थानिसंज्ञको भवतीत्यर्थभ्रमवारणायावश्यकत्वात्। अन्यथा हनो विधीयमानात्मनेपदं वधेरेव स्यात् संज्ञायाः संज्ञि-बोधकत्वेन दृष्टत्वात् ॥२॥

आदेशग्रहणन्तु साक्षादष्टाध्यायीबोधितस्य आनुमानिकस्य चादेशस्यात्र ग्रहणमिति बोधनार्थम्, तेन पचत्वित्यादेः तिङन्तत्व-सिद्धिरिति भाष्ये स्पष्टम्। एकदेशविकृतन्यायेन तु न सिद्धिः, अर्धाधिकविकारे तदप्रवृत्तेरिति दिक् ॥ ३ ॥

विधिग्रहणन्तु अला विधिः अलो विधिः अलां विधिः अलिविधिरिति समासलाभार्थं तेन व्यूढोरस्केनेत्यत्र विसर्गवृत्त्यट्त्वमादाय णत्वं न, अला विधौ निषेधात्। न च सकारे स्वतोऽभिन्नत्वसत्त्वेन न दोष इति वाच्यम्, अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावस्यातिदेशस्वभावसिद्धत्वात्। अत एव जहीत्यत्र स्वाश्रयो हेर्लुग्न। सुद्यौः पन्था इत्यत्र हलत्वमादाय सुलोपो न, अलः परस्य विधित्वेन निषेधात्। प्रपठ्येत्यत्र वलादित्वमादायेण् न, अलां विधित्वात्। कइष्ट इत्यत्रेकारे हलत्वमादाय "हशि चे"त्युत्वं न, अलिविधौ निषेधात्। न च "प्रातिपदिकनिर्देशाश्चार्थतन्त्रा भवन्तीति यां काञ्चिद्विभक्तिमाश्रित्य बुद्धिरुपजायते सा साश्रयितव्ये"ति भाष्यादनल् इत्युच्यमानेऽपि सकलेष्टसिद्धौ विधिग्रहणं व्यर्थमिति वाच्यम्, अप्राधान्येनालाश्रयणेऽपि निषेधप्रवृत्तिरिति ज्ञापनेन चारितार्थ्यात्; तेन प्रपठ्येत्यादाविड् न। अन्यथा इडादेरपि क्त्वः सत्त्वाद्वलादित्वस्य तद्विशेषधर्मत्वात् सामान्यधर्मातिदेशेनातिदेशस्य चारितार्थ्ये विशेषस्य वलादित्वस्यातिदेशो न स्यादिति दिक्॥ ४॥

प्राचीनमते स्थान्यवयवाऽलत्वव्याप्यधर्मघटितधर्मावच्छिन्नोद्देश्यताके कार्ये न स्थानिवदित्यर्थः। धर्मश्चातिदिदिक्षितो गृह्यते। अत्र घटितपदनिवेशात् प्रपठ्येत्यत्रेण् न। मात्रपदनिवेशाद्गुत्वातिदेशे निषेधो न। बभूविथेत्रेटो वलादिनिमित्तकत्वेऽपि तस्यातिदेष्टव्यत्वाभावेन निषेधाप्राप्त्या इट्सिद्धिरिति बोध्यम्॥

नव्यास्तु—भोभगो इति सूत्रस्थभाष्यात्, अलां विधिरित्यस्य अलविशिष्टविधौ नेत्यर्थः वै० स्ववृत्त्यलत्वव्याप्यधर्मघटितधर्मावच्छिन्नोद्देश्यताकत्व—स्ववृत्त्यलत्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपितादेशतावच्छेदकारोपप्रकारीभूतधर्मावच्छिन्नोद्देश्यताकत्वान्यतरसम्बन्धेन। प्रथमस्य प्रपठ्येत्यादिफलम्। द्वितीयस्य धिन्वन्तीत्यत्रोकारवृत्त्यार्धधातुकत्वं वकारे आदायेण् न। भवतीत्यादौ लकारवृत्त्यार्धधातुकत्वमादायेण् न। एरश्वो यश्चस्तस्यापत्यं याश्विरित्यत्रेकार-

वृत्तिपदत्वमादाय न य्वाभ्यामित्यैज् नेत्याहुः। अत्रत्यं तत्त्वमन्यत्र निरूपितमिति दिक् ॥ ५ ॥

अयञ्च प्राधान्यात्कार्यातिदेशः। शास्त्रातिदेशस्तु कार्यातिदेशादभिन्नरूप इति कैयटोक्त्या, तत्राऽङ्गशास्त्रातिदेशात्सिद्धमाङ्गं यत्कार्यं तदतिदिश्यते इति भाष्योक्त्या च शास्त्रकार्यातिदेशयोरभिन्नरूपत्वबोधनात्। इदमत्र बोध्यम्—अतिदेशेन अनपेक्षितार्थसन्निधानस्तत्तन्निमित्तरूपकार्यव्यवहार एव; कार्यन्तु स्वशास्त्रेणैव। अत एव रामायेत्यादौ स्थानिवत्त्वेन सुपत्वात् "सुपि चेति" दीर्घ इति परिवीरित्यत्र परत्वाद्दीर्घ इति च सङ्गच्छते। केचित्तु अतिदेशेन किञ्चिन्निमित्तवैकल्येऽपि दीर्घादिकार्यं क्रियते। कार्यञ्च किमित्याकाङ्क्षायां कार्यस्वरूपनिर्णयस्य विधिशास्त्रमूलकत्वेन विधिदेशेनैव परशास्त्रविहितत्वरूपं परत्वं कार्याणाम्, अत एवाऽतिदिश्यमानकार्याणामुपदेशदेश एव देश इति वृद्धोक्तिः सङ्गच्छते इत्याहुस्तन्न भाष्याद्यसम्मतत्वात्, कालातिक्रमभयान्मूले स्पष्टतरत्वाच्चेति संक्षेपः ॥ १७ ॥

अचः परस्मिन्नित्यस्य व्याख्याने मरुतमाचष्टे मारयतीत्यत्र वृद्धिसिद्धिरित्यस्याशयं सुगमय्य पूर्वविधावित्यत्र तत्रफलं लिख ॥ १८ ॥

अवापवेत्यादौ यलोपस्य स्थानिवद्भावादेवातो लोपाप्राप्त्या तदर्थं कृतस्योपदेशग्रहणस्य वैयर्थ्यापत्त्या हलादेशो न स्थानिवदिति कल्पनेनैव आगत्येत्यादिसिद्धौ अजग्रहणं व्यर्थं सदचप्पर्यन्तस्थानिकादेश एव स्थानिवदिति बोधयति; तेन मरुतमाचष्टे मारयतीत्यादौ वृद्धिसिद्धिः। न च इदुदुपधेभ्यो णिचोऽनभिधानादिदमयुक्तमिति वाच्यम्, ज्ञापकसाजात्याद् लुङ्येवानभिधानलाभात्। न च—कनयतीति भाष्योदाहरणेन णिजन्निमित्तकोपधात्ववतउपधावृद्धिर्नेति ज्ञापनात्प्रकृते तदप्राप्तिरिति वाच्यम्, उक्तोदाहरणेन टिलोपेतरादेशप्रयोजकणिच्प्रयोज्यादुपधात्ववत इत्यादिज्ञापनस्यैवौचित्येन ग्रन्थस्य सौष्ठवात् ॥ १ ॥

अत्र पूर्वविधावित्यस्य तन्त्रेणावृत्त्या वा एकस्य मूलोक्तार्थः। द्वितीये विधानं विधिरिति भावे किः, तथा च पूर्वसम्बन्धिभावे तत्स्थितौ कर्त्तव्यायां स्थानिवदित्यर्थः। पन्या अपत्यमैनेय इत्यादौ

यस्येति लोपस्य स्थानिवत्त्वात् सन्नियोगशिष्टन्यायाप्राप्तौ नकारस्थितिः सिद्धा। अत एव पञ्चेन्द्राण्यो देवताऽस्य पञ्चेन्द्र इति लुकि न स्थानिवदित्यस्योदाहरणं भाष्ये दत्तम्। अन्यथाऽत्र पूर्वत्वेन दृष्टस्य सम्बन्धिनः कस्यचिद्विधेयस्याभावान्निषेधासङ्गतिः स्पष्टैवेत्यन्यत्र विस्तर इति दिक्॥ १८॥

न पदान्तेत्यत्र विधिशब्दो भावसाधनः, कर्मसाधनो वेति सम्यगुपपाद्य पदेऽन्त इति सप्तमीसमासे फलं विनिर्दिश्य पदचरमावयवसाधकस्य प्रतिबन्धकस्य वाऽनेन निषेध इति युक्तियुक्तं लिखं॥ १९॥

अत्र विधिशब्दो भावसाधनः, कर्मषष्ठ्यासमासः। तथा च पदचरमावयवकर्मके विधौ न स्थानिवदित्यर्थः। तेन एषो यन्हसतीत्यादावेतत्तदोरिति सुलोपो न। लोपस्य पदचरमावयवत्वाभावे निषेधाप्राप्तौ यणः स्थानिवत्त्वं सिद्धम्। अत्रैवोत्वे च न स्थानिवदनेन निषेधात्॥ १॥

अत्र पदे अन्त इति भाष्योक्तसप्तमीसमासे प्रत्यासत्त्या परपदस्थाजादेशस्यैवानेन स्थानिवत्त्वनिषेधः। तेन वेतस्वानित्यादौ न दोषः। न च पूर्वत्रासिद्धीये न स्थानिवदिति निषेधोऽत्र दुर्वार इति वाच्यम्, सप्तमीसमासपरकभाष्येण पूर्वत्रासिद्धीय इत्यत्र लोपप्रयोजकप्रत्ययनिरूपितपदसंज्ञावच्चरमावयवातिरिक्तस्यैव त्रैपादिकस्य ग्रहणात्, अत एव महिष्मानित्यादौ जश्त्वं न। पदेऽन्त इत्यत्र पदपदं पदत्वयोग्यपरन्तेन गोचेत्यत्र सुबुत्पत्तेः प्राक् समासेऽपि पदत्वयोग्यत्वसत्त्वादनेन निषेधेऽवादिर्नेति संक्षेपः॥ २॥

अनेन साक्षात्पदचरमावयवसाधकः प्रतिबन्धकश्च साक्षात् परम्परया वा स्थानिवद्भावो निषिध्यते। तेन षडिक इत्यत्र षान्ते भत्वप्रतिबन्धद्वारा जश्त्वविधिप्रापकस्थानिवद्भावो न निषिद्धयत इति जश्त्वसिद्धिः। साक्षात्पदचरमावयवसाधकस्थानिवद्भावस्य वाक्यसंस्कारपक्षे कानि सन्तीत्याद्युदाहरणम्, पदसंस्कारपक्षे गोचेत्यादि। साक्षात्प्रतिबन्धकस्थानिवद्भावस्य वाक्यसंस्कारपक्षे एषो यन्हसति, परम्परया प्रतिबन्धकस्य व्याघ्रपदेत्यन्यत्र विस्तर इति दिक्॥ १९॥

अदर्शनं लोप इति सूत्रव्याख्याने नागेशोक्तिं लिख ॥ २० ॥

अत्र स्थाने इत्यनुवर्तते, दृशिर्ज्ञानसामान्ये वर्तते, तत्र ज्ञानस्यावर्जनीयत्वेन ज्ञानसामग्र्यन्तर्गता उच्चारणप्रयुक्तासत्ता अदर्शनपदेन निषिद्ध्यते। दर्भाणां स्थाने शरैः प्रस्तरितव्यमित्यत्रेव स्थानशब्दः प्रसङ्गवाची। तथा च शास्त्रतोऽर्थतो वा प्रसक्तस्य उच्चारणप्रयुक्तसत्ताभावो लोपसंज्ञ इत्यर्थः। लोपविधायकशास्त्रैः प्रसक्तोच्चारणस्य लोपविधाने भुक्तवन्तन्यायविरोधात्तैरनुत्पत्तेरेवान्वाख्यानं युक्तं प्रत्ययलक्षणार्थमिति गूढाशयः।

केचित्तु—प्रसक्तस्येति किं ? ग्रामे तिष्ठतीत्यादौ ल्यपोऽदर्शनसत्त्वेन ल्यब्लोप इति पञ्चम्यापत्तिः, तदुक्तौ तु शास्त्रतोऽर्थतो वा न ल्यपः प्रसक्तिरिति न दोष इत्याहुस्तन्न प्रत्यासत्त्या ल्यवन्तार्थनिरूपितकर्माधिकरणयोरेव पञ्चमीविधानेन तस्याऽत्राप्रवृत्तेः। अर्थतो ल्यवन्तस्य प्रसक्तेर्दुर्वारत्वात्। एवञ्च त्रपु इत्यादौ क्विपोऽदर्शनसत्त्वेन प्रत्ययलक्षणेन तुगापत्तिरिति प्रत्युदाहरणं युक्तम्। तुग्विधायके कृत्प्रत्ययेन प्रकृत्याक्षेपस्तु न सम्भवः, अत्रैव प्रकृतिं विनापि अतिदेशतः प्रत्ययज्ञानसत्त्वेन व्यभिचारादिति दिक् ॥ २० ॥

वान्त इत्यत्र वकारादिति प्रतीकमादाय नागेशोक्तविशेषः प्रदर्श्यताम् ॥ २१ ॥

ननु—गव्यूतिरित्यादौ हलि सर्वेषामिति लोपः शाकल्येस्येति वा लोपः कुतो नेति चेन्न; वान्त इत्यत्र वकारप्रश्लेषादित्यादिमूलोक्तेः। न च लोपो व्योरिति सूत्रे विशेषविहितेन वकारस्य कार्यित्वेन निमित्तत्ववाधात्कथमत्र वस्य लोप इति वाच्यम्, निमित्तत्वानाक्रान्ते देदेतीत्यादौ कार्यित्वस्य चारितार्थ्यात्। तत्रन्यायस्तु—अनवकाशविषयो विधेयविषयश्चेति भाष्ये उक्तम्। गव्यमित्यादौ भत्वेन लोपाप्राप्त्या क्यजादौच नः क्ये इति नियमेनैव लोपाप्राप्त्या वार्त्तिके एव प्रश्लेषो युक्त इत्याशयेन छकाराद्धेत्युक्तम्। लुप्तनिर्दिष्टो वकार इति भाष्येण लोपो व्योरित्यन्यत्र वकारप्रत्याख्यानं लौकिकोदाहरणाभावपरतया नेयम्। न च-गव्यूतावुच्चारणस्य चारितार्थ्येन विष्णव इत्यादौ वलो-

पापत्तिरिति वाच्यम्, गवि च युक्ते इत्यादिनिर्देशैर्वारणसम्भवात्।

वस्तुतस्तु सर्वविधीनां छन्दसि व्यवस्थितत्वेन अध्वपरिमाणे संज्ञात्वभङ्गापत्त्या च लोपाभावे सिद्धे वकारप्रश्लेषो विफलः। अत एव रघुनाथेति संज्ञाशब्दे णत्वाभाव इति दिक्॥ २१॥

धातोस्तन्निमित्तस्येति सूत्रे धातोरित्यस्यैवकारस्य च फलं लिख॥ २२॥

अत्र धातुग्रहणाभावे योगविभागैर्वकारवैयर्थ्यापत्त्या सामान्यतो नियमापादनासम्भवेन प्रातिपदिकमात्रविषयको नियमः स्यात्। अर्थात् प्रातिपदिकस्यैचो यदि वान्तादेशः स्यात्तर्हि यादिप्रत्ययनिमित्तकस्यैवेति तथा च गव्यमित्यादौ न स्यात्, ओयत इत्यादौ स्यात्॥१॥ तन्निमित्तकस्यैचो यदि वान्तादेशस्तर्हि धातोरेवेति विपरीतनियमवारणायात्रैवकारः। अतएव बाभ्रव्यादाववादिसिद्धिरिति दिक्॥ २२॥

लोपः शाकल्यस्येत्यत्राशीत्यस्य प्रयोजनं सम्यगुपपाद्यताम्॥२३॥

अत्राशीत्यस्य वृक्षवृक्करोतीति प्रत्युदाहरणम् विच्निमित्तकलोपो व्योरिति लोपस्तु न, णिलोपादेः स्थानिवत्त्वात्। न पदान्तेति निषेधस्तु न, प्रातिपदिकाणिजुत्पत्त्या पदत्वाभावेन परपदस्थाजादेशाभावेन लोपस्य पदावयवत्वाभावेन च निषेधाप्राप्तेः। न च पदत्वे कर्त्तव्ये टिलोपस्य स्थानिवत्त्वात्कथं वस्य पदान्तत्वमिति वाच्यम्, साक्षात् पदत्वादिद्वारकपरम्परया वा पूर्वत्रासिद्धीयप्रापकस्य प्रतिबन्धकस्य वा स्थानिवद्भावस्य पूर्वत्रासिद्धीये न स्थानिवदित्यनेन निषेधादिति प्राञ्चः।

नव्यास्तु—न पदान्ता हलोऽणः सन्तीति भाष्यात् अश्ग्रहणमनर्थकमन्यत्राभावादिति वार्त्तिकाच्च वृक्षवादेरनभिधानमेवेत्यशीति स्पष्टार्थमेव। हलि सर्वेषामित्यत्र वकारनिवृत्त्यैवात्र दोषाभावेन उत्तरार्थमशीत्यादिभाष्यस्यैकदेश्युक्तित्वमित्याहुरिति दिक्॥ २३॥

उरण् रपर इत्यस्य व्याख्याने नागेशाशयं विशद्य लिख॥ २४॥

उदात्तस्वरितयोर्यण इतिवत्षष्ठीस्थाने इत्यस्योपस्थित्या स्थान इति लभ्यते, स्थानेऽन्तरतम इत्यतोऽनुवर्तमानं स्थाने ग्रहणं लक्षणया प्रस-

ङावस्थायामित्यर्थकम्, तथा च मूलोक्तार्थः सम्पन्नः। रपर इत्यत्र परशब्दोऽवयवबोधकस्तेन षष्ठ्यर्थे बहुव्रीहिणास्यावयवत्वाद्यदागमपरिभाषया अरित्यस्य गुणत्वमारित्यस्य वृद्धित्वञ्च सिद्ध्यति। अत एव भाष्ये "गुणो भवति वृद्धिर्भवतीति रेफशिरागुणवृद्धिसंज्ञकोऽभिनिर्वर्तते" इत्युक्तम्। ऋकारस्य गुणवृद्धी अरारावेवेति नियमश्च संगच्छते। न च वर्णस्य वर्णान्तरावयवत्वं कथमिति वाच्यम्, अनेनैवावयवसादृश्यबोधनात् पञ्चम्यर्थे बहुव्रीहिणाऽनवयवत्वन्तु न युक्तम्; उक्तभाष्यनियमानुपपत्तेः, वत्रे इत्यादौ रेफस्याभ्यासानवयवत्वेन हलादिः शेषानुपपत्तेश्च। न चाऽत्र पक्षे—क्व रपरत्वं क्व लपरत्वमिति व्यवस्था कथमिति वाच्यम्, आन्तर्यतो रेफवत्स्थानिकस्य रपरत्वं लकारवत्स्थानिकस्य लपरत्वमिति व्यवस्थासम्भवात्। केचित्तु—तत्र तत्रादेशानेव रलपरानुच्चार्य सूत्रमिदन्न कार्यमित्याहुस्तन्न, आप्ज्रप्धृषामीत् भृज्रामिदित्यादौ दोषापत्तेः। वस्तुतस्तु रप्रत्याहाराभावेन रपर इत्यस्य स्थाने रलपर इति पठनीय इति भाष्याशय इति दिक् ॥२४॥

एत्येधत्यूठ्स्विति सूत्रे प्राच्य-नव्योः को विशेष इति लिख ॥२५॥

एचीत्येत्येधत्योरुभयोर्विशेषणन्तेनोपेती भावान्प्रेदिधदित्यत्र नेत्यादि प्राञ्चः। नव्यास्तु—इणीकारौ प्रतिषेध इति वार्त्तिके एधत्यनुपादानात् न त्वेधतेरव्यभिचारादिति वृत्तेश्च प्रेदिधदित्यस्यानभिधानत्वमेव। एत्येधत्योरेचीति विशेषणमिति भाष्यन्तु, एधत्यंशे सम्भवमात्रप्रदर्शकमिति न तद्विरोध इत्याहुः। वस्तुतस्तु वार्त्तिके इणीति प्रतीकमिणेधत्योर्बोधकम्। किञ्च—एत्येधत्योरेचीति विशेषणमिति भाष्यस्य उपरञ्जकतया विशेषणत्वकल्पनापेक्षया वार्त्तिकस्थेणीत्यस्यैधत्युपलक्षकत्वकल्पनमेव युक्तमिति दिक् ॥२५॥

अन्तादिवच्चेति सूत्रे प्राच्यनव्ययोर्मतं विवेचनीयम् ॥२६॥

पृथगवस्थिताभ्यामन्तादिवर्णाभ्यां पूर्वघटितसमुदायस्य परघटितसमुदायस्य च ये प्रत्ययत्वादयो व्यवहारास्ते एकादेशान्तस्यैकादेशादेशश्च भवन्तीति परमार्थः। तेन रामावित्यादौ परादिवत्वेन औ इत्यस्य सुप्त्वेन पदत्वसिद्धिः। अनेन च अन्तादिवर्णवृत्तिर्यो वर्णमात्रवृत्तिधर्म-

स्तस्य तद्घटितधर्मस्य वा नातिदेशः। तेन खट्वाभिरित्यत्राऽत्वस्याऽदन्तत्वस्य चानतिदेशादैस्न, अयजे इन्द्रमित्यादौ सवर्णदीर्घश्च न। अत एव षत्वतुकोरसिद्ध इति तुग्ग्रहणं चरितार्थम्। अत एव वर्णाश्रये चान्तादिवत्त्वप्रतिषेधो वक्तव्यो न वाऽतादूरूप्यातिदेशादिति वार्त्तिकादि संगच्छते। स्थानिवत्सूत्रेण, गतार्थमिदमिति प्राचीनोक्तं न युक्तम्, क्षीरपेणेत्यादावेकाजुत्तरपदत्वस्य पे शब्देऽनल्विधाविति निषेधेनातिदेशार्थमस्यावश्यकत्वात्। न च—अतादूरूप्यस्यैवानेनातिदेश इति वाच्यम्, स्ववृत्तित्व-स्वस्थानिकादेशावृत्तित्वोभयसम्बन्धेन अन्तादिवर्णविशिष्टो योऽल्मात्रवृत्तिधर्मस्तस्य तद्घटितधर्मस्य वाऽतिदेशे एव तन्निषेधप्रवृत्तेः। अत्र तु—अल्मात्रवृत्तिधर्मस्याच्त्वस्य स्वस्थानिकादेशावृत्तित्वेन निषेधाप्रवृत्तेः। अत एव भियो हेत्विति सूत्रे भीई-इति प्रश्लेषे एकादेशविशिष्टे धातुत्वातिदेशादियङ्सिद्धः। आनुमानिकस्थानिवद्भावकल्पेऽपि समुदायवृत्तिधर्मस्यैवातिदेश इति भीई-इति समुदाये धातुत्वस्यासत्त्वेनैकादेशविशिष्टेऽलभ्यत्वात्। एकदेशवृत्तिधर्मस्याप्यतिदेशे तु स्वाशब्दस्य स्थानिवत्त्वेन स्वशब्दतया तत ईरिन्शब्दे वृद्ध्यापत्तेरित्यादि नवीना आहुः। वस्तुतस्तु क्षीरपेणेत्यत्रैकाच्त्वस्य सिद्धतयोत्तरपदत्वस्यैवातिदेशः। भिय इत्यत्रेकारप्रश्लेष इति भाष्यस्य ईभिय इति न्यासे तात्पर्यमिति नातिदेशापेक्षेति सूत्रं निष्प्रयोजनमित्यन्यत्र विस्तरः ॥२२॥

प्रार्छतीत्यत्र विसर्गवारणाय मूलोक्तरीतिः साध्वी न वेति युक्त्या प्रतिपाद्यताम् ॥२७॥

ननु प्रार्छतीत्यत्रान्तादिवच्चेति पूर्वान्तवद्भावेन प्राप्तो विसर्गः कर्त्तरि चर्षीति निर्देशेन वारितो न युक्तः तत्र गुणस्य पदद्वयसम्बन्धिवर्णद्वयाश्रितत्वेन बहिरङ्गत्वाद्रेफाभावेन न विसर्गप्राप्तिरिति चेन्न, गुणस्येव विसर्गस्यापि पदद्वयसम्बन्धिवर्णद्वयाश्रितत्वात्। किञ्च कार्यकालपक्षे त्रिपाद्यां बहिरङ्गपरिभाषाप्रवृत्तिरिति प्राचोक्तमयुक्तम्, त्रिपाद्या असिद्धत्वात्। अत एव निगाल्यत इत्याद्यर्थं तस्य दोष इति वचनमेवारब्धम्। अन्यथाऽन्तरङ्गत्वाण्णिलोपात्पूर्वं वैकल्पिकलत्वे चक्रूयत्र

माषवपनीत्यादौ बहिरङ्गासिद्धत्वेन च सिद्धे तद्वैयर्थ्यं स्पष्टमेव। अत एवायुक्तोऽयं परिहारो न वा बहिरङ्गलक्षणत्वादित्युक्तं भाष्ये। केचित्तु लक्ष्यानुरोधात्कार्यकालपक्षे उपस्थितयानुमानिक्याऽन्तरङ्गपरिभाषया प्रत्यक्षसिद्धस्यापि पूर्वत्रेत्यस्य बाध इत्याहुस्तन्न, लक्षणैकचक्षुषामनादरणीयत्वादिति दिक्॥ २७॥

ओत्वोष्ठ्योरिति सूत्रे का वाचोयुक्तिर्ग्रन्थकारस्य॥२८॥

'समासेऽङ्गुलेः सङ्गः' इत्यत्र समासग्रहणात् पदविधिरिति सूत्रस्वारस्येन च पदत्वव्याप्यधर्मेण साक्षादवच्छिन्नोद्देश्यता यत्र तत्रैव समर्थपरिभाषाप्रवृत्तिस्वीकारादत्र समर्थपरिभाषाया अप्रवृत्तिः, ओत्वोष्ठादिमात्रस्य पदत्वाभावात्; अवर्णादोत्वोष्ठयोरचि तद्घटितसमास इत्यर्थादन्त्योष्ठ्यो वः स्मृत इति प्रयोगसिद्धिः। अन्यथा प्रत्यासत्त्या ओष्ठाद्युत्तरपदकसमास एव प्रवृत्त्यापत्तौ उक्तप्रयोगासङ्गतिः। वस्तुतः पदविधित्वञ्च पदसंज्ञाप्रयोजकसुप्तिङ्प्रयोजकसंज्ञीयोद्देश्यतावच्छेदकसम्पादकत्वन्तेन नागेशोक्ता पदविधित्वे समर्थसूत्रोक्ताऽनेकक्लिष्टकल्पना व्यर्थेति दिक्॥ २८॥

ऋति सवर्णे ऋवेति वार्त्तिकद्वयस्य सफलप्रयोजनं लिख॥२९॥

वार्त्तिकद्वयविधेययोरइउण् सूत्रानन्तरं पाठेनाच्त्वात् होतृकार इत्यादौ तयोः प्लुतसिद्धिः रपरत्वञ्च न। अनयोश्च द्विमात्रत्वेन दीर्घत्वम्। अत एव अकः सवर्णे इत्यनेनैव ऋकारद्वयस्थाने रेफद्वयवत्तारूपगुणकृतान्तर्येण कदाचिद्रेफद्वयगर्भस्य ईषत्पृष्टस्य विवृतत्वान्तर्येण दीर्घस्य विवृतत्वस्य च लृकारे लकारवत्तान्तर्येण कदाचिदीषत्स्पृष्टस्य द्विलकारकस्य विवृतत्वसाम्येन रेफवत्तासाम्येन च विवृतस्य दीर्घऋकारस्य च सिद्ध्या विकल्पपक्षसिद्धिमाश्रित्य वचनद्वयं भाष्ये प्रत्याख्यातम्। विवृतऋकारलृकारयोरैवैतयोरपि अभितोऽज्भागोऽस्ति। अत एव भाष्ये मातॄणामित्यादौ णत्वादिसिद्धयेऽवश्यमङ्गीकर्तव्ये वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते इति पक्षे–आलृय खट्वामिर्वाचा तरतीत्यादौ तुगैस्द्व्यञ्लक्षणठनां शङ्काया दीर्घादिति तुग्विधानसामर्थ्य-तपरकरणसामर्थ्य-नौ द्व्यच इति नौ ग्रहणसामर्थ्यैर्भेदेनाप्रतिभासमानेषु

अवयवसदृशस्वतन्त्रवर्णाश्रयकार्याभावज्ञापनरूपसमाधानस्य च करणवत् प्रातर्ऋतमित्यत्र रोरीत्यस्य तद्लृकार इत्यत्र तोर्लीत्यस्य च शङ्कासमाधानाकरणेन यत्तत्परं रेफाद्भक्तेस्तेन व्यवहितत्वान्न प्राप्नोतीति भाष्येण च ऋलृक्सूत्रस्थयोरर्धमात्राऽभागस्याभितः क्लृप्तत्वेन तथैवात्राप्युचितत्वादिति दिक् ॥ २९ ॥

व्यवस्थितविभाषां परिगण्य तथैव सिद्धं इन्द्रे चेति सूत्रप्रयोजनं लिख ॥ ३० ॥

"देवव्रातो गलोग्राह इति योगे च सद्विधिः। मिथस्तेन विभाष्यन्ते गवाक्षः संश्रितव्रतः" तेन प्राण्यवयवे नेति भाष्येणैतेषां अशीत्प्रेषणे इति सूत्रे अशीदशीन्विहरेत्यत्रैतद्व्यावृत्त्यर्थं वार्तिककृद्बहुलग्रहणघटितन्यासस्य विभाषेति योगविभागेन प्रत्याख्यानपरकभाष्येण विभाषेत्यस्य अजेर्व्यघञपोरित्यस्य च व्यवस्थितविभाषात्वम् । न चैवम् इन्द्रे नित्यावङि सिद्धे इन्द्रे चेति सूत्रं व्यर्थमिति वाच्यम्, भाष्योक्तातिरिक्तानां व्यवस्थितविभाषाणामप्रामाणिकत्वबोधनेन चारितार्थ्यादिति संक्षेपः ॥ ३१ ॥

हैहेप्रयोगे-इत्यत्र प्राच्यनव्ययोः को विशेष इति सुस्पष्टं लिख ॥३२॥

अनयोः सम्बोधनार्थकत्वेन दर्शनात् सम्बोधनद्योतकत्वेन च ह्रयमानार्थपदत्वात् गुरोरनृत इत्येव सिद्धे नियमार्थमिदम्। हैहेऽन्त इत्येव सिद्धे प्रयोगग्रहणाच्चाऽनन्त्ययोरपि तयोः प्लुतसिद्धिरिति प्राञ्चः।

नव्यास्तु—एकं हैहेग्रहणमनन्त्यार्थम् । अन्यथा वाक्यस्य टेरित्यधिकारादन्त्ययोरेव स्यात्। प्रयोग इति तु यत्र सम्बोधनोत्तरं तयोः प्रयोगस्तत्र तेनैवाभिमुख्यस्य द्योतितत्वेन द्योत्याभावादनर्थकयोरपि तयोः प्लुतार्थः । हैह्ययोरिति तु तयोर्ह्रयमानार्थपदत्वाभावादप्राप्ते विध्यर्थम् । नियमे तु न मानं तेनात्र प्लुतसमावेश इति भाष्ये स्पष्टमित्याहुः ॥ ३१ ॥

अप्लुतवदिति सूत्रे वद्ग्रहणं किमिति प्रतीके का रीतिर्ग्रन्थकारस्येति विविच्य लिख ॥ ३२ ॥

अत्र वद्ग्रहणाभावे प्लुतस्य स्थानेऽप्लुतस्य विधानेन प्लुत एव

निवर्त्तेत । प्रसज्यप्रतिषेधेन व्याख्यानन्तु न युक्तं गौरवात् । किञ्च तथासति प्लुतप्रकरणे एव नोपस्थित इति वदेत् । न च पर्युदासेऽपि अग्नी इतीत्यादौ प्रगृह्याश्रयप्रकृतिभावं बाधित्वा परत्वादप्लुतवद्भावे दीर्घादिकं स्यादिति वाच्यम्, इतिशब्दसापेक्षाऽप्लुतवद्भावापेक्षया वर्णमात्रसापेक्षप्रकृतिभावस्यान्तरङ्गत्वेनादोषात् । न च प्लुतकार्यप्रतिषेधार्थमिदमिति भाष्योक्त्या अप्लुतवदित्यस्य प्लुतकार्यन्नेत्यर्थ एव युक्त इति वाच्यम्, प्लुतेऽप्लुतसादृश्यस्यैव शब्दमर्यादालभ्यत्वेन उक्तभाष्यस्य फलितार्थाभिप्रायकत्वादिति दिक् ॥ ३२ ॥

ईचाक्रवर्मणस्येत्यस्योभयत्र विभाषात्वे को विवादः प्राच्यनव्ययोरिति लिख ॥ ३३ ॥

उपस्थिते प्राप्तेऽनुपस्थिते चाप्राप्ते उभयत्र विभाषेयम् । अत्रोपस्थित इति नानुवर्त्तते ततश्च परत्वाद्विकल्प इति प्राञ्चः । नव्यास्तु—भाष्ये "किमर्थमिदमुच्यते अनुपस्थितार्थम्, तत्र ई ग्रहणेन नार्थः अविशेषेण चाक्रवर्मणस्य मते अप्लुतवदितीदमपि सिद्धं भवति । वशा इयं वशेयमि"त्युक्तम् । एतद्भाष्यबलेन ईग्रहणसत्त्वेऽपि उपस्थिते पूर्वविप्रतिषेधेन नित्याप्लुतवद्भाव एवेष्टः । प्रत्याख्याने नित्याप्लुतवद्भावस्य येन नाप्राप्तिन्यायेन वैकल्पिकतद्बोधिताभावांशबाधकत्वात् उपस्थित इत्यस्य निवृत्त्य परविप्रतिषेधाश्रयणेनोभयत्र विभाषेयमिति कैयटश्चिन्त्य एव, उक्ताभाष्यविरोधात् । मूलन्तु—इति शब्दभिन्ने वैदिके इति शब्दे चेत्येवं परतया कथञ्चिन्नेयमित्याहुः ॥ ३३ ॥

निपात एकाजिति सूत्रं सपदकृत्यं व्याख्यायताम् ॥ ३४ ॥

अत्र निपातग्रहणाभावे चकारात्रेत्यत्र प्रत्ययस्य शास्त्रकल्पितार्थवत्त्वेन प्रगृह्यत्वं स्यात् । व्याहरति मृग इत्यादिनिर्देशेन एकाजित्यकर्मधारयस्तेन व्याकरण इत्यादौ न । अनाङित्युक्त्या पर्युदासो लभ्यते । अन्यथा एकाज्नाङित्येव वदेत् । तेनाङ्वर्ज इत्यर्थो वर्णितः । अत एव वासुदेववाचकस्य अशब्दस्याऽऽङा सह आआदित्यव्ययीभावे अमित्यत्र पूर्वान्तवत्त्वेनाङ्त्वातिदेशेऽतिदिश्यमानधर्मविरुद्धस्वाश्रयाङभिन्नत्वेन पूर्वान्तवत्त्वेन निपातत्वेन च प्रगृह्यत्वं न । ओदिति सूत्रे

आउओ इत्यत्रानाङिति प्रतिषेधार्थोऽयमारम्भ इति भाष्यन्तु पर्युदासेऽपि फलितप्रतिषेधस्य सत्त्वान्नानुपपन्नम्। अत्रानाङिति पर्युदासादेव निपातैकाज्रूपत्वे लब्धे निपातैकाच्ग्रहणं स्पष्टार्थम्। न च—स्वाङ्गसमुदाये स्वाङ्गत्वाभाववदच्समुदायेऽच्त्वाभावाद्जित्येवाच्समुदायग्रहणाभावे सिद्धे एकग्रहणं व्यर्थमिति वाच्यम्, वर्णग्रहणे जातिग्रहणमिति बोधनार्थत्वात्। तेन धिप्सतीत्यादिसिद्धिः। जातिग्रहणमित्यस्योपात्तजात्याश्रयैकानेकव्यक्तिग्रहणमित्यर्थस्तेन तितउशब्दैकदेशस्य अउ–इत्यस्यानुकरणे अउ अकरोदित्यत्र अनुकरणञ्चानीति निपातत्वेऽपि प्रगृह्यत्वाभावाय एकग्रहणस्य स्वांशे चारितार्थ्यमिति दिक्॥ ३४॥

उञ ऊँ इत्यत्र योगविभागस्य फलमुपपाद्यताम्॥ ३५॥

अनयोरेकसूत्रत्वे विकल्पानुवृत्तौ ऊँ इतीत्येकमेव स्यात्। स्थानिन उञो निपातत्वेनादेशे स्थानिवद्भावेन तत्त्वात्प्रगृह्यकार्यम्। विकल्पानुवृत्तौ च ऊँ आदेशस्य प्रगृह्यत्वस्य च विकल्पे ऊँ–इति = वितीत्येव सिद्ध्यति, न तु उ इतीति। प्रगृह्यत्वविकल्पेन पक्षे तदभावेऽप्यस्य तात्पर्यादित्येदभावे निपात एकाजित्यस्याप्रवृत्तेरतो योगविभागस्य उहतीति रूपसिद्धिः फलम्। अत एव भाष्ये योगविभागं प्रदर्श्य किमर्थो योगविभागः शाकल्यमते ऊँ विभाषा यथा स्यात् ऊँ–इति, उ–इति, अन्येषामाचार्य्याणां मते वितीति। उञ इति विभक्तसूत्रे शाकल्यस्येतौ प्रगृह्यमित्यनुवर्त्तते, प्राप्तविभाषेयम्। द्वितीययोगे शाकल्यप्रगृह्यपदयोः सम्बन्धः। अन्यथा उञ इत्यर्थाधिकारादप्रगृह्यस्यैवादेशे तस्येको यणचीति यणि ऊँ इतीत्यस्यासिद्धिः, दीर्घोच्चारणवैयर्थ्यापत्तिश्च। अत्र विशिष्टस्य विधिरिति न वाक्यभेद इति दिक्॥ ३५॥

टोः किं सर्पिष्टममित्यस्याशयं लिख॥ ३६॥

न पदान्ताट्टोरिति सूत्रे ष्टुरित्यस्यानुवृत्तावपि षकारस्य पदान्ते जश्त्वविधानेन टोरेव निषेधसिद्धा टोरिति व्यर्थमिति प्रश्नाशयः। ह्रस्वात्तादाविति षत्वस्यासिद्धत्वाज्जश्त्वाभावेन सर्पिष्टममित्यत्र पदान्तषकारात्परस्य निषेधापत्तिरिति समाधानकर्त्तुराशयः। न च षत्व-

स्यासिद्धत्वेऽपि सकारबुद्ध्या पस्यैव जश्त्वेन नोक्तदोष इति वाच्यम्, सपिस्तममिति स्थिते रुत्वविसर्गयोः सतोर्विसर्जनीयस्य स इति सकारस्य षत्वेन तस्याप्यसिद्धतया जश्त्वाप्राप्तेः। न च ह्रस्वादिति षत्वं रुत्वापवाद इति वाच्यम्, चतुष्ट्रमित्यत्र चारितार्थ्येनापवादत्वासम्भवात् ॥ ३६ ॥

यथासंख्यसूत्रस्यार्थं विविच्य प्रयोजनं दर्शयत ॥ ३७ ॥

समसंख्यानां सम्बन्धो येन क्रमेण पदज्ञानं पदादुपस्थितिर्वा तेनैव क्रमेण वाक्यार्थबोधविषयः सम्बन्धस्तेषामित्यर्थः। तत्फलितमेव मूले उक्तं समसम्बन्धीति। कथमयमर्थो लब्ध इति चेच्छृणु,सम्यक् ख्यानं संख्या क्रमवैशिष्ट्येन ज्ञानम्, यत्सांख्यैः प्राप्यते स्थानमित्यत्र संख्याशब्दस्य ज्ञानार्थतया दृष्टत्वात्। तामनतिक्रम्य यथासंख्यम्, अनुदेशः पश्चाद्भववाक्यार्थबोधकालिकः सम्बन्धः। साम्यञ्च योग्यत्वाद् व्याख्यानाच्च संख्ययैवेति पूर्वोक्तार्थो लब्ध इति। ननु—शत्रुं मित्रं विपत्तिं च जय रक्षय भक्षय, आभाकासितपक्षे च मैत्रथवणरेवतीत्यादिलौकिकप्रमाणादेव यथासंख्यान्वयसिद्धे सूत्रमिदं व्यर्थमिति चेन्न; परस्मैपदानामित्यादौ सूत्रान्तरस्थक्रममादाय सम्बन्धबोधार्थमाद्यन्तौ टकितावित्यादौ साहित्ये द्वन्द्वविधानादप्राप्तक्रमान्वयबोधार्थञ्चास्यावश्यकत्वात्। अत एव अजाविधनौ देवदत्तयज्ञदत्तावित्यत्र "न ज्ञायते कस्याजाधनं कस्यावय"इति भाष्यं संगच्छते। अत्र स्वरितेनेत्यपकृष्यते तेन ख्यत्यादित्यादौ नातिप्रसङ्गः। वस्तुतस्तु समसंख्यावतां शाब्दबोधविषयः सम्बन्धो यथासंख्यं नाम क्रमिक एव नतु तद्विपरीत इति सूत्रार्थः। क्रमिकत्वञ्च स्वाश्रयप्रतियोगिकत्व-स्वविशिष्टविशेष्यतावदनुयोगिकत्वोभयसम्बन्धेन स्वप्रतियोगिवृत्तिसंख्योत्पादकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितजन्यताविशिष्टत्वम्। सम्बन्धघटकवै० स्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकसंख्यात्वव्याप्यधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्व-स्ववृत्त्येकत्वावच्छिन्नैकत्वानवच्छिन्नत्वान्यतरत्वोभयसम्बन्धेन। लक्षणसमन्वयस्तु विस्तारभयान्न कृत इति क्षन्तव्यः, सुजनैरनुपयोगाद्वेति दिक् ॥ ३७ ॥

ङमो ह्रस्वादित्यत्र प्राचीननवीनयोः को विरोधः ? ॥ ३८ ॥

अत्र ङम इति पञ्चमीबलादचीति षष्ठ्यर्थे सप्तमी लाघवार्थम्। अत एव भाष्ये ङम उत्तरस्याच इत्युक्तम् । पदस्येत्यपि पञ्चम्या विपरिणम्यते ङम् तु ह्रत्वादिति विशेषणसम्बन्धमनुभूय पदविशेषणत्वेन तदन्तपर इति मूलकाराशयः। भाष्यविदस्तु—विभक्तिव्यत्ययकल्पने गौरवात्पदावयवङमः परस्येत्येवार्थः । दण्डिनेत्यादौ ङमुट् तु नाशङ्क्यः; उञि च पदे इत्यतः पदे इत्यनुवृत्त्याऽजादेः पदस्येत्यर्थात् । पदस्येत्यस्यानुवृत्त्या तु नोक्तार्थलाभः, विशेषणविशेष्ययोः सप्तम्यन्तत्वे एव तदादिविधिरिति नियमात् मूलोक्तार्थस्वीकारेऽपि परमदण्डिनावित्यादावेतद्वारणाय उक्तार्थस्यावश्यकत्वात्, अन्तर्वर्तिविभक्त्या दण्डिन्नित्यस्य पदत्वात् । उत्तरपदत्वे चेति निषेधस्तु नाशङ्क्यः, माषकुम्भवापेनेत्यादौ पदव्यवायेऽपीति निषेधसिद्धये उत्तरपदस्य यत्र कार्यित्वन्तत्र तत्प्रवृत्तिस्वीकारात् । न च—परमदण्डिप्रिय इत्यत्र नलोपसिद्धये मध्यमपदत्वाक्रान्तस्यैवोत्तरपदस्य ग्रहणेन नेदं कार्यित्वनिवेशफलमिति वाच्यम्, त्रिगवधन्येनेत्यत्र पदव्यवायेऽपीति निषेधसिद्धये कार्यित्वनिवेशस्यावश्यकत्वादित्याहुरिति दिक् ॥ ३८ ॥

इणः ष इत्यस्य प्रयोजनमुपपाद्य नागेशविलासं विशद्य लिख ॥३९॥

ननु—इदुदुपधस्येत्येव सिद्धे सूत्रमिदं व्यर्थमिति चेन्न; सर्पिष्पाशमित्यादावस्यासिद्धत्वेन सत्वापत्तेः । गीष्पाशं दोष्कल्पमित्यत्र षत्वार्थमस्यावश्यकत्वाच्च। अत्रानव्ययस्येत्यादिसर्वं सम्बध्यते, तेनोच्चैः कल्पं दोः पश्य गीः काम्यतीत्यत्र षत्वन्न । अत एवात्र प्रकरणे सर्वत्र सत्वमेव विधेयम् । इण उत्तरस्य विसर्गस्थानिकसस्यानेन षत्वमिति भाष्योक्तपक्षान्तरं संगच्छते । परन्त्वयं पक्षोऽसङ्गतः, उत्तरसत्वस्यासिद्धत्वेन निष्कृतमित्यादौ षत्वासिद्धेः । प्रकरणे प्रकरणमसिद्धन्न योगे योग इति पक्षस्तु नास्त्येव प्रमाणाभावादित्यादिनागेशविलास इति दिक् ॥ ३९ ॥

इदुदुपधस्येत्यत्र प्राच्यनव्यमतविचारो मनोरमाशब्दरत्नोक्तदिशाऽवश्यमवगन्तव्यः ॥ ४० ॥

द्विस्त्रिश्चतुरिति सूत्रे का विप्रतिपत्तिर्नागेशस्य ॥ ४१ ॥

एषां सुजन्ततया सुजन्तान्तस्य पदस्येत्यर्थकसुच इत्येव सूत्रयितुमुचितम्। ननु—कृत्वोर्थे विद्यमानस्य पदस्येदुदुपधस्य यो विसर्ग इत्यर्थके कृत्वोर्थ इत्येव सिद्धे द्विस्त्रिश्चतुरिति व्यर्थमिति चेन्न, चतुष्करोतीत्यत्रास्यासिद्धत्वेन इदुदुपधस्येति नित्यषत्वापत्तेः। प्रकरणे प्रकरणमसिद्धं न योगे योग इति पक्षस्तु भाष्यादिदूषित एव। न च इदुदुपधस्य सस्य यो विसर्ग इति भाष्यसम्मतेऽर्थे चतुष्कपाल इत्यादौ कथं षत्वमिति वाच्यम्, विसर्गस्यालि पाठाभावेनोपधात्वासम्भवेऽपि विसर्गस्थानिनिमित्तमुपधात्वं गृहीत्वा षत्वप्राप्तिरित्यत्रैव भाष्यतात्पर्येणादोषात्। अत एव चतुष्पाद्भ्यो ढक् चतुष्पञ्चाशदित्यत्र षत्वसिद्धिः। कृत्वोर्थ इति न विसर्गविशेषणं चतुःशब्देऽसम्भवात्, किन्तु द्विरादीनामेव। न च सुच इति न्यासे चतुष्पञ्चाशदिति सुजर्थबहुव्रीहौ सुचोऽभावेन कथं षत्वमिति वाच्यम्, इदुदुपधस्य सुजर्थे वा अप्रत्ययस्येत्यादिन्यासे तात्पर्यमित्यदोषादिति दिक्॥ ४१ ॥

इसुसोः सामर्थ्ये अत्र किमुक्तं नागेशेनेति लिख ॥ ४२ ॥

अत्रेसुसोः प्रातिपदिकावयवयोरेव ग्रहणन्तेन पेयुः काष्ठैः सक्ष्युः पाकः कविभिः कृतमित्यत्र न। इसुसन्तपदावयवविसर्गस्येत्यर्थः। अनुत्तरपदस्थस्येति निषेधेन क्वचिद्विशेष्यान्तरसत्त्वेऽपि तदादिविशेष्यकतदन्तविधिर्भवतीति ज्ञापनादिसुसन्ततदाद्यन्तपदावयवस्येत्यर्थात्परमसर्पिष्करोतीत्यादौ षत्वसिद्धिः। सापेक्षसमर्थवदिति निषेधस्यैकार्थीभावसामर्थ्यविषयकत्वेन ब्राह्मणस्य सर्पिष्करोतीत्यादौ षत्वसिद्धिः। व्यपेक्षालक्षणसामर्थ्यविषयकस्य अधात्वभिहितं समानाधिकरणसमर्थवदित्यस्य धातुसहचरितप्रत्ययाभिहितार्थेन समानाधिकरणसमर्थवत्त्वेत्यर्थात् सर्पिः कालकमित्यत्र षत्वन्न, सर्पिष्पीयत इत्यत्र च षत्वसिद्धिः। यदा तु सर्पिरादिकमव्युत्पन्नं प्रातिपदिकं पाणिनेश्चाव्युत्पत्तिपक्ष एवाभिमतस्तदा—इदुदुपधस्येति नित्ये प्राप्तेऽनेन विकल्पः। नित्यं समास इति सूत्रन्तु अनुत्तरपदस्थस्य प्रतिषेधार्थ-

मेव। अत्र पक्षे—सर्पिषा यजुषेत्यादौ षत्वन्तु क्वचिदन्यदेवेत्यर्थकाद् बहुलग्रहणादिति दिक् ॥ ४२ ॥

अप्लुतादग्रहणसामर्थ्यादसिद्धत्वमात्रबाधे को दोष इति सुस्पष्टं प्रतिपाद्यताम् ॥ ४३ ॥

पयस्यटति पयो ददातीत्यर्थे आगच्छ हे पयोऽ३ट्, आगच्छ हे पयोऽ३देत्यत्र वाक्यस्य टेरित्यद्शब्दाकारस्य रेफदकारसंयोगपरत्वेनादशब्दाकारस्य गुरुत्वाद् गुरोरनृत इति प्लुतः। अत्र एकपदस्थवर्णद्वयसापेक्षमन्तरङ्गमुत्वं प्रति वाक्यसम्पादकपदान्तरसापेक्षप्लुतस्यासिद्धत्वादुत्वे प्लुतसिद्धिः। अन्यथा प्लुतस्योत्वदृष्ट्याऽसिद्धत्वात्परत्वाद् प्लुते आद्येऽप्लुतपरत्वाभावादन्त्येऽप्लुतात्परत्वाभावादुत्वं न स्यात्। न च नवीनमते त्रिपाद्यां बहिरङ्गपरिभाषाया अप्रवृत्तौ सर्वमिदमयुक्तमिति वाच्यम्, अन्तरङ्गशास्त्रत्वमस्यां लिङ्गमिति परिभाषादृष्ट्या बहिरङ्गस्यासिद्धत्वेऽपि परिभाषाप्रवृत्तौ बाधकाभावात्। अप्लुतादिति विशेषणेन येन नाप्राप्तिन्यायेन प्रत्यक्षत्वेन च पूर्वत्रासिद्धमित्यसिद्धत्वस्यैव बाधो न तु परिभाषासिद्धत्वस्येति दिक् ॥ ४३ ॥

हलि सर्वेषामित्यत्र कः प्रपञ्चो ग्रन्थकारस्य ॥ ४४ ॥

अनेनौकारात्परस्य लघूच्चारणस्यैव लोपः। अलघूच्चारणस्य त्वोत इत्येव सिद्धेः। अवर्णपूर्वं तूभयोरपि लोपोऽनेनैव। न चापूर्वालघुप्रयत्नेऽस्यासिद्धत्वाल्लोपः शाकल्यस्येति लोपः स्यादिति वाच्यम्, तथासति व्योर्लघ्विति सूत्रेऽचीति करणेन हलि विधानाभावेनैव सिद्धावस्य सूत्रस्य वैयर्थ्यापत्त्या तद्बाधात्। न च—व्योरित्यर्थाधिकारादलघुप्रयत्नयोरेवाऽनेन लोप इति वाच्यम्, विकल्पस्य विच्छिन्नत्वेन नित्यत्वसिद्धया ऋषिमात्रग्रहणार्थस्य सर्वेषामित्यस्य वैयर्थ्यापत्तेः। अत्र व्यपरे इत्यादिनिर्देशेन फलाभावेन वृत्त्यादिसम्मतत्वेन च यकार एवानुवर्त्तते न वकार इति दिक् ॥ ४४ ॥

विप्रतिषेधसूत्रव्याख्याने का रीतिर्नागेशस्य ॥ ४५ ॥

विप्रतिपूर्वात्सेधतेर्घञि परस्परविरोधार्थो विप्रतिषेधशब्दः। परनित्यान्तरङ्गापवादानामित्यत्र नित्यस्यावश्यकतयाऽन्तरङ्गस्य ज्ञापका-

दिनाऽपवादस्य वचनप्रामाण्याद्बाधकत्वे स्थिते तद्भिन्नोऽस्य विषय इत्याशयेन तुल्यबलविरोध इति मूले उक्तम्। तुल्यबलविरोधस्तु द्वयोः शास्त्रयोः क्वचिल्लब्धावकाशयोरेकत्र प्रयोगे युगपदसम्भवि स्वकार्यसमर्पणरूपः। एकस्य कार्यद्वययोगकृतेऽसम्भव एव प्रायोऽस्य प्रवृत्तिः। यथा वृक्षेभ्यः इत्यत्र दीर्घैत्वयोर्युगपत्प्रवृत्तौ स्वस्वनिमित्तानन्तर्यासम्भवः। क्वचित्केवलासम्भवेऽपि यथा शिष्टादित्यत्र तातङ्शाभावयोर्युगपत्प्रवृत्तौ स्वस्वनिमित्तानन्तर्यासम्भव इति परत्वात्तातङि सकृद्गतिन्यायेन न शादेशः। द्वयोः कार्ययोर्युगपदसम्भवात्पर्यायेण तृजादिवच्छास्त्रद्वयप्रसङ्गे परमेवेति नियमार्थमिदम्। तेन तिसृणामित्यत्र परत्वात्तिस्रादेशे पुनः स्थानिवत्वेन त्रयादेशो न। तदेतत्पठ्यते सकृद्गताविं यादि। यद्वा तुल्यबलयोरेकः प्रेष्यो भवति स तयोः पर्यायेण कार्यं करोति यदा तमुभौ युगपत्प्रेषयतो नाना दिक्षु च कार्यं भवतस्तदोभयोर्न करोति यौगपद्यासम्भवात् तथा लक्ष्यप्रेष्ययोः शास्त्रयोः क्वचिल्लक्ष्ये यौगपद्यासंभवादप्रतिपत्तौ प्राप्तायां परं भवतीति विध्यर्थमिदम्। तत्र कृते यदि पूर्वस्यापि निमित्तमस्ति तदा तदपि भवत्येव। यथा भिन्धीत्यत्र परत्वात्तातङि पुनर्धिर्भवति तदेतत्पठ्यते पुनः प्रसङ्गविज्ञानमिति। कार्ये परत्वञ्च परशास्त्रविहितत्वम्। कार्यकालपक्षेऽपि अष्टाध्यायीपाठकृतमेवैत प्रवृत्तौ नियामकमिति भाष्ये स्पष्टम्। संज्ञानां स्वदेशे वाक्यार्थबोधाभावात्तद्विषये विधिदेशीयपरत्वम्, अत एव अयादिभ्यः परैव प्रगृह्यसंज्ञेति भाष्ये उक्तम्। परिभाषाणान्तु कार्यकालपक्षेऽपि स्वदेशेऽर्थबोधोऽस्त्येवेति तद्विषये स्वदेशीयपरत्वमेवैतत्प्रवृत्तौ बीजम्। त्रिपाद्यां कार्यकालपक्षेऽप्यस्याप्रवृत्तिः पूर्वदृष्ट्या परावस्थानाभावात्। एवं च यथोद्देशैवैवेति भाष्यादौ स्पष्टम्। अत्रत्य विस्तरविचारोऽन्यत्र प्रदर्शितरीत्याऽवगन्तव्य इति दिक्॥ ४५॥

॥ शिवम्भूयात्॥

अर्थवत्त्वविचारे प्राच्यनव्ययोर्मतं सयुक्तिकमुपपादय ॥ १ ॥

पूर्वसूत्रे वृत्तिमत्त्वमर्थवत्त्वम्, उत्तरसूत्रे संज्ञाविधाविति निषेधमाशङ्क्य अर्थवदिति वर्त्तते तत्सामर्थ्यात्तदन्तविधिः। कृत्तद्धितान्तश्चैवार्थवन्न केवलाः कृतस्तद्धिता वेति भाष्येण एकार्थीभावेन लौकिकप्रयोगे प्रसिद्धत्वन्तत्त्वम्। केवलप्रत्ययस्य संज्ञावारणाय प्रत्ययपर्युदास इति प्राचीनाः।

नव्यास्तु—उभयत्र एतत्संज्ञाफलभूतविभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वन्तत्त्वम्, अर्थवद्ग्रहणानुवृत्तिसामर्थ्यादिति भाष्येण पूर्वसूत्रे यादृशार्थवत्त्वग्रहोऽनुवृत्तिसामर्थ्यादत्रापि तादृशार्थवत्त्वस्यैव ग्रहः, शास्त्रीयार्थग्रहणे तु तदनुवृत्तिर्व्यर्था स्यादिति सूचितत्वात्, अन्यथा तत्सामर्थ्यादित्येव वदेत्। एवञ्च प्रत्ययपर्युदासोऽपि विफलः, अहन् काण्डे इत्यादिसिद्धये प्रत्ययान्तपर्युदासः। अतएव भाष्ये "नहि लोके केवलेन प्रत्ययेनार्थो गम्यते, केन तर्हि सप्रकृतिकेनेत्युक्तम्, धात्वादीनां विशुद्धानां लौकिकोऽर्थो न विद्यते कृत्तद्धितानामर्थश्च केवलानामलौकिक इत्यादिहरिकारिका च संगच्छते। अतएव च तद्धितग्रहणनियमेन ह्रस्वो नपुंसके यत्तस्येति न्यासेन फलाभावेन च काण्डे इत्यादिसिद्धौ भाष्योक्तप्रत्ययान्तपर्युदासप्रत्याख्याने पञ्चनावप्रिय इत्यत्र पञ्चनावेत्यस्य न प्रातिपदिकत्वम्। अर्थवद्ग्रहणस्य दशदाडिमानीति निरर्थकसमुदायो व्यावृत्तिरित्याद्याहुः। तन्निभं रमा एधांचक्रे इत्यादावनेकक्लिष्टकल्पनापेक्षया उभयसूत्रे वृत्तिविशिष्टत्वन्तत्त्वम् वै० स्वपर्याप्त्यधिकरणत्व-स्वप्रयोज्यबोधजनकत्वप्रकारकवक्तृतात्पर्यीयविशेष्यतापर्याप्त्यधिकरणत्वोभयसम्बन्धेनेत्येकमेव प्राचीना अप्याहुरित्यन्यत्र विस्तर इति दिक् ॥ २ ॥

समासग्रहणकृतनियमे विशेषः सफलमुपपादनीयः ॥ २ ॥

प्रत्ययग्रहणपरिभाषया राजन् ङस् पुरुष सु इति समुदायस्य प्रत्ययान्ततदादिभिन्नत्वेन पूर्वसूत्रेणैव सिद्धे व्यर्थं सत्समासग्रहणं पूर्वभागपदघटितसंघातातिरिक्तत्वेन सङ्कोचयति अयमेव नियमः। मूलोक्तन्तु नियमस्य सजातीयविषयत्वात्साजात्यप्रदर्शनम्, अतएव स्वांशे

चारितार्थ्यम्, अतएवार्थवत्समुदायानां समासग्रहणं नियमार्थमित्युक्तं भाष्ये; तत्र तन्त्रेण अर्थवतां यः समुदायोऽर्थवाँश्चेत्यर्थः, अतएव सुबन्तानामिति भाष्यप्रतीकमादाय अनेन भेदसंसर्गद्वारकार्थवन्त उपलब्धयन्त इति कैयटेनोक्तम् । मूले पदशब्देन स्वातन्त्र्येण प्रयोगार्हमर्थवद्गृह्यते, उक्तभाष्यानुरोधात् । तेन गवित्ययमाहेत्यादौ गो इत्यादीनां सुबन्तत्वाभावेऽपि उक्तनियमाक्रान्ततया न समुदायस्य प्रातिपदिकत्वम् । वहुपटव इत्यादौ प्रातिपदिकत्वाय स्वातन्त्र्येणेति । एवं पूर्वाक्षिप्तपरोपि स्वातन्त्र्येण प्रयोगार्हार्थवानेव गृह्यते इति पुत्रकाम्येत्यादौ न दोषः । समुदायार्थवतो ग्रहणादेव प्रत्ययग्रहणपरिभाषाया देवदत्तो गार्ग्येति समुदायस्य तद्धितान्तत्वेन प्राप्तप्रातिपदिकसंज्ञाया अभावः फलमिति भाष्यं संगच्छते। अन्यथा नियमेनैव तत्र तदप्राप्त्या भाष्यासंगतिः स्यात्, अतएव वृषण्वसुरिति समासे पूर्वभागस्य भत्वात्पूर्वो भागः पदमित्ययुक्तमित्यपास्तम् । नच—शशशृङ्गादिपदानामर्थवत्वाभावेन तत्र संज्ञार्थं समासग्रहणमिति वाच्यम्, स्वप्राद्यनुरोधेन वौद्धार्थस्यावश्यमङ्गीकरणीयतया तदादायैवार्थवत्त्वेन सिद्धेरित्याद्यन्यत्र स्पष्टमिति दिक् ॥ २ ॥

प्रत्यय इति महासंज्ञायाः प्रयोजनं विशद्य लिख ॥ ३ ॥

प्रत्यय इति महासंज्ञया स्वस्वप्रकृत्यन्यतरार्थप्रत्ययकस्यैवेतत्संज्ञाविधानाद्विकारागमादेशानां न संज्ञा । केचित्तु एतेषां देशांशे निराकांक्षतया परश्चेत्यस्यानुपस्थितौ तत्संनियोगशिष्टप्रत्ययसंज्ञाया अप्यप्रवृत्तिरिति प्राहुस्तन्न, भ्रमकज्वहुष्वप्रवृत्त्यापत्तेः । लविषीयेत्यत्र प्रत्ययसंज्ञासन्नियोगेन इटो विधीयमानस्याद्युदात्तत्वं सीयुट एव स्यादत आगमानुदात्तत्वं वक्तव्यमिति भाष्याद्यसङ्गतेश्च । तव लस्थानिकत्वेन देशांशे निराकाङ्क्षत्वेन परश्चेत्यस्याप्रवृत्तौ प्रत्यय इत्यस्याप्यप्राप्त्या तत्सन्नियोगकथनस्यासम्भवत्वादिति दिक् ॥ ३ ॥

परश्चेत्यस्य फलं युक्तियुक्तं लिख ॥ ४ ॥

सर्वत्र प्रत्ययविधौ अपादानत्वासम्भवेन दिग्योगलक्षणा पञ्चमी, तच्च परः पूर्वो वेत्यनियमेनाध्याहारे प्रसङ्गः पर एवेति नियमार्थमिदम्,

तत्र च तस्मादिति परिभाषा उत्तरांशविकला प्रवर्त्तत इत्यव्यवहिता एव प्रत्ययाः। नच—षष्ठ्यंशविकला तस्मादिति परिभाषा प्रत्ययविधौ प्रवर्त्तमानाऽस्तु कृतमनेनेति वाच्यम्, प्रत्ययः परो भवत्येवेति नियमार्थत्वात्। तेन प्रकृत्यर्थमात्रविवक्षायां केवलप्रकृतेः पचित्यादेः प्रयोगो न, अत एव न केवलाप्रकृतिः प्रयोक्तव्येति सिद्धम्, प्रकृतिविशेषोद्देशेनैव प्रत्ययानां विधानान्नापि केवलप्रत्यय इति तु न्यायसिद्धम्, प्रत्ययविधावुद्देश्यतावच्छेदकाक्रान्तत्वरूपस्य प्रकृतित्वस्य अभेदानुकरणेऽसत्त्वेन गवित्ययमाहेत्यादौ न दोषः। न केवलाप्रकृतिरित्यादेः शास्त्राबोधितान्यतरप्रयोगविषय एव प्रवृत्तिरिति लिडियानित्यादौ न दोषः। एतत्फलितमेव अपदं न प्रयुञ्जीतेति तत्रापदमित्यस्यापरिनिष्ठितमित्यर्थः। परिनिष्ठितत्वञ्च अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वमिति दिक्॥ ४॥

ङ्याप्प्रातिपदिकादित्यस्य सार्थक्यं विशद्य अत्यन्तस्वार्थिकानां सुबुत्पत्तेः पूर्वमुत्पत्तौ प्रमाणं फलञ्च लिख॥ ५॥

रमा गौरीत्यादौ लिङ्गविशिष्टपरिभाषयैव सिद्धे ङ्याब्ग्रहणं ङ्यान्तात्तद्धितोत्पत्तिर्यथा स्यान्ङ्याभ्यां प्राङ्माभूदिति बोधयति; तेन आर्यिका-आर्यका, लोहितिका-लोहितिकेति सिद्धिः, अन्यथा ङ्यापः पूर्वमन्तरङ्गत्वात्तद्धिते उक्तरूपासिद्धिः। अत्र ङ्याब्ग्रहणं स्त्रीप्रत्ययमात्रोपलक्षकम्। तेन ब्रह्मबन्धूतरा युवतितरेत्यादिसिद्धति। वयोवाचिनां वैकल्पिकजातिकार्यस्य भाष्यसिद्धतया जातेश्चेति निषेधान्नपुंवत्त्वम्। तद्धितपदञ्च समासान्ततिप्रत्ययाद्यतिरिक्तपरं व्याख्यानात्, तेन यूनीतिः बहुगोमतिकेति न। व्याख्यानादेव च स्त्रीप्रत्ययेषु अत्यन्तस्वार्थिकानारभ्य तद्धितेषु च ङ्याब्ग्रहणासम्बन्ध एव। अतएव लोहिनिकेत्येतत्सिद्धये लोहितालिङ्गबाधनं वेति वार्तिकं संगच्छते॥ १॥

अत्यन्तस्वार्थिकानां सुबुत्पत्तेः पूर्वमुत्पत्तिरिति सर्वस्य द्वे इति सूत्रस्थपुंयोगादिति सूत्रस्थभाष्याभ्यां लभ्यते, आद्ये पदस्येत्यस्य प्रयोजनं द्विपदिकेत्यादौ द्वित्वसंख्यायुक्तपदार्थस्य वीप्सितत्वाद्वीप्सायामेकत्वसंख्याया बाधात्समासाद्विभक्त्यभावेन पदत्वाभावात्प्राक त-

द्धितोत्पत्तेर्द्विर्वचनाभाव इत्युक्तम् । अन्त्ये सांकूटिनमित्यत्र अभिविधौ भाव इनुणिति इनुणि कूटिनशब्दादणविभक्त्योः प्राप्तयोः स्वार्थिकत्वेनान्तरङ्गत्वादणि कूटिन्नित्यस्यैव वृद्धिः स्यादित्युक्तम्, तस्यापि सुवन्तादुत्पत्तौ तु पूर्वं सुपि इनुणन्तत्वरूपाधिकसापेक्षत्वेन बहिरङ्गतयाऽणः पूर्वं समासे विशिष्टादणि रूपसिद्धौ भाष्यासंगतिः । प्राक्सुबुत्पत्तेः समासे तु उक्तरीत्यैवान्तरङ्गत्वात्पूर्वं समासे ततो विशिष्टादणि सांकूटिन सिद्धिरिति दिक् ॥ २ ॥

ननु—संख्यायास्तिङोक्तत्वात्तिङन्तेभ्यः तिङामपवादत्वाद्धातुभ्यश्च सुपोऽप्राप्त्या परश्चेत्यनेन प्रकृतेराक्षेपात्प्रातिपदिकाधिकारो व्यर्थः; तिङन्तादिभ्यस्तद्धितव्यावृत्तिस्तु तस्येत्यादिसमर्थविभक्तिनिर्देशात्तमब्विधौ तिङश्चेति ज्ञापकाच्च सिद्धेति चेन्न, स्वार्थद्रव्यलिङ्गसंख्याकारकप्रयुक्तकार्यैः संस्कृतस्य बहिर्भूतापत्यादियोग इति भाष्येण सार्थकतद्धितानां सुवन्तादुत्पत्या अनुदात्तादेरञिति सूत्रस्य अनुदात्तादिसुबन्तादित्यर्थापत्तौ सर्वस्य विकारः सार्व इत्यत्राजनापत्तेः, सर्वस्य सुपीत्यनेनाद्युदात्तत्वात् अधिकारसामर्थ्यात्तु अनुदात्तादिप्रातिपदिकादित्यर्थे सर्वशब्दस्योञ्छादिपाठेनान्तोदात्तत्वान्न दोषः । नचान्तरङ्गानपीति न्यायेन पूर्वमाद्युदात्तत्वाप्राप्तिरिति वाच्यम्, सौवरीणां सप्तमीनां तदन्तसप्तमीत्वात्प्रत्यये परतः पूर्वस्य कार्यत्वाभावेन न लुमतेत्यस्याप्राप्तौ प्रत्ययलक्षणेन सुबन्तत्वस्य सुलभतया लुकोऽन्तरङ्गनिमित्तविनाशकत्वाभावेन उक्तन्यायाप्रवृत्तिरितिरीत्या शेखरे प्रपञ्चित इति दिक् ॥ ५ ॥

द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनमित्यत्र कः प्रकारो ग्रन्थकर्तुरिति संक्षेपतो लिख ॥ ६ ॥

स्वादिविधायकसूत्रेणैव सिद्धे एतत्सूत्रद्वयं कर्मणि द्वितीयेत्यादिकञ्चैकवाक्यतया नियमार्थमिति भाष्यादौ स्पष्टम्, अत्र च द्व्यादिशब्दो न संख्येयपरो बहुवचनापत्तेः, किन्तु संख्यापरः । अतएव द्वित्वैकत्वयोरिति व्याख्यातम् । लोके तु आदशतः संख्या संख्येये इति कोशादिना बोधनात् क्वचित्संख्यापरत्वेऽपि संख्येयगतसंख्यारोपेण साधुत्वम्, द्विबह्वोर्द्विवचनबहुवचने एकवचनमिति न्यासे एकवचनमिति व्यर्थ

सदेकत्वाभावेऽप्येतद्भवतीति ज्ञापयति, तेन अव्ययादिभ्य एकवचनसिद्धिरिति भाष्ये स्पष्टम्। बहुशब्दश्च त्रित्वादिपरार्धान्तसंख्याव्यापकधर्मविशेषस्य बहुत्वस्य बोधकस्तेन वैपुल्यवाचिनो न ग्रहणम्, बहुवचनन्तु आश्रयगतं बहुत्वं धर्मे आरोप्य कृतम्। यथा दारादिशब्देऽवयवगतबहुत्वस्यावयविन्यारोप्य बहुवचनम्, यत्र च नारोपस्तत्र, न यथा भर्तृदारयोः अस्तेजसोरित्यादौ। अन्वर्थसंज्ञयैव सिद्धे सूत्रद्वयं स्पष्टार्थमिति संक्षेपः ॥ ६ ॥

सरूपसूत्रं नागेशरीत्या संक्षेपतो व्याख्यायताम् ॥ ७ ॥

एकविभक्तौ परतो येषां सारूप्यं दृष्टन्तदारब्धकसमुदायघटक एकः शिष्यत इति सरलार्थः। अत्र च प्रातिपदिकैकशेषे मात्रमात्रोः प्रतिषेधो वक्तव्य इति वार्त्तिकव्याख्यानभाष्यसन्दर्भेण वृद्धोयूनेति सूत्रादेवकारोऽपकृष्यते तेन सरूपाण्येवेत्यर्थाज्ज्ञननीवाचिपरिच्छेत्रवाचिनोर्मात्रशब्दयोर्नैकशेषः। विभक्तिः सारूप्ये उपलक्षणमिति भाष्योक्त्या एकस्यामपि विभक्तौ यानि विरूपाणि नेत्यर्थबोधनायैकग्रहणम्। नच-यानि सरूपाण्येवेत्यर्थेनैव सिद्धे एकविभक्ताविति व्यर्थमिति वाच्यम्, हरिणस्त्रीवाचकहरिणीशब्दस्य हरितवर्णविशिष्टस्त्रीवाचकहरिणीशब्दस्य चैकशेषापत्तेः पुंवद्भावेन तद्धितादौ वैरूप्यात्। अयञ्चानैमित्तिकत्वेनान्तरङ्गत्वाद्विभक्त्युत्पत्तेः पूर्वमेवेति एतद्विषये द्वन्द्वाप्राप्तिरेवेति विभक्त्यन्तानामेकशेष इत्यादिपक्षा आपाततो रमणीया एव। नच तन्त्रेणैव सिद्धेरिदं व्यर्थम्, तन्त्रं द्वेधा—शब्दतन्त्रमर्थतन्त्रञ्चेति। तन्त्र कारणन्तु शब्दानान्तुल्यरूपत्वम्। यथा—अक्षा भज्यन्तां भुज्यन्तान्दीव्यन्तामित्यत्रैकस्य सर्वत्रान्वयः। शब्दस्य पर्यायपरिवृत्त्यसहत्वे आद्यं तत्सहत्वेऽन्त्यम्। यथा—अक्षाः पटा इत्यादाविति वाच्यम्, सरूपाणामेकशेष एवेति नियमार्थत्वात्। तेनप्रत्ययशब्दनिवेश इति भाष्येण कदाचिद्रामरामरामा इति प्राप्तद्वन्द्वस्य निवृत्तिः फलम्। इदं च सूत्रं सहविवक्षायामेव प्रवर्त्तते अनवकाश एकशेषो द्वन्द्वं वाधिष्यत इति भाष्यात्। तेन सारवसारवोर्मिज इति कर्मधारये एकशेषो न। असहविवक्षायां विभक्त्यन्ततन्त्रेण ब्राह्मणाभ्यांकृतं देहि

पयोजरयतीत्यादिकन्तु नीलोत्पलस्पर्द्धिनी नैत्रे तनुर्वा हरेरितिवत् विद्वन्मानसहंसेतिवच्चेष्टमेवेति। भाष्ये तु अर्थौ अर्थौ प्रति अर्थानर्थान्प्रति च यत्तदपि प्रत्यर्थमेवेत्याश्रित्य सूत्रमिदं प्रत्याख्यातम् शब्दशक्तिस्वभावादनेकघटादिपदानां साहित्ये वृत्तिरेव नेति भाष्याशयः। न ब्राह्मणं हन्यादित्यादौ तु जातिपक्षेणैव निर्वाहः। समाहारद्वन्द्वविषये तु नैकशेषः एकवच्चास्यान्यतरस्यामित्यनेन एकशेषपदानां तत्र वृत्त्यभावबोधनात्। एकादिदशान्तसंख्यावाचिनां द्वन्द्वैकशेषावनभिधानान्न भवतः। स्वरभिन्नानान्तु यस्योत्तरस्वरविधिरिति वचनेनैव सिद्धिरिति दिक् ॥ ७ ॥

सम्बुद्ध्याक्षिप्तस्येत्यत्र प्राच्य-नव्ययोर्मतं युक्तियुक्तं लिख ॥ ८ ॥

यथा पीनोऽयन्देवदत्तो दिवा न भुंक्ते इत्यत्र पीनत्वानुपपत्या रात्रिभोजनानुमितिस्तथाऽत्र अङ्गम्विनाप्रत्ययानुपपत्याङ्गानुमितिस्तस्य तत्रैवान्वयस्य युक्तत्वेऽपि अव्याप्त्यतिव्याप्तिदोषभियाऽन्यत्राप्यन्वय इति प्राञ्चः।

नवीनास्तु सम्बुद्धेः प्रत्ययत्वेन प्रत्ययग्रहणपरिभाषया तदादेरुपस्थितिः। अनुमानरूपाक्षेपस्तु न युक्तः फलाभावात्, प्रत्ययोत्पत्तावङ्गापेक्षत्वेऽपि शास्त्रे तदापेक्षत्वे मानाभावाच्च। अतएव अङ्गस्य स्थाने प्रत्यय इत्यधिकारे प्राकरोदित्यादावुपसर्गात्पूर्वमडादिः स्यादित्याशङ्कायाः प्रत्ययग्रहणपरिभाषयैव समाधानं भाष्ये कृतन्नत्वङ्गात्तेपेणेत्याहुः ॥ ८ ॥

आदर्शेनेत्यत्र णत्ववारणाय दर्शितारीतिः प्रदर्शनीया ॥ ९ ॥

णत्वेऽन्यव्यवाये प्रतिषेधो वक्तव्यो नवाऽन्येन व्यवहितत्वादिति भाष्येण रषाभ्यामिति पंचमीश्रुत्योपस्थिततस्मादित्यव्यवहितांश एतत्सूत्रारम्भसामर्थ्यादडादिभिन्नवर्णकर्तृकव्यवधानशून्यपर इति आदर्शेनेत्यत्र णत्वन्न। एतदुत्तरमटाव्यवायसत्वात्प्राप्तेत्येव। अटैव व्यवाय इत्यर्थादित्यादिभाष्यन्तु वक्ष्यमाणयुक्त्या एकदेशिनोरुक्तिप्रत्युक्तिपरमेव। चुटुतुलशर्व्यवायेनेतिनिषेधेनैव सिद्धे अट्कुप्वाङित्युक्त्या उक्तार्थलाभ इति प्रतियोगिज्ञानसापेक्षनिषेधबोधकगुरुन्यासं वदता पूर्वोक्तैरेकदेश्युक्तिप्रत्युक्तित्वमिति सूचितमिति वार्त्तिकमतम्। भाष्ये तु व्यवाये

इति योगं विभज्य तेनैव सिद्धे अटकुप्वाङ्नुम्भिरिति व्यर्थं सत् आक्षर-समाम्नायिकैर्व्यवाये चेदेतैरेवेति नियमयतीत्युक्त्वा मातॄणामित्याद्यर्थस्य ऋवर्णान्तस्य णत्वमित्यस्य प्रत्याख्यानं कृतम्। एवं चादर्शनेत्यत्र प्राप्तिरेव नेति नागेशाशयः। अत्रत्यवागजालन्तु अन्यत्र दर्शितरीत्याऽवगन्तव्यमिति दिक् ॥ ९ ॥

नामीत्यत्रामीतिन्यासो युक्तियुक्तो नवेति लिख ॥ १० ॥

ननु—रामाणामित्यादौ नित्यत्वात्पूर्वन्दीर्घेऽपि ह्रस्वनद्याप इत्यत्र ह्रस्वग्रहणसामर्थ्यात्साम्प्रतिकाभावे भूतपूर्वगतिरिति ज्ञापनेन भूतपूर्व-ह्रस्वान्तत्वमादाय नुट्सिद्धौ नामीत्यत्र नकारोच्चारणं व्यर्थम्। नच—नृणामित्यत्र ह्रस्वग्रहणं चरितार्थमिति वाच्यम्, नह्येकमुदाहरणं योगारम्भं प्रयोजयतीति भाष्येण नृनद्याप इत्येव सिद्धेः। षट्चतुर्भ्यश्चेत्यत्र त्रेरित्यनुवृत्त्या तिसृणामिति सिद्धेः। नच—नृशब्दस्य ऋशब्देन समासे तत आमि नृनद्याप इति न्यासे नुट् स्यादिति वाच्यम्, पञ्चमीसमासे स्थानिवत्त्वेनादोषात्, नह्येकमुदाहरणमित्यादिभाष्येण तादृशप्रयोगस्यानभिधानाच्च। नच—षट्चतुर्भ्यश्चेत्यस्य बहुवचननिर्देशेन गौणेऽप्रवृत्तौ प्रियचतसृणामित्यत्र ह्रस्वग्रहणं चरितार्थमिति वाच्यम्, अस्थिदधितिसृभ्योजसित्यादाविव बहुवचनस्य लाघवार्थत्वेन गौणेऽप्रवृत्तौ मानाभावात्प्रकृतभाष्यविरोधाच्च। नचाङ्गाधिकारे पञ्चम्या यदुच्यते गृह्यमाणविभक्तेस्तद्भवतीतिभाष्यात् षडादिभ्यो विहितस्यैवामोनुडिति गौणेऽप्रवृत्तिरिति वाच्यम्, नामीति सूत्रोक्तभाष्येण षडादिभ्यः परस्याङ्गसंज्ञानिमित्तस्यामोनुडित्यर्थेनादोषात्। नच-पदान्तामित्यादौ भूतपूर्वह्रस्वान्तत्वमादाय नुट् स्यादिति वाच्यम्, ह्रस्वत्वं नाम मात्राकालिकाचत्वं, तत्र मात्राकालिकत्वांशे एव भूतपूर्वगत्याश्रयणन्तु विशेष्यभूताच्त्वांशेऽपीत्यदोषादितिचेत्सत्यम्, नोपधाया इत्युत्तरार्थत्वात् अतएव चर्मणामित्यादौ दीर्घाभाव इति संक्षेपः ॥ १० ॥

सर्वादिगणे उभशब्दपाठो युक्तियुक्तं समर्थनीयः ॥ ११ ॥

ननु—सर्वादिप्रयुक्तकार्याणां द्विवचनेऽभावाद्द्विवचनान्तोभशब्दपाठः सर्वादिगणे व्यर्थ इति चेन्न, उभकावित्यत्राकच्सिद्धये आवश्य-

कत्वात्। नच—प्रत्ययस्वरेण चित्स्वरेण वा अन्तोदात्तत्वस्यैव सत्त्वेन काकचोर्विशेषाभाव इति वाच्यम्, सुवन्तात्तद्धितोत्पत्त्या चित इत्यन्तोदात्त उभकाभ्यामित्यादौ सुवन्तस्य केतु प्रकृतेरिति विशेषस्य स्पष्टत्वात्। नच—तद्धितविधौ अधिकारलभ्यप्रातिपदिकस्यैव प्रकृतित्वेन विशेषाभाव इति वाच्यम्, अकचस्तन्मध्यपतितत्वेन उभग्रहणेन ग्रहणादुभकावयवौ यस्येत्यर्थेऽयचि उभकय इत्यनापत्तेः। नच—कथ्थेदानीं काकचोर्विशेष इति भाष्येणोक्तरूपस्यानभिधानत्वात्कप्रत्ययेनैवोभकाविति सिद्धौ गणे पाठो व्यर्थ एवेति वाच्यम्, उभयोऽन्यत्रेति वार्त्तिके नोभयत उभयत्रेत्यादाविव केऽयचः प्रवृत्त्याऽनिष्टापत्तेः। अक चितु तन्मध्यपतितन्यायेन उभशब्दस्य द्विवचनपरत्वान्न दोषः। अयम्भावः उभादुदात्तो नित्यमिति सूत्रेऽयचः प्रत्ययान्तरत्वेन व्याख्यानपरकभाष्येण नित्यमिति योगं विभज्य वार्त्तिकैकवाक्यतया उभशब्दाद्द्विवचनपरत्वाभावसंभावनायां स्वार्थेऽयजित्यर्थः, उभयोमणिरित्यादौ तु नास्य प्रवृत्तिः उभयेषामिति निर्देशेन योगविभागस्येष्टसिद्ध्यर्थत्वेन च क्वचिद्प्रवृत्तिकल्पनादिति प्राचीनाः। नव्यास्तु—अकचूविधावेवोभग्रहणेन सिद्धे संज्ञाविधानं व्यर्थम्, नचोभाभ्यां हेतुभ्यामुभयोर्हेत्वोरित्यत्र सर्वनामस्तृतीयाचेत्यर्थमिति वाच्यम्, निमित्तपर्यायेत्यादिवार्त्तिकेन सिद्धेः। संज्ञाव्यावृत्तिस्तु अभिव्यक्तन्यायेन सिद्धा। भाष्ये तु—उभयोरुभावुभोभावित्यादाविव कप्रत्ययस्याप्यज्ञाताद्यर्थविशिष्टस्वार्थे विधानेन द्वित्वसंख्याप्रकारकसंख्येयविशेष्यकबोधविषयार्थानुवादकत्वरूपद्विवचनत्वेन वार्त्तिके द्विवचनशब्देन तस्यापि ग्रहणादयचोऽप्राप्त्या केनैव सिद्धे पाठः प्रत्याख्यातः। त्रतसिलौ तु विभक्त्यन्तस्य स्वार्थे विहिताविति तत्तत्कारकशक्तिप्रधानावेवेति न तयोरुक्तं द्विवचनत्वमित्याद्याहुः। अत्रत्य सूक्ष्मविचारस्तु विस्तरभयान्न लिखित इति दिक्॥ ११॥

उभये इत्यत्र मतद्वयं सप्रमाणमुपपादनीयम्॥ १२॥

उभाववयवौ येषामित्यर्थे संख्यावाचकविहितस्य तयपः उभादुदात्त इत्ययजादेशे प्रातिपदिकत्वाज्जसि स्थानिवत्त्वे न तयप्प्रत्ययान्तत्वात्प्रथमचरमेति विकल्पसंज्ञाया विभक्तिनिरपेक्षत्वेनान्तरङ्गया सर्वा-

दीनीति नित्यसंज्ञया बाध इति प्राञ्चः। नव्यास्तु—विकल्पसंज्ञायाः पक्षेऽभावबोधकतया निषेधाश्च बलीयांस इति बलवत्त्वम्। संज्ञानां बाध्यबाधकभावाभावेन प्रातिपदिकसंज्ञासमकालमेव नित्यसंज्ञायाः प्राप्त्या युगपत्प्राप्त्यभावेन अन्तरङ्गं बलीय इत्यस्याप्राप्तेः। पूर्वयुक्त्या अन्तरङ्गोत्तरमेव बहिरङ्गविधेः प्राप्तौ असिद्धं बहिरङ्गमित्यस्याप्यप्राप्तेः। जसीति विषयसप्तमीति पक्षेऽपि प्रातिपदिकसंज्ञोत्तरमेव जसो विषयतायाः सत्त्वेन तदैव विकल्पसंज्ञाप्राप्तेः। अतएव तयादेशे उभयप्रतिषेधः तयपोग्रहणेन ग्रहणाज्जसि विभाषा प्राप्नोतीति वार्त्तिकमयच्प्रत्ययान्तरमिति मत्वैव भाष्ये प्रत्याख्यातमित्याद्याहुरिति दिक्॥ १२॥

न बहुव्रीहाविति व्याख्याने प्राच्यनव्ययोर्गूढाशयं विशद्य तदनुगुणानामेव गणे सन्निवेशादित्यस्याशयं लिख॥ १३॥

नेदं सूत्रं बहुव्रीहेः संज्ञानिषेधकमुपसर्जनप्रतिषेधेन सिद्धेरिति वृत्त्यादिसम्मत्या चिकीर्षित इत्यध्याहारेण समासार्थालौकिकवाक्ये एवानेन निषेधेऽकचोऽप्राप्त्या के त्वत्कपित्कादिसिद्धिः। नचालौकिके समासप्रवृत्तये तत्रैकार्थीभावस्य कल्पनादुपसर्जनत्वादेव समास इवात्रापि निषेधसिद्धौ व्यर्थमिदं सूत्रमिति वाच्यम्, स्वार्थविशिष्टार्थान्तरबोधकत्वरूपोपसर्जनत्वाभावेन अतिभवकानित्यत्वेव प्राप्तस्याकचोऽभावार्थं सूत्रस्यावश्यकत्वात्। अकृतव्यूहपरिभाषया तु न निर्वाहः तस्या अनित्यत्वादसत्वाच्चेति प्राचीनाशयः। भाष्यगूढार्थविदस्तु—सूत्रे सप्तमीनिर्देशः प्रथमार्थ एव, अतएव भाष्ये प्राचीनोक्तः प्रक्रियावाक्ये निषेध इत्यर्थो बहुव्रीहिपदस्य तदर्थवाक्यस्थपदलक्षणया साधितः; अतएव च अकच्स्वरौ तु कर्त्तव्यौ प्रत्यङ्गमुक्तसंशयमित्युक्ता भगवता सूत्रं प्रत्याख्यातमेवं च वृत्यादिरीत्या व्याख्यानं सर्वथाऽयुक्तमित्याहुः॥१॥

सर्वेषां नाम सर्वनामेति महासंज्ञयाऽन्वर्थत्वलाभः, तेन प्राधान्येनोपस्थितिविषयप्रसिद्धस्वीयसर्वार्थवाचकत्वसमानाधिकरणसर्वनामपदवत्त्वेन बोधकमहासंज्ञया सर्वार्थोपस्थापकसर्वादीनामनुकरणेऽपि इतरेषामनुकरणे मानाभावः। अत्र प्राधान्येत्यनेनोपसर्जनव्यावृत्तिः। पूर्वादिसंग्रहाय च स्वीयसर्वार्थेति संज्ञाव्यावृत्तये प्रसिद्धेति। तथा च

सर्वादिसूत्रस्य सर्वादीनि तदन्तानि च उक्तसर्वार्थवाचकत्वसमानाधिकरणसर्वनामपदवन्तीत्यर्थः। तत्र च प्राप्ताप्राप्तविवेकन्यायेन सर्वनामपदवत्त्वांशे एव विधिः, अन्यस्य तु लोकत एव सिद्धेरित्याद्याशय इति दिक् ॥ १३ ॥

द्वन्द्वे चेत्यत्र को विरोध उभयोरिति समर्थ्य तत्रत्य विशेषो वर्णनीयः ॥ १४ ॥

न बहुव्रीहाविवितिवदस्यापि द्वन्द्वे चिकीर्षित इत्यर्थः, अथवा विद्यतिक्रियामध्याहृत्य द्वन्द्वे विद्यमानानि सर्वादीनीत्यर्थस्तेनावयवस्यायं निषेधः, अतएवाकज्नेति प्राचीनाः। नव्यास्तु—अनेकभाष्यप्रामाण्येन फलाभावेन च एतत्प्रकरणस्थ–सप्तमीनिर्देशस्य प्रथमार्थकत्वेन द्वन्द्वः सर्वनामसंज्ञो न भवतीत्यर्थे द्वन्द्वशब्दस्य समुदायवृत्तित्वेन तस्यैव निषेध उचितः। अतएव वर्णाश्रमेतराणामित्यत्र सर्वार्थवाचकसर्वाद्यन्तत्वेन समुदायसंज्ञायां सुडापत्तिर्न। नचावयवस्य व्यपदेशिवद्भावेन समुदायस्य द्वन्द्वे विद्यमानत्वेन निषेध इति वाच्यम्, अवयवनिषेधे फलाभावात्। नच त्वच्छब्दस्य तान्तत्वेन काकचोर्विशेषेण फलमिति वाच्यम्, तावन्मात्रे कुत्साविवक्षाया अभावेनाकचोऽप्राप्तेः, त्वदधरमधुरमधूनीति जयदेवप्रयोगेणान्यार्थकत्वच्छब्दस्य सत्त्वेऽपि तस्य सर्वनामत्वस्य बह्वसम्मतत्वाच्च। अतएव भाष्ये समुदायकुत्साविवक्षायामकज्न भवतीत्युक्तम्, अतएव च विभाषा जसीति चरितार्थम्। अत्रायं विशेषः द्वन्द्वे—उद्भूतावयवभेदसमूहस्य विशेष्यतयोपसर्जनत्वेन संज्ञाया अप्राप्ताविदं न कार्यम्, अतएव कुक्कुटमयूर्यादित्यत्र द्वन्द्वे ह्रस्ववारणाय द्वन्द्वे नेति वचनमारब्धमित्याहुरिति दिक् ॥ १४ ॥

जरसादेशविषये को विरोधः प्राच्यनव्ययोः कश्च तत्र भवतां सम्मतः ॥ १५ ॥

निर्जरसेत्यादौ जरस्विभक्त्यादेशयोः प्राप्तौ परत्वाज्जरसिति दीक्षिताशयः। नव्यास्तु—अजरांसीत्यत्र नुम्जरसोः प्राप्तयोः परत्वाज्जरसिति भाष्योक्त्या विभक्त्यादेशानामेव पूर्वविप्रतिषेधेनेष्टत्वम्, अन्यथा शिभावात्पूर्वमेव जरसः प्रवृत्तौ तदा सर्वनामस्थानपरकत्वा-

भावेन नुमोऽप्राप्त्या नुमा विप्रतिषेधविचारासङ्गतिः स्पष्टैव । अत एव भाष्यकारः सन्निपातपरिभाषया जरसादेशमनभ्युपयन्नतिजरेणातिजरादिति भाव्यन्नतु अतिजरसि नातिजरसादिति गौरवमुद्भावितवानिति कैयटेनोक्तम्, अतएव च अतिजरसिन अतिजरसादिति केचिदिच्छन्ति यथा तु भाष्यं तथा नैतदिष्यत इति वृत्तिकारेणाप्युक्तम् । एवं नपुंसके अतिजरसं पश्यतीत्यत्र लुक् कस्मान्नेति पूर्वपक्षिणा पृष्टे प्रथमैकवचनेऽपि अतिजरसन्तिष्ठतीत्यत्र लुक् कुतो न शङ्क्यते इति परेण पृष्टे पूर्वपक्षिणा प्रथमैकवचनेऽम्भावोत्तरमेव जरस् तत्र सन्निपातपरिभाषया न लुक्, अथवा अम्भावे कृते सन्निपातपरिभाषया न जरसिति विशेष उक्तः । ततः परेण यद्येवमतिजरसमतिजरसैरिति न प्राप्नोतीति द्वितीयैकवचनादौ शङ्किते इष्टमेवैतदतिजरमतिजरैरिति सिद्धान्तिनोक्तम्, किम्बहुना अनेकभाष्यादिपर्यालोचनया विभक्तिसम्बन्धिकार्यमात्रं जरसादेशात्पूर्वविप्रतिषेधेनेति लभ्यते अतएव जराणामित्यत्र पूर्वं नुटि जरसोऽभाव एव । एवञ्च मूलोक्तं जराशब्दविषयकमाकारश्लेषादिकं निर्युक्तिकमेवेत्याद्याहुः । अत्रत्य युक्तायुक्तविचारस्तु अन्यत्र प्रदर्शितरीत्या प्राचीनमतस्य युक्तत्वमित्यवगन्तव्य इति दिक् ॥ १५ ॥

पद्न्नोमास्यित्यत्र नागेशसिद्धान्तमविकलं लिख ॥ १६ ॥

अत्र आस्ये तुल्यः पादेनोपहतं मासेन पूर्वाय हृदयस्य प्रिय इत्यादि भाष्यादिप्रयोगादन्यतरस्यामित्यनुवृत्तिः । वा केशेष्विति वार्तिके वा ग्रहणन्तु ये च तद्धित इति सूत्रे विकल्पासम्बन्धबोधकम्, न च—निशाशब्दस्य निशशब्दप्रकृतिकत्वेन भागुरिमते टापो वैकल्पिकत्वेन च वाक्वाचेतिवत् निश्निशयोः प्रयोगस्य सिद्ध्या सूत्रे निशग्रहणं व्यर्थमिति वाच्यम्, सुटि हलन्तनिशशब्दप्रयोगस्यासाधुत्वबोधनाय सार्थक्यादितिवृत्त्यादिमतम् । भट्टास्तु, अन्यतरस्यामित्यनुवृत्तौ मानाभावः स्वरितत्वाभावात्। अतएव भाष्ये शीर्षन्निति प्रकृत्यन्तरम्, आदेशत्वेहि छन्दसि शिरसः प्रयोगो न स्यादित्युक्तम्, विकल्पानुवृत्तौ तु आदेशत्वेऽपि दोषाभावेन भाष्यासङ्गतिः स्पष्टैव । ये च तद्धिते इत्यत्रादेशत्वाय

शिरसो ग्रहणं वा केशेष्विति च वक्तव्यमित्युक्तं भाष्ये। एवञ्च शसादि-विषयाणि प्रकृत्यन्तराण्येव पदादयो नत्वादेशा इत्याद्याहुरिति दिक्॥१६

प्रभृतिग्रहणस्य प्रकारार्थत्वे का वाचोयुक्तिः किञ्च तत्र विरोधि-वचनन्तद्युक्तं नवेति लिख ॥ १७ ॥

ककुद्होषणी इत्यादिभाष्यादिप्रयोगात्पद्न्निति सूत्रे प्रभृतिग्रहणस्य प्रकारार्थत्वन्तत्र प्रकारः सादृश्यन्तच्च सुप्त्वेन समासे तु नलुप्तेति निषेधस्यानित्यत्वेन सुप्परत्वम्, अतएव मांस्पचनीति सिद्धम्, शब्द-त्वेन सादृश्यन्तु न युक्तम्; वाशोकेत्यादिसामर्थ्यात्, नच सर्वत्रैवा-देशीः कुतो नेति वाच्यम्, सुप्रभृतिष्विति वाच्ये शसप्रभृतिष्वित्यु-क्त्या अन्यत्र क्वचिदेवेति सूचनात्। अत एव पद्हन्निशां ग्रहणं चरि-तार्थम्। नच—पदङ्घ्रिरित्यादिकोशस्यपदादीनां पादाद्यादेशत्वे पादा-दिभ्यः पृथक् तदुपादानं व्यर्थम्। अतएव नसाद्यादेशानां कोशेऽव-चनमिति वाच्यम्, भाष्यरीत्यैषामनादेशत्वात्; आदेशत्वेऽपि तृज्व-त्क्रोष्टुरितिवत् शसादाद्युभयस्य सुटि पादादीनामेव प्रयोग इति व्यवस्थार्थमस्य सूत्रस्यावश्यकत्वेन सौ परतः हृदादीनां प्रयोगार्थं प्रकारार्थत्वस्यावश्यकत्वात्। न च कोशे पदादिशब्दानां शब्दपरत्वेन प्रकारार्थत्वे मानप्रदर्शनं मूलोक्तमयुक्तमिति वाच्यम्, कोशे शब्दा अर्थ-परा एव शक्तिग्रहस्तु एतत्पदमर्थवाचकं साधुपदत्वाद् घटवदित्यनु-मानेन सामान्यत एवेत्यदोषात्। एकशेषस्तु नाशङ्क्यः तत्तच्छब्दस्व-रूपस्य सम्यग्बोधानापत्तेः। अतएव यत्तदेतेभ्य इति निर्देशः संगच्छते। अतएव एकार्थबोधकत्वरूपसामानाधिकरण्यसत्त्वान्नामन्त्रित इति सूत्रे सामान्यवचनेत्यस्य अघ्न्ये देवीत्यादिप्रत्युदाहरणं भाष्ये दत्तं संग-च्छते। एतेन कोशे शब्दाः शब्दपरा एव अतएवैकशेषो न अर्थपरत्वन्तु न सम्भवति इतः पूर्वं शक्तिग्रहाभावात् एवञ्चात्र प्रकारार्थत्वाभावेऽपि न क्षतिरित्युक्तमपास्तमिति दिक् ॥ १७ ॥

आतो धातोरित्यत्र धातोरित्यस्याधिकलं फलं लिख ॥ १८ ॥

ननु—हाहाशब्दस्य क्रियाशब्दत्वात्तत्र लोपस्येष्टत्वेन धातोरिति व्यर्थमिति चेन्न, एन सह वर्त्तन्ते तात्सानिति प्रत्युदाहरणत्वादिति प्राञ्चः।

नव्यास्तु—क्त्वः श्न इति सिद्धये कृतस्य आतो नाप इति वार्त्तिकस्य आत इति योगविभागेन भाष्ये प्रत्याख्यानं कृतम्, एवञ्चोक्तसाशब्दस्य यद्यभिधानन्तदा योगविभागेन लोप इष्टएव। आरम्भप्रत्याख्यानयोः फलैक्याय सूत्रे धातुग्रहणमनाप्परमेव। नचावन्तादाचारक्विन्तात्कर्त्तरि क्विपि प्रातिपदिकत्वेन शसादौ सूत्रवार्त्तिकयोर्विरोध इति वाच्यम्, तथाप्रयोगस्यानभिधानकल्पनात्। किञ्च त्रयाणामैक्याय धातुग्रहणं स्त्रीबोधकघटकेतराकारपरमिति न कश्चिद्विरोधः। अतएव प्रथमयोरिति सूत्रस्थं नुड्विधायके आप्ग्रहणं न कार्यमित्याशयकं मूलदर्शितसन्दर्भात्मकं भाष्यं संगच्छते। अन्यथा अधात्ववयवाकारान्तानां लोपाभावे तु भाष्यासङ्गतिः स्पष्टैवेति दिक्॥ १८॥

शेषो घ्यसखीति सूत्रे असखीत्यस्य सप्रमाणं सफलञ्चार्थं लिख॥१९॥

वर्णसंज्ञापक्षे असखीत्यस्य सखिभिन्नावयवाविदुतावित्यर्थः। अत्र तद्भिन्नप्रातिपदिकान्त्येवर्णादेरेव ग्रहणात्कृतं सख्येति वाक्ये न घित्वम्। भाष्यादिसिद्धतदन्तसंज्ञापक्षे सखिभिन्नाविदुदन्तावित्यर्थस्तेन सुसखिनेत्यादिसिद्धिरिति प्राञ्चः। नव्यास्तु—इवर्णस्य-ईति किमुदाहरणमतिसखेरागच्छति, यद्यत्र लोपो न स्यात्तदाकृतदीर्घस्य पूर्वान्तवद्भावेन सखिशब्दत्वाद्उपसर्जनह्रस्वत्वेऽपि घिसंज्ञा न स्यात्। लोपे तु लक्षणप्रतिपदोक्तपरिभाषया न दोष इति यस्येति चेति सूत्रभाष्येण सखिशब्दस्य तदवयवे लक्षणया सख्यवयवभिन्नयोरिदुतोरिति वर्णसंज्ञापक्षेऽर्थः। तदन्तसंज्ञापक्षे तु असखीत्यिवोरेव विशेषणन्ततस्तदन्तविधिस्तेन सख्यवयवभिन्नेवर्णाद्यन्तमित्यर्थः। एवञ्च सुसखिनेत्यादौ घिसंज्ञाभाव एव लभ्यते। नच ख्यत्यात्परस्येति सूत्रे किमर्थं विकृतनिर्देशो न सखि-पतिभ्यामित्येवोच्येत, अतिसखेरित्यत्र माभूदिति भाष्यविरोधस्तत्रापि ङ्यन्तप्रकृतिकत्वादिति वाच्यम्, विहितविशेषणानाश्रयणेनैव प्रतिपदोक्तपरिभाषानाश्रयणेनैवैतद्भाष्यप्रवृत्तेरिति प्राहुः। वस्तुतस्तु तस्मादिति परिभाषासत्त्वे विहितविशेषणस्याशक्यत्वात्प्रतिपदोक्तपरिभाषाया अप्रवृत्तौ मानाभावेन नवीनमतसाधकस्योक्तभाष्यस्यैकदेश्युक्तित्वेन प्राचीनमतमेव ज्याय इति दिक्॥ १९॥

अच्चधेरित्यत्र औति अति च तपरत्वे को विवादः प्राच्यनव्ययो रिति विविच्य लिख ॥ २० ॥

अत्र प्राचीनाः—अदौतोस्तपरत्वं मुखसुखार्थमेव नेत्संज्ञकन्तेनाग्नै इत्यादौ तित्स्वरितमिति स्वरितत्वन्नेत्याहुः। नवीनास्तु—मुखसुखार्थ स्यापीत्संज्ञालोपं विना निवृत्त्यसम्भवः। न विभक्ताविति निषेधस्तु नाशङ्क्यः मुखसुखार्थमित्यस्य तदेव प्रयोजनं नतु कार्यान्तरं नापि प्रयोगे श्रवणमित्यर्थात्तदप्रवृत्तेः। अतएव इद्धद्धावित्यादिनिर्देशाः संगच्छन्ते। तित्स्वरितमित्यस्य तु न प्राप्तिः तितिप्रत्ययग्रहणमिति वार्त्तिकस्य आदेशेषु दित्वमाश्रित्य भाष्ये प्रत्याख्यानेन तयोः फलैक्याय प्रत्ययग्रहणमित्यस्य विधानकालिकप्रत्ययत्ववद्ग्रहणमित्यर्थात्। केचित्तु प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ग्रहणमिति परिभाषयैव सिद्धे पुनरुक्तवार्त्तिकादौपदेशिकप्रत्ययत्ववत्येव तत्प्रवृत्तिरित्याहुस्तन्न, लक्ष्यसिद्धये भाष्ये तस्याः काप्यनाश्रयणादिति दिक् ॥ २० ॥

प्रत्ययलोप इति सूत्रस्य कथं नियमार्थत्वं वार्त्तिकमते च कथं विध्यर्थत्वमिति सयुक्तिकं लिख ॥ २१ ॥

भाष्ये तु स्थानिवत्सूत्रेणैव सिद्धे नियमार्थमिदं प्रत्ययस्यासाधारणरूपं यत्राश्रीयते तदेव कार्यम्प्रत्ययलोपे सति भवति नतु प्रत्ययाप्रत्ययसाधारणमिति, तेन शोभना दृषदोऽस्य सुदृषत्प्रासाद इत्यत्र त्वसन्तस्येति दीर्घो न। प्रत्ययस्यासाधारणत्वञ्च—प्रत्ययवृत्तित्वे सति प्रत्ययेतरावृत्तित्वम्। नचास्य नियमार्थत्वे दाधर्त्तीति सूत्रस्थभाष्यविरोध इति वाच्यम्, तस्यैकदेश्युक्तित्वेनासाधकत्वात्। नचैवमतृणेडित्यत्र तकारसकारयोर्लोपे कथमिमागम इति वाच्यम्, तृणहइमिति सूत्रे हल्ग्रहणानानुवृत्तेः। तृणहानीत्यत्र तु दोषो नाशङ्क्यः नाभ्यस्तस्येत्यतोऽचि नेत्यनुवर्त्य वाक्यभेदेन अजादौ पिति नेति व्याख्यानेनादोषात्। नचैवमपि मित्रशीरित्यत्राल्विधित्वेन स्थानिवत्त्वाभावात् शासइदङ्हलोरितीत्वं न स्यादिति वाच्यम्, तत्रापि हल्ग्रहणाकरणेनादोषात्,। आशासात इत्यत्र दोषस्तु न, शासइत् अङि इति योगं विभज्य पूर्वयोगेनैव सिद्धे उत्तरयोगेन अजादौ चेदङ्येवेति नियमेना-

दोषात्। वार्त्तिककारस्तु अतृणेडित्यादिसिद्धये सूत्रं विध्यर्थमित्यवोचत्, तत्तु पूर्वरीत्या खण्डितमेव। इदमत्र तत्त्वम्, प्रत्ययस्यासाधारणमित्यादिस्तु न सूत्रनियमः स्वांशे चारितार्थ्याभावात् किन्तु प्रत्ययलोपे तल्लक्षणमित्येव सिद्धे द्वितीयप्रत्ययग्रहणं प्रत्ययत्वव्याप्यधर्मावच्छिन्ननिमित्तताके कार्ये एव प्रत्ययलक्षणमिति नियमयति। तेन सुहृषत्प्रासाद इत्यत्र दीर्घो न। इदं सूत्रन्तु व्यर्थीभूय आदेशपदे प्रत्ययलोपातिरिक्तत्वेन सङ्कोचयति अतएव स्वांशे चारितार्थ्यमिति दिक् ॥२१॥

प्रत्ययलोप इति सूत्रे आद्यप्रत्ययग्रहणस्य लक्षणग्रहणस्य च फलमविकलं लिख ॥ २२ ॥

प्रत्ययस्येत्यनुवृत्त्यैव सिद्धे आद्यप्रत्ययग्रहणमवयवलोपे माभूदिति बोधनार्थम्, तेनाग्नीयेत्यादौ नानुनासिकलोप इति भाष्ये उक्तम्, नचात्र प्रत्ययावयवसकारस्य लोपेन प्रत्ययलोपाभावान्नियमफलं चिन्त्यमिति वाच्यम्, इदमेव प्रत्ययग्रहणं प्रत्यायावयवेऽपि प्रत्ययत्वव्यवहार इति ज्ञापयतीत्यदोषात्। अतएव आदेशप्रत्यययोः इदुदुपधस्येत्यत्र प्रत्यायावयवे लक्षणाश्रयणन्नेति। नचैवं राममित्यादौ केवलमकारस्यापि सुप्त्वात्सुपि चेति दीर्घापत्तिः; आखनिकवक इत्यादौ केवलककारस्य प्रत्ययत्वाल्लशकतद्धित इति लोपश्च स्यादिति वाच्यम्। समासघटकषष्ठ्यन्तपदप्रयोज्यमुख्यविषयताया एव प्रत्यायावयवे स्वीकारेणादोषात्। मुख्यत्वञ्च स्वावयवबोधकपदप्रयोज्यविशेष्यतानिरूपितप्रकारत्वासामानाधिकरण्यम्। ज्ञापकसाजात्यादिदं लब्धमिति दिक् ॥१॥

प्रत्ययलोपे प्रत्ययदित्येव सिद्धे लक्षणग्रहणं प्रत्ययनिमित्तकमेव कार्यं भवति नतु प्रत्ययस्थानिकमिति ज्ञापयति, तेन नखैर्भिन्नो नखभिन्न इत्यत्र प्रत्ययलक्षणेन भिस ऐस् नेति भाष्ये उक्तम्। नच नखभिस् भिन्नसु इत्यवस्थायामन्तरङ्गत्वादैसादेशे ततः समासे लुकि च प्रत्ययलक्षणेऽपि दोषाभावेन नियमफलं चिन्त्यमिति वाच्यम्। अन्तरङ्गानपीति न्यायेन ऐसादेशात्पूर्वमेव समासलुकि नियमफलसंभवात्। नच ज्ञापकसाजात्याल्लुको यत्रान्तरंगनिमित्तविनाशकं तत्रैवान्तरङ्गानपी-

त्यस्य प्रवृत्तिः; अतएव ऊर्णुहीत्यत्र गुणात्पूर्वं उतश्च प्रत्ययादिति हेर्लुग्नेति नियमफलं चिन्त्यमेवेतिवाच्यम्, सर्वेषां पुत्रः सर्वपुत्र इत्यादौ प्रत्ययलक्षणेन सुडागमापत्तेरिति नियमफलमिति दिक् ॥२२॥

अत्र प्रत्ययलक्षणग्रहणफलं विविच्य लिख ॥२३॥

स्थानिवदित्यनुवृत्त्यैव सिद्धे प्रत्ययलणग्रहणं प्रत्ययस्य यत्र प्राधान्येनाश्रयणन्तत्रैव तदिति नियमयति तेन चित्रायां जाता चित्रेत्यादौ अणो लुकि ठिड्ढेति सूत्रस्य अणो योऽकारस्तदन्ताङ्ङीविति भाष्यसम्मतेऽर्थे प्रत्ययप्राधान्याभावेन प्रत्ययलक्षणाप्राप्तौ ङीबनेति, गोहितमित्यत्र प्रत्ययलक्षणेनावादिर्न्नेति च भाष्ये स्पष्टम्। तत्र प्रत्ययप्राधान्यञ्च—प्रत्ययेतरपदार्थनिष्ठविशेष्यतानिरूपितविशेषणतानाश्रयत्वम्, एतत्फलितमेव वर्णाश्रये नास्ति प्रत्ययलक्षणमिति दिक् ॥२३॥

न लुमताङ्गस्येत्यत्र कः प्रपञ्चो नागेशस्येत्यविकलं लिख ॥२४॥

लुप्तप्रत्ययपरतो यः पूर्वस्तत्प्रकृतिभूतो लब्धाङ्गसंज्ञकस्तदुद्देश्यकं यत्कार्यमाङ्गमनाङ्गं वा तस्मिन्कर्त्तव्ये प्रत्ययलक्षणन्नेत्यर्थः। अतएव पञ्चेत्यादौ प्रत्ययलक्षणेन पदसंज्ञा भवति, राजपुरुष इत्यादौ राजन्नित्यस्य प्रत्ययलक्षणेन भसंज्ञा न अनेन निषेधात्, अङ्गसंज्ञाया लब्धाङ्गसंज्ञककार्यत्वाभावेन तत्कर्त्तव्ये निषेधाप्रवृत्तिः। अतएव भाष्ये पञ्चभिः क्रोष्ट्रीभिः क्रीतं कुलमित्यर्थे तद्धितार्थेति समासे क्रीतार्थठकोऽध्यर्द्धेति लुकि लुक्तद्धित इति स्त्रीप्रत्ययलोपे प्रत्ययलक्षणेनाङ्गत्वात्तृज्वत्वे पञ्चक्रोष्टृ इति सिद्धमित्युक्तम्। नचोरदत्ववत् तृज्वत्वेऽपि परनिमित्तत्वमिति कथमत्राङ्गत्वेन तृज्वत्वमिति वाच्यम्, वन्नश्चेत्यादौ स्थानिवत्त्वप्रवृत्तये अङ्गसंज्ञाद्वाराऽत्वस्य परनिमित्तकत्वस्वीकारेऽपि प्रकृते तथास्वीकारे मानाभावात्, आकडारीयसंज्ञासु च यथोद्देशत्वाच्च। अतएव चर्करीति अजर्घा इत्यादावत्वप्रवृत्तिरित्यादिसन्दर्भो मूले प्रपञ्चित इति दिक् ॥२४॥

यूख्याख्यौ नदीत्यत्र आख्याग्रहणफलमुपपाद्य नित्यस्त्रीत्वं परिष्कृत्य प्रथमलिङ्गग्रहणञ्चेत्यस्य सार्थक्यं दर्शयत ॥२५॥

अत्राख्याग्रहणान्नित्यस्त्रीत्वलाभः। तत्त्वञ्च-प्रवृत्तिनिमित्तैक्ये लिङ्ग-

न्तरविशिष्टार्थानभिधायकत्वम् अर्थात्प्रवृत्तिनिमित्तविशिष्टशक्तिविशिष्टत्वम्, आद्यवै० स्वावच्छिन्नविशेष्यतानिरूपितस्त्रीत्वनिष्ठप्रकारताप्रयोजकत्व-स्वावच्छिन्नविशेष्यतानिरूपितस्त्रीत्वेतरलिङ्गनिष्ठप्रकारत्वाप्रयोजकत्वोभयसम्बन्धेन। शक्तिवै० स्वपर्याप्त्यधिकरणत्व-स्वप्रयोज्यबोधजनकत्वप्रकारकवक्तृतात्पर्यविशेष्यत्वोभयसम्बन्धेन। ग्रामणीरित्यत्र शक्तेः पुंस्त्वनिष्ठप्रकारताप्रयोजकत्वान्न तत्त्वम्, ङ्यन्तकुमार्यादीनां क्यचि निर्वृत्तेन त्रिलिङ्गेन नित्यस्त्रीत्वाभावः। नन्वेवं बहुश्रेयसीशब्दस्य कथं नदीत्वमत आह—प्रथमलिङ्गग्रहणञ्चेति। अर्थान्तरसंक्रमात्पूर्वं विद्यमानं नित्यस्त्रीत्वमादाय तस्यार्थान्तरसंक्रमेऽपि नदीत्वं वक्तव्यमित्यर्थः। इदन्तु वार्त्तिकं फलितार्थकथनम्, तथाहि यथोद्देशे पूर्वप्रवृत्तसंज्ञामादायैव कार्यसिद्धिः, कार्यकाले तु कुमार्यै ब्राह्मणाय खरकुट्यै ब्राह्मणायेत्यादौ प्रकृतिभूतकुमारीशब्दस्य नित्यस्त्रीत्वेन वृत्तावपि विशेषणतया नित्यस्त्रीलिङ्गरूपार्थबोधकत्वेन नदीसंज्ञा तन्मात्रबोधकत्वनिवेशे प्राधान्येन तद्बोधकत्वनिवेशे वा मानाभावः। आकडारीयत्वेन कार्यकालत्वाभावश्च। अत एव भाष्ये अवयवस्त्रीविषयत्वात्सिद्धमित्युक्त्वा प्रत्याख्यातमिदमिति दिक् ॥२६॥

अप्तृन्निति सूत्रे नप्त्रादिग्रहणस्य नियमार्थत्वे कः सिद्धान्तो भाष्यसिद्ध इति विविच्य लिख ॥२६॥

ननु—व्युत्पत्तिपक्षे तृन्नन्तत्वात्तृजन्तत्वाद्वा दीर्घे सिद्धे नप्त्रादिग्रहणं व्यर्थमिति चेन्न, उणादिनिष्पन्नानां तृन्तृजन्तानां संज्ञाशब्दानां यदि दीर्घः स्यात्तर्हि नप्त्रादीनामेवेति नियमार्थत्वात् तेन पितृमातृप्रभृतीनान्नेति प्राञ्चः। भाष्यविदस्तु भाष्ये तृचश्चकारो व्यर्थः। नचाप्तृन्नित्यादौ विशेषणार्थ इति वाच्यम्, तत्रापि तृ इत्येव सिद्धे। नच—तृ इत्युच्यमाने मातरौ पितरावित्यादावपि प्राप्नोति तत्र हि तृप्रत्ययो निरनुबन्धक इति वाच्यम्, नप्तृग्रहणस्य योनिसम्बन्धवाचिनां चेदस्यैव नान्येषां योनिसम्बन्धवाचिनामिति नियमार्थत्वादित्युक्तम्। एवञ्च यथान्यासे नियमफलं चिन्त्यमेवेति प्राहुः ॥२६॥

विभाषा तृतीयादिषूचीतिसूत्रे का वाचोयुक्तिर्ग्रन्थकारस्येति लिख ॥२७॥

ननु—तृच्तुञन्ताभ्यां क्रोष्टृकोष्टुभ्यां शृगालवाचिभ्यामुभयरूपसिद्धौ सूत्रमिदं व्यर्थमिति चेन्न, तृतीयादावच्येवोभयोः प्रयोगोऽन्यत्र तुञन्तस्यैवेति प्रयोगनियमार्थत्वात्। अतएव भ्यामादौ शशि क्रोष्टुपुत्र इत्यादौ न तृजन्तप्रयोगः सर्वत्रविशिष्टाभावस्य सत्वात्। एवं तृज्वत्क्रोष्टुः 'स्त्रियाञ्चेति सर्वनामस्थाने स्त्रियाञ्च तृजन्तस्यैव प्रयोग इति प्रयोगनियमार्थत्वम्, नचैवं क्रोष्टूनित्याद्यसङ्गतमन्यत्र तृजन्तस्यैव प्रयोगेणापि प्रकृतनियमस्य चारितार्थ्यादिति वाच्यम्। एवं सति तृज्वत्क्रोष्टुरिति योगविभागस्य वैयर्थ्यापत्तेः। नच क्रौष्ट्रः क्रोष्ट्रीया इति भाष्यप्रयोगासङ्गतिरिति वाच्यम्, ऋकारान्तस्यैव ऋषिवाचकत्वेनादोषात्। एतत्सर्वं भाष्ये स्पष्टमिति दिक् ॥२७॥

गोतोणिदिति सूत्रे प्राच्य-नव्ययोः को विशेष इति लिख ॥२८॥

अत्र तपरकरणेन गकारोऽविवक्षितस्तेन सुद्यौः स्मृतौरित्यादिसिद्धिः, अतएव चित्रगुरित्यादौ न दोषः, अन्यथाऽङ्गाधिकारे तदन्तविधेः सत्त्वेन स्थानिवत्त्वेन गोन्तत्वाद्दोषापत्तिरिति प्राञ्चः। नवीनास्तु गोतोणिदित्यत्र तपरत्वं भाष्ये प्रत्याख्यातम्, चित्रगुरित्यादौ दोषो नाशङ्क्यः, गोः पूर्वत्वणित्वात्वस्वरेषु स्थानिवत्त्वप्रतिषेधो वक्तव्य इति वार्त्तिकात्। हे चित्रगो इत्यादौ तु लाक्षणिकत्वादेव तदप्रवृत्तिः द्योः सर्वनामस्थाने णित्वं वक्तव्यमिति वार्त्तिकाच्च स्मृतौरित्याद्यनभिधानमेवेत्याहुः ॥ २८ ॥

ङिति ह्रस्वश्चेति सूत्रे प्राच्यनव्ययोर्विलासोऽविकलं लेख्यः ॥२९॥

अत्र योगद्वयन्तत्र ङितीति योगे इयङुवङ्स्थानौ अस्त्री नित्यस्त्रीलिङ्गावित्यर्थकं स्त्र्याख्यावित्यनुवर्त्तते ह्रस्वश्चेति वाक्ये आख्यापदरहितं स्त्रीशब्दमात्रम्। (अथवा) स्त्रीवाचकावित्येतन्मात्रार्थकस्त्र्याख्यावित्यनुवर्त्तते। अतएव इष्वशनिप्रभृतीनामुभयलिङ्गानां पटुमृदुप्रभृतीनां सर्वलिङ्गानां कथं नदीत्वमित्याशङ्क्य ह्रस्वश्चेत्यत्र

नित्यस्त्रीलिङ्गावित्येवं विधो नियमो नाश्रीयत इति कैयटोक्तिः संगच्छते। तन्मते हि स्त्रीविषयावेव यौ यू नित्यमितिभाष्येण लिङ्गान्तरविशिष्टार्थानभिधायकत्वं नित्यस्त्रीत्वमिति स्वीकारात्। पदान्तरं विनापि स्त्रियां वर्त्तमानत्वन्तदिति वृत्त्यादिमते ह्रस्वांशे नित्यग्रहणव्यावर्त्यालाभात् इष्वादीनां हि शब्दवाच्य एव स्त्रीत्वम्, एवञ्च ह्रस्वयोरप्राप्ते दीर्घयोस्तु नेयङिति निषेधादप्राप्तविभाषा। अत एवास्य दीर्घांशे निषेधविकल्पकत्वं भाष्ये उक्तम्। अतएव कटप्रवे ब्राह्मण्यै इत्यत्र नित्यस्त्रीत्वाभावान्न नदीत्वमिति प्राञ्चः। नव्यास्तु अत्र विकल्पो भवत्येव दीर्घवाक्येऽपि नित्यस्त्रीत्वस्यानुवृत्तेः। स्त्रीवाचकत्वञ्च ङिदाश्लिष्टाङ्गविशेषणम्। अतएव प्रथमलिङ्गग्रहणं चेत्यस्यात्राप्रवृत्त्यभ्याख्यायके ह्रस्वौ चेयङुवङ्स्थानौ च प्राक् च प्रवृत्तौ स्त्रीवचनावेव नदीसंज्ञौ भवतौ नतु पुंवाचकाविति वक्तव्यमिति वार्त्तिके शकट्यै ब्राह्मण्यै क माभूत्, अतिशकट्यै ब्राह्मणाय, अतिश्रियै ब्राह्मण्यै, श्रियै ब्राह्मण्यै, क माभूत्; अतिश्रिये ब्राह्मणाय, श्रिये ब्राह्मणायेति भाष्ये उक्तम्। एवञ्चास्य निषेधविकल्पत्वमसम्भवि समुदायस्य केनापि प्राप्त्यभावात्, अवयवस्य प्राप्तावपि तस्यानेन निषेधाभावात् ङिदाश्लिष्टाङ्गस्यैवानेन विकल्पविधानात् इदञ्च प्रवृत्तौ स्त्रीवचनावित्यनेन सूचितम्, अतएवात्र भाष्ये वाक्यद्वयेऽपि विधिविकल्प एव दर्शितः। एवञ्चात्र नियमो नाश्रीयते इति कैयटो वाक्यद्वयपर एवोचितः। उपक्रमे निषेधपरतया व्याख्यानन्तु एकदेशिन इति तन्नादरणीयम्। ननु-खरकुट्यै ब्राह्मणायेत्यादौ लुबन्तस्य त्रिलिङ्गत्वेऽपि प्रथमलिङ्गग्रहणान्नित्यनदीत्वं भवतीति भाष्ये उक्तम्। एवं श्रीशब्दात्कनि लुपि श्रिये ब्राह्मणायेत्यादौ विकल्पापत्तिः युक्तवद्भावेन स्त्रियामङ्गस्य वर्त्तनादितिचेन्न, सत्यभिधाने इष्टापत्तेः। भाष्ये दृश्यमानं श्रिये ब्राह्मणायेत्यादि तु क्यजन्तात्किपि बोध्यम्। विपरीतं नित्यस्त्रीत्वनिवेशवादिनो लुबन्तश्रिये ब्राह्मणायेत्यादौ तदनापत्तिर्दोष इत्याहुः। अत्रत्य विशदविचारः प्राचीनमतसाधकोऽन्यत्र दर्शितरीत्याऽवसेय इति दिक् ॥२९॥

अड्डतरादिभ्य इति सूत्रे प्राचीननवीनमतं संक्षेपतो दर्शनीयम् ॥३०॥

अत्र कैयटेनोक्तम्—अर्थद्वारकं विधानमाश्रयितव्यम्, तेन परमकतरदिति सिद्धमिति। तन्न डतरादिभ्य इति विरुद्धविभक्तिपञ्चम्यन्तत्वादङ्गस्येत्यनेनान्वयानर्हमिति डतरादिभ्यो विहितयोः स्वमोरङ्गसंज्ञानिमित्तयोरित्यर्थो भाष्ये दर्शितः। एवञ्च परमकतरं कुलमित्यत्रादड्भाव एव युक्तः। अर्थद्वारकं विधानमित्यस्य यदि डतरादयर्थगतसंख्याभिधायिन इत्यर्थस्तदा पञ्चम्यन्तात्तादृशार्थप्रतीत्यसम्भवः। यदि च षष्ठ्यर्थे पञ्चमीत्युच्यते तदा विरुद्धविभक्तित्वादिति भाष्यासङ्गतिः। विधानस्योक्तार्थे सर्वथाऽनाश्रयणेन अर्थद्वारकं विधानमिति स्वग्रन्थासंगतिश्च। नच तवोक्तार्थेनैव सिद्धे भाष्ये उपसर्जनप्रतिषेधारम्भो व्यर्थः स्यादिति वाच्यम्, तत्प्रत्याख्यानायैव भाष्ये उक्तार्थाश्रयणात्। त्यदादीनामः अस्थि दधि इत्यादौ षष्ठ्यन्तत्वादर्थद्वारकं विभक्तिविशेषणमिति तत्रैव भाष्ये स्पष्टमिति नव्याः। नामीति सूत्रस्थशेखरप्रदर्शितरीत्या तु कैयटोक्तमेव युक्तमिति तत एवावधार्यमिति दिक् ॥३०॥

दादेर्धातोर्घ इत्यत्र कः प्रपञ्चो नागेशस्येति लिख ॥३१॥

अत्र दादिपदमौपदेशिकदादित्वावच्छेदकं प्रकृतसूत्रभाष्यात् तेनोपदेशे दादेरित्यर्थलाभस्तथाहि धुगित्यत्र धत्वस्यासिद्धत्वाद्धृत्वं प्राप्नोतीत्याशङ्क्य, अपवादत्वेन समाधाय अथवा एवं वक्ष्यामि (होढोऽदादेः) धातोर्घ इति, अत्र दादेरित्यनुवर्त्तते नेति च निवृत्तमित्युक्तं तत्र धातोरिति योगे दादेरित्यनुवृत्तेः फलान्तराभावेन सामर्थ्यादुपदेशावद्दादिलक्षकत्वमिति। अत्रार्थाधिकारानुरोधात्पूर्वत्र निषेध्यसमर्पकेऽप्येवमेवेति दामलिडादिनामधातौ ढत्वधत्वाभावौ सिद्धौ एतदेकवाक्यतया अपवादत्वपक्षेऽपि दादिपदस्यौपदेशिकदादित्वावच्छेदकतोचिता। एतदनन्तरं दादेरिति वर्त्तत इति भाष्यस्य उक्ताशयमजानतैकदेशिना दादेरिति वर्त्तते कथमधोगिति शङ्कायामेकाच इति सूत्रार्थमपि प्रसङ्गान्निर्णीतं धातोरवयवो यो दादिरित्यर्थमुक्त्वा गर्धवित्यादौ

भष्भावायोत्तरसूत्रे आवश्यकं वैयधिकरण्यमित्युक्तम्। तत्रोत्तरार्थमावश्यकमिति वदता, इहानावश्यकत्वं च सूचितमिति नव्याः। प्राचीनास्तु दामलिगित्येव, उपदेशे दादेरित्यर्थे मानाभावात् उत्तरयोगे दादेरित्यनुवृत्तेः धातोरवयवो यो दादिरिति वैयधिकरण्यायावश्यकता। धातोरवयवो यो दादिस्तदवयवभिन्नस्य ढत्वमिति पूर्वयोगार्थः। उक्तरीत्या उपदेशे दादित्ववल्लक्षकता तु न युक्ता, तादृशस्य धत्वविधौ धातोरेव सम्भवेन धातोरित्यस्य वैयर्थ्यापत्तेः। अतएव धोदादेरित्यादिभाष्यमपि स्वरसत उपपद्यते इत्याद्याहुरिति दिक् ॥ ३१ ॥

दिव औदित्यत्र तपरत्वे को विवादः प्राच्यनव्ययोरित्यविकलं भण ॥ ३२ ॥

अत्र तकारस्योच्चारणार्थत्वेनेत्संज्ञां विनैव निवृत्त्या सुद्यौरित्यत्र न स्वरितत्वमिति प्राञ्चः। नव्यास्तु विधेयविषये उच्चारणार्थानामपीत्संज्ञालोपावावश्यकौ, अन्यथा तान्तस्यविधानापत्तिः। अतएवादड्सूत्रे भाष्ये डित्वाभावेऽदादेशे पूर्वसवर्णदीर्घमाशङ्क्यानुनासिकोपधात्वान्नेति समाहितम्। भवदुक्तरीत्या तु उच्चारणार्थकत्वकल्पने इत्संज्ञां विनैव निवृत्तिसिद्धौ इत्संज्ञार्थमनुनासिकत्वकथनं व्यर्थं स्यात्। अतएव अनुवन्धा एकान्ता इति पक्षे दिव उदित्यादीनां सर्वादेशत्वमाशङ्क्य नानुवन्धकृतमनेकाल्त्वमिति समाहितं भाष्ये, अतएव च तितिप्रत्ययग्रहणमिति वार्त्तिकस्य द्युभ्यामित्यादौ स्वरितत्वाभावः फलं भाष्योक्तं संगच्छते। संगच्छते च तद्वार्त्तिकम्, एवं विधेयविषये उच्चारणार्थानामचामप्यनुनासिकत्वेनेत्संज्ञोचिता अतएव वेरपृक्तस्येत्यत्रापृक्तग्रहणाभावे दर्विरित्यत्र लोपमाशङ्क्य, अनुनासिकपरस्य वेर्ग्रहणमिति भाष्ये उक्तम्। अनुवादविषये तु व्यवसितान्त्यत्वाभावेन इत्संज्ञाशास्त्राप्रवृत्तेरुच्चारणार्थवर्णसहितसमुदायस्य तद्रहिते लक्षणा। विधौ तु नोचिता सा "न विधौ परः शब्दार्थ" इति न्यायात्। नचैवं तित्स्वरितमितिस्वरितत्वापत्तिरिति वाच्यम्, दिव इकारस्योदात्तत्वेन स्रंसनधर्मिणो हलः स्थाने जायमानौकारस्यानुदात्तत्वेन इकारस्य यणि

उदात्तस्वरितयोर्यण इति स्वरितसिद्ध्या फलाभावात्। तितिप्रत्यय-ग्रहणमिति वार्त्तिकाच्च। अत्रत्य प्राचीनमतानुयायिनां मतमन्यत्र प्रपञ्चितदिशा ज्ञातव्यमिति दिक्॥ ३२॥

अदुहितरां द्युभ्यामित्यादौ हल इति दीर्घत्वं कथन्नेति विविच्य लिख॥ ३३॥

ननु लस्योत्तमैकवचने इटि तस्य यणः स्थाने प्रयुज्यमानत्वेन इग्यणः संप्रसारणमिति संप्रसारणसंज्ञायां हल इति दीर्घत्वं कुतो न। नच यथासंख्यसम्बन्धान्नात्र तत्संज्ञाप्राप्तिरिति वाच्यम्। लकारोप-देशः किमर्थ इत्यादि ऋलक्सूत्रस्थभाष्यविरोधेन यथासङ्ख्यपरिभा-षाया इहाप्रवृत्तेः। अन्यथाऽत्र यथासङ्ख्येनान्वयार्थं लकारोपदेशस्य चारितार्थ्येन उक्तभाष्यविरोधः स्पष्ट एवेति चेन्न, विधिप्रदेशेषु यण इगित्येव सिद्धे संज्ञाविधानसामर्थ्येन तद्भावितपक्षाश्रयणेनादोषात्। अतएव वाक्यस्य संज्ञेति पक्षेण सहैकवाक्यता लभ्यते। अतएव च द्युभ्यामित्यादौ न दीर्घत्वम्, अक्षद्यूश्चासावरुणश्च अक्षद्यरुण इत्यत्र पूर्वरूपं न। समानाङ्ग्रहणं कार्यमिति तु भाष्ये प्रत्याख्यातमेवेति दिक्॥ ३३॥

षट्चतुर्भ्यश्चेति सूत्रे प्राच्यनव्ययोः को विशेष इति सयुक्तिकं लिख॥ ३४॥

अत्र बहुवचननिर्देशाद् अथवा अङ्गाधिकारे पञ्चम्या यदुच्यते गृह्यमाणविभक्तेस्तद्भवतीति भाष्याच्च षडित्यादि षडाद्यर्थपरं अर्था-त्परत्वं चाम्रः शब्दद्वारकं स चार्थः प्रधान एव। एवञ्च षडाद्यर्थगत-संख्याभिधायिन आमो नुडित्यर्थस्तेन प्रियचतुराभित्यत्र नुट् नेति प्राञ्चः। नव्यास्तु तिसृभ्यो जसित्यादादाविव शब्दबहुत्वाभिप्रायेणैव बहुवचनमिति न गौणेऽप्रवृत्तिसाधकम्, अङ्गाधिकार इत्यादिभाष्यन्तु षड्भ्यो लुक् अद्डुतरादिभ्य इत्येतन्मात्रविषयकमिति नामीत्यत्र शेखरे उक्तम्। किञ्च शब्दद्वारकमित्यस्य शब्दनिष्ठपरत्वाद्यवधित्वस्य

परत्वस्य वाऽर्थे आरोप इत्यर्थः, एवञ्चात्र गौणत्वात्तत्र सम्बन्धे तन्निरूपितसम्बन्धे च न विभक्तिसम्भवः, अत एव गङ्गायां घोष इत्यादौ अधिकरणत्वादिनिमित्ता विभक्तिः स्वरितत्वप्रतिज्ञादिना भाष्ये साधितेति दिक् ॥ ३४ ॥

न सम्प्रसारणे सम्प्रसारणमित्यत्र कः प्रपञ्चो नागेशस्य ॥ ३५ ॥

अत्रानुवृत्त्यैव निषेध्यसमर्पके लब्धे सम्प्रसारणग्रहणं सामर्थ्यात्तन्मात्रनिषेधकमिति अनन्तरस्य विधिरिति न्यायाप्राप्तौ दूरस्थस्यास्य व्यथो लिटीत्यस्य चाऽनेन निषेधः। नच व्यथिव्यध्यादावस्य चारितार्थ्येन यून इत्यादौ पूर्वसवर्णदीर्घे तस्याचः परस्मिन्निति स्थानिवत्त्वेन सम्प्रसारणत्वेऽपि तेनैव स्थानिवत्त्वेनोकारव्यवधानात्कथन्निषेध इति वाच्यम्, व्यथ इति सूत्रे यग्रहणेनैव सिद्धौ अस्य सामर्थ्याद्व्यवहितेऽपि प्रवृत्तेः यूनस्तिरिति निर्देशाच्च। नच कार्यकालपक्षे संज्ञाशास्त्रस्य इग्यण इत्यादेर्विधिशास्त्रेण सह पदैकवाक्यतयाऽन्वये निमित्तस्याजादिप्रत्ययादेर्यणान्वयेन तत्परकाव्यवहितपूर्वस्य यणः सम्प्रसारणमिग्भवतीत्यर्थे येन नाव्यवधानन्यायेन पूर्वस्य सम्प्रसारणाप्राप्तावेदं सूत्रं व्यर्थमेवेति वाच्यम्, भाष्यसिद्धान्ते उक्तपक्षेऽपि संज्ञासूत्राणां वाक्यभेदेनैव सम्बन्धादुक्तार्थस्याप्रामाणिकत्वात् अत्र चेदमपि सूत्रं ज्ञापकम्। लक्ष्ये लक्षणन्यायेन तु न सिद्धिः, कार्याश्रयवर्णभेदेन लक्ष्यभेदादिति दिक् ॥३५॥

पथिमथ्यृभुक्षामादित्यत्र प्राच्यनव्ययोर्मतमविकलं लिख ॥३६॥

ननु—आदिति निरनुनासिकोच्चारणेऽपि तपरसूत्रस्यानणीव विधीयमानेऽपि विध्यर्थत्वान्नस्यान्तरतम्यादनुनासिकः कुतो न, तपरसूत्रे चाप्रत्ययग्रहणानुवृत्तौ मानाभावादिति चेन्न। आआदिति प्रश्लेषेण विशेष्यविशेषणभावेनान्वयेन शुद्धव्यक्तेरेव विधानेनादोषादिति प्राञ्चः। नव्यास्तु—प्रतिपत्तिलाघवादनुनासिकस्यैवोच्चारणे कर्त्तव्ये तदनुच्चारणाच्छुद्धस्यैव विधानमिति भाष्ये उक्तम्। किञ्च सिद्धान्तभूते गुणा

अभेदका इति पक्षे जातिपक्षे च तपरसूत्रप्राप्तस्यापि सवर्णग्रहणस्य अप्रत्यय इति वाक्यभेदेन प्रतिषेधस्य भाष्यसम्मतत्वम्, अतएव भाष्ये अप्रत्यय इत्यनेनैकदेशानुमत्या भाव्यमानेन सवर्णानां ग्रहणन्नेति परिभाषा सर्वप्रतिषेधार्थं ज्ञापिता। यत्तु पथीयतेः क्विपि पन्था इत्यत्र शुद्धार्थं निरनुनासिकोच्चारणमिति तन्न, उक्तभाष्यविरोधात्। नचात्र आदित्येवास्तु नकारेकारयोरत्वे सवर्णदीर्घेण रूपसिद्धिः; पररूपन्तु न पथिमथ्यृभुक्षां लोपः भस्य टेः इतोत्सर्वनामस्थाने इति न्यासेनैव सिद्धावकारविधानसामर्थ्यादिति वाच्यम्, ज्ञानगौरवपरिहारेण स्पष्टार्थमाकारोच्चारणादिति प्राहुः ॥३६॥

अष्टन आ विभक्ताविति्यत्र हलीत्यपकर्षे आत्वादिविषये च का वाचो युक्तिरिति संक्षेपेण भण ॥३७॥

अत्र रायो हलीत्यतो हलीत्युभयोः शेष इति भाष्याद्धलीत्यपकृष्यते तेन अष्टानामित्यत्र हलीत्यपकर्षसामर्थ्यात्पूर्वं नुटि सन्निपातपरिभाषाया अनित्यत्वमाश्रित्यात्वसिद्धिः। अन्यथा नित्यत्वादात्वे अनान्तत्वेन षट्संज्ञाया अप्राप्त्या नुडनापत्तिः। नच यथोद्देशपक्षेऽन्तरङ्गत्वाज्जातायाःषट्संज्ञाया एकदेशविकृतन्यायेन कृतात्वेऽप्यानयनमिति न दोष इति वाच्यम्, षट्संज्ञाया अल्विधित्वेन तन्मूलककार्यस्याप्यल्विधित्वात्तत्रोक्तन्याया ऽप्रवृत्तेरिति प्राचीनाः। नव्यास्तु—नान्तसंख्यावाचकत्वसमानाधिकरणधर्मविशेषरूपस्य षट्त्वस्य स्थान्यलधर्मत्वाभावेन तन्मूलकनुडादेरपि अल्विधित्वाभावेन स्थानिवत्त्वेनैकदेशविकृतन्यायेन वा नुट्सिद्धौ हलीत्यपकर्षफलं मुख्ये कार्यकालपक्षे बोध्यमित्याद्याहुः ॥

ननु अष्टन इति सूत्रे हलीत्यपकर्षादष्टाविति्यादौ कथमात्वमिति चेन्न, अष्टनो दीर्घादित्यत्र दीर्घग्रहणेन आत्वस्य वैकल्पिकत्वबोधने लाघवादष्टभ्य इति वक्तव्ये कृतात्वानुकरणं व्यर्थं सज्जश्शसोर्विषयेऽप्यात्वं ज्ञापयतीत्यदोषात्। अर्थाद्धलीत्यपकृष्यमाणं वाक्यभेदेन पुनर्विधानार्थं तेनाष्टन इत्यस्य क्वचिदच्वपि प्रवृत्तिरिति। नच ज्ञापितेऽपि

व्यर्थमेव दीर्घग्रहणम्, तथाहि अष्टाभिरित्यत्र परत्वाज्झल्युपोत्तममित्यनेन वाधे सकृद्गतिन्यायेन पुनरप्रवृत्तेः नहि, अष्टाभिरित्यत्र झल्युपोत्तममित्यस्य प्राप्तिः। कार्यकालपक्षेऽनान्तत्वेन षट्त्वाभावात् अल्विधित्वेन स्थानिवत्त्वाभावाच्चेति वाच्यम्, दीर्घग्रहणेनैव सकृद्गतिन्यायाऽनित्यत्वस्य एतद्विषये यथोद्देशपक्षस्यैवाश्रयणमित्यस्य च ज्ञापनेन नान्तसंख्यावाचकत्वसमानाधिकरणधर्मविशेषरूपस्य षट्त्वस्याल्धर्मत्वाभावेन च आकारान्ते स्थानिवद्भावेनैकदेशविकृतन्यायेन वा षट्त्वमादाय झल्युपोत्तममित्यस्य प्राप्त्या अष्टनो दीर्घादित्यस्यापवादत्वादिति प्रोचुरिति दिक् ॥३७॥

प्रियाष्टन्शब्दे को विवादः प्राच्य-नव्ययोरिति सप्रमाणमुपपाद्य यथालक्षणमप्रयुक्ते इत्यस्य सयुक्तिकं व्याख्या कार्या ॥३८॥

अष्टाभ्य इति बहुवचननिर्देशेन गौणे औशोऽप्रवृत्तावात्वज्ञाप्यत्वमपि प्राधान्ये एवेति न प्रियाष्टन्शब्दे तयोः प्रवृत्तिरिति प्राञ्चः। नव्यास्तु ष्णान्तेति सूत्रस्थभाष्येणास्यानभिधानत्वमेवेति विफलः प्रयासः। तथाहि—अष्टानामिति सिद्धये ह्रलीत्यपकर्षमुक्त्वा तत्र पक्षे प्रियाष्टौ प्रियाष्टा इति न सिद्ध्यति प्रियाष्टानौ प्रियाष्टान इति प्राप्नोतीति शङ्किते यथालक्षणमप्रयुक्ते इति समाहितम्, तत्र यथालक्षणमिति प्रतीकमुपादाय कैयटेनोक्तम्, यस्य विशिष्टप्रयोगो न स्मर्यते नापि प्रयोगनिषेधस्मृतिस्तद्यथालक्षणमनुगन्तव्यन्तदत्र माभूदात्वमित्यर्थ इत्येकमर्थमुक्त्वा नैवचा लक्षणमप्रयुक्ते वर्त्तते प्रयुक्तानामेव लक्षणेनान्वाख्यानादिति व्याख्यानान्तरमुक्तम्, अनयोरन्त्यव्याख्यानमेव ज्यायः, अप्रयुक्ते लक्षणाभावस्यैव योग्यता नतु लक्षणप्रवृत्तेरित्यर्थसङ्गतेः। आद्यव्याख्यायामप्रयुक्ते इति वाक्यशेषासङ्गतिः प्रयुक्तेऽपि लक्षणानतिक्रमात् प्रयुक्तानामिदमन्वाख्यानमित्यन्यत्र भाष्योक्तेश्च। एवञ्चैषामनभिधानं स्पष्टमेव। अतएव भाष्ये विभाषा आत्वं यदयमात्वभूतस्य ग्रहणं करोति अष्टाभ्य इति अन्यथा अष्टन इत्येव ब्रूयादित्युक्तम्, प्राचीनरीत्या गौणे प्रवृत्यभावाय बहुवचननिर्देशस्यावश्यकतया भाष्यासङ्गतिः स्पष्टैवेत्याद्याहुः ॥ ३८ ॥

'पृथक्स्थाता पयः स्थितिरि'त्यादौ संयोगादिलोपः कुतो नेति सप्रपञ्चं लिख ॥ ३९ ॥

ननु—झलो झलीति लोपेनैव उत्थानमिति सिद्धावुदः स्थास्तम्भोरिति सूत्रं किमर्थमिति चेन्न, अत्र झलीति झलादिप्रत्ययपरमिति बोधनेन चारितार्थ्यात् । एवञ्च स्कोरिति सूत्रेऽनुवर्त्तमानं झलीति अर्थाधिकारानुरोधाज्झलादिप्रत्ययपरन्तेन पृथक्स्थातेत्यादौ न दोषः । सङीतिवार्त्तिकाच्च सनः सकारमारभ्यमहिङो ङकारेण सङिति प्रत्याहारस्तेन सङ्पर एव लोपप्रवृत्तिः । केचित्तु अप्रत्यये संयोगादिलोपप्राप्तियोग्योदाहरणानामनभिधानमेवोचितम्, सङीति वक्तव्यं काष्ठ्शक्स्थातेति वार्त्तिकस्य प्रत्याख्यानपरेण काष्ठशगेव नास्ति कुतः काष्ठ्शक्स्थातेति भाष्येण तथैव लाभादित्याहुः । प्रत्याख्यानमेकः देश्युक्तिसङीति वक्तव्यमेवेति दिक् ॥ ३९ ॥

शेषे लोप इत्यत्र अन्त्यलोपे टिलोपे च युक्तिं लिख ॥ ४० ॥

साम आकमित्यत्र अन्त्यलोपे सति प्राप्तस्य सुटो निवृत्त्यर्थं ससुट्कनिर्देशोऽन्त्यलोपपक्षज्ञापकः, एवं भ्यसोऽभ्यमित्यत्र नचादेशो हलादिरस्तीति अभ्यमित्येव तु छेदः शेषे लोपे सिद्धं युष्मभ्यमिति भाष्येण टिलोपपक्षोऽपि भाष्यसम्मतः,कथमुभयोः पक्षयोः सम्भव इतिचेच्छृणु। शेष इत्यस्यावृत्त्या एकस्य विभक्तिविशेषणत्वेन आत्वयत्वेत्यादिमूलोक्तार्थः । द्वितीयस्य तु स्थानिनोऽधिकरणत्वविवक्षया शेषस्य लोप इत्यर्थ इत्युभयोः सम्भवः । वस्तुतः शेषस्य लोप इत्यर्थे फलाभावः । नच त्वं स्त्रीत्यादौ टावभावार्थ इति वाच्यम्, वुद्धावित्यत्रैव सन्निपातपरिभाषयैव टाव्वारणसम्भवात् । अतएव शेषग्रहणं भाष्ये प्रत्याख्यातम् । नच शेषग्रहणाभावे आत्वयत्वनिमित्तेतरेत्यर्थः कथमितिवाच्यम्, विशेषविहिताभ्यामात्वयत्वाभ्यां स्वविषये लोपस्य बाधेनैव तल्लाभसम्भवात्, अतएव यूयमित्यादौ प्राप्तशोभाववारणार्थं मकारप्रश्लेषो भाष्योक्तः संगच्छते । ससुट्निर्देशप्रत्याख्यानापेक्षया शेषग्रहणप्रत्याख्यानमेव ज्याय इति दिक् ॥ ४० ॥

मपर्यन्तस्येत्यत्र परिग्रहणफलविचारे प्राच्यनव्ययोर्विचारः सप्रमाणं युक्तियुक्तञ्च दर्शनीयः ॥ ४१ ॥

अत्र परिग्रहणाभावे यत्रमान्ते युष्मदस्मदी तत्रैव स्यात् सामानाधिकरण्येनान्वयस्यौचित्यात् परिग्रहणसत्त्वे तु सामर्थ्याद्युष्मदस्मदोर्यौ मपर्यन्ताविति व्याख्यानाद्दान्ते व्यपदेशिवद्भावेन युष्मयत्यादेः किपि सुपि च सिद्ध्यतीति प्राञ्चः । नव्यास्तु—परिग्रहणस्य वैयधिकरण्यान्वये मणिमन्त्रादिन्यायेन नियामकत्वकल्पने मानाभावात् । अत एव भाष्ये अवधिद्योतनार्थं परिग्रहणं कर्तव्यं मान्तस्येत्युच्यमाने यत्रैव मान्ते युष्मदस्मदी तत्रैव स्युः, क्व च मान्ते युष्मयत्यादेरप्रत्यय इत्युक्तम्, तत्रैवैत्यस्यानिष्ट एवेत्यर्थः । अतएव भगवता प्रयोगदर्शनं न कृतम्, अवधिद्योतनार्थमित्यस्य अन्तशब्दस्यावधिवाचकताद्योतनार्थमित्यर्थः । लोके कटिपर्यन्तं वास इत्युक्तेऽग्रे किञ्चिदस्तीति नियमेन प्रतीतेः पर्यन्तशब्देन मान्तापेक्षयाशेषस्य लाभः । मपर्यन्तेत्यत्र तद्गुणसंविज्ञानो बहुव्रीहिरित्याहुः ॥ ४१ ॥

यूयं वयमित्यत्र नागेशविलास विशद्य लिख ॥ ४२ ॥

अत्र शेषविभक्तिभूतामादियुष्मदादिसन्निपातेन जातस्यान्त्यलोपस्य तद्विघातकश्यादिनिमित्तत्वं नेति सन्निपातपरिभाषयैव श्याभावे सिद्धे मूलोक्तप्रयासो विफलः । सुटस्त्वाकमवयवत्वान्न तेन सन्निपातविघात इति ससुट्कनिर्देशः । मूलोक्तन्तु सर्वथाऽयुक्तं भाष्यानुक्तेः । अतएव नेतराच्छन्दसीति भाष्ये नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशाविप्रतिषेधेनेति वार्त्तिकं व्याख्याय तेषु कृतेषु पुनः प्रसङ्गाच्छिशीविधयः कस्मान्न भवन्तीत्याशङ्क्य सकृद्गतिन्यायेन समाहितम्, मूलोक्तरीत्या पुनः प्रसङ्गस्यैवाभावेन तदसङ्गतिः । अङ्गवृत्तपरिभाषया वारणमपि चिन्त्यम्, तस्या अङ्गसम्बन्धिकार्यविषयत्वाल्लक्ष्यसिद्धये भाष्येऽव्यवहृतत्वाच्चेति दिक् ॥ ४२ ॥

साम आकमित्यत्र कः प्रपञ्चो नागेशेन प्रपञ्चित इति लिख ॥४३॥

युष्माकमित्यादौ सत्याकमि अन्त्यलोपे सुटः प्राप्तिः सति च सुटि आकमः प्रसक्तिरित्येवं रीत्या चक्रकदोषात्कथं सूत्रसार्थक्यमित्याशङ्क्य

भाविनः सुटो निवृत्त्यर्थं ससुट्कनिर्देश इत्युक्तम्, तस्यायं भावः—आम्येव साम्त्वस्याहार्यारोपेणाकमादेशः। एवञ्च स्थानिवत्त्वेनापि साम्त्वमेव नत्वाम्त्वमिति सुडादेरप्राप्तिः। नच यत्र साम्भावी तत्रैवायमिति वाच्यम्, उक्तरीत्या सामो भावित्वस्य सर्वथा दुरुपपादत्वात्। अतएव अतित्वाकमिति भाष्यप्रयोगः सिद्धः। वस्तुतः शब्दानित्यत्ववारणाय आदेशस्थले सर्वत्र बुद्धेरेव विपरिणाम इति साम् बुद्धिप्रसङ्गे आकम्बुद्धिः कर्त्तव्येति सूत्रार्थः। अत्र च साम्बुद्धिप्रसक्तेः साम्प्रतिक्या असंभवाद्धाविन्या ग्रहणं सकारोच्चारणसामर्थ्यादिति भाष्ये स्पष्टमिति दिक्॥ ४३॥

एकतिङ्वाक्यमित्यत्र का वाचोयुक्तिरिति सुस्पष्टं लिख॥ ४४॥

अत्र बहुव्रीहिवलादेकतिङन्तघटितमित्यर्थः, तेन पचतीत्येतन्मात्रस्य न वाक्यत्वम्। नच पश्य मृगो धावतीत्यत्र भाष्योक्तैकवाक्यत्वानुपपत्तिरिति वाच्यम्, तिङ्ङतिङ इति सूत्रस्वरसेन एकतिङन्तार्थमुख्यविशेष्यकवाक्यस्यैवैकवाक्यत्वात्। इदञ्च स्वशास्त्रकार्योपयोग्येकवाक्यत्वलक्षणम्। लौकिकैकवाक्यत्वञ्च 'सुप्तिङन्तचयोवाक्यं क्रिया वा कारकान्विते'त्यमरेणोक्तम्। अत्र वा शब्दश्चेदर्थे कारकान्वितक्रिया चेद्बोध्येत्यर्थः। तत्र सुप्च तिङन्तश्च सुप्तिङन्तं सुव्विशिष्टं तिङन्तं सुप्तिङन्तं तेषामेकशेषस्तथा च कारकान्वितक्रियाबोधकसुबन्तचय तिङन्तचय सुप्तिङन्तचयानाञ्च वाक्यत्वसिद्धिः। देवदत्तेन शयितव्यमित्याद्याद्यम्, पचति भवतीत्यादि द्वितीयम्, चैत्रः पचतीत्यादि तृतीयम्, अधिकन्तु अन्यत्रेति दिक्॥ ४४॥

अन्त्यसदेशस्येति परिभाषा विवदमानमतनिरासेन सफलं व्याख्येया॥ ४५॥

अदमुयङ्ङिति सिद्धये अनन्त्यविकारेऽन्त्यसदेशस्येति परिभाषा भाष्ये वचनरूपेण पठिता न अन्त्यस्य विकारो येन तस्मिञ्छास्त्रे अन्त्यसदेशस्येत्युपतिष्ठत इति परिभाषार्थः। एतत्फलितार्थमेव मूले

अन्त्यसदेशानन्त्यसदेशयोरेकप्रयोगे युगपत्प्राप्तावन्त्यसदेशस्यैवेति तामर्थतः परमसूले पठति अन्त्यबाधे इत्यादि। अन्त्यस्य बाधे कार्यप्राप्ता-वित्यर्थः। अत्र प्राचीनाः, कार्यकालपक्षे अल्लोपो नः सान्तमहत इत्यादे-र्थजादिस्वादिपरो योऽन्त्यर्थे अनस्तद्धणेत्यादेः सर्वनामस्थानपरो यः सान्तसंयोग इत्याद्यर्थं हंसशिरांसीत्यादेश्च सिद्धया वृथेयं परि-भाषेति प्राहुस्तदसत्। आकडारीय भपदसंज्ञादिविषये यथोद्देशपक्ष-स्यैव भाष्ये सिद्धान्तितत्वेन अल्लोपोऽन इत्यादेस्तादृशार्थलाभात् अनेकक्लिष्टकल्पने ज्ञानगौरवाच्च भाष्ये क्वचिद्दृश्यमानस्तादृशार्थस्तु एकदेशिन एवेति न विरोधः। प्रत्ययस्याङ्गांशे उत्थिताकाङ्क्षत्वेन तत्रैवान्वयस्यौचित्यात्। अतएव सर्वफलानामन्यथासिद्धिं प्रदर्श्यापि तस्माद्यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा कर्त्तव्येति भाष्ये उपसंहृतम्, अन्त्यसदेशत्वञ्च अन्त्यवर्णतद्वर्णयोरितराव्यवधानत्व-मिति चलीकृल्प्यते इति विद्धो यून इति च नास्याः फलम्, अन्येन व्यवहितत्वात्। इदमत्र बोध्यम्, अदमुयङ्ङितिशब्दस्य इति भवित-व्यमिति भाष्योक्त्याऽप्रयुक्तत्वं सूचितमिति दिक्॥ ४५॥

उभे अभ्यस्तमित्यत्र विवदमानमतनिरासेन स्वसिद्धान्तं सप्रमाणं भण॥ ४६॥

अत्रोभेग्रहणं सामर्थ्यात्सहभावोपसर्जनद्वित्वविशिष्टार्थकन्तेन समु-दित इत्यर्थलाभ इति प्राञ्चस्तन्न, अशब्दार्थत्वात्। अतएव भाष्ये असति प्रयोजने उभेग्रहणं सहार्थं विज्ञास्यत इत्युपहसितम्, अतएव भाष्ये गर्गदण्डन्यायेन समुदाये वाक्यपरिसमाप्तिरिति समुदित इत्यर्थसिद्धि-माश्रित्य सहग्रहणं कर्त्तव्यमिति वार्त्तिकं प्रत्याख्यातम्, तुल्यन्याया-त्सहार्थकत्वेन प्राचीनाभिमतमुभेग्रहणञ्च प्रत्याख्यातमेव। नच उभे यत्र श्रूयेते तत्रैवाभ्यस्तसंज्ञार्थमुभेग्रहणं तेन ऐर्त्सन्नित्यत्र जुस्नेति भाष्ये उक्त्वा शपैकादेशस्य पञ्चमीसमासे स्थानिवत्त्वाज्जुसोऽप्राप्तौ असति प्रयोजने उभेग्रहणं सहार्थमित्युक्तं, तेनोभे यत्र श्रूयेते इत्यर्थेऽपि प्रत्यै-षिषन्निति सिद्धये आवश्यकेन पञ्चमीसमासेन सिद्धे उभेग्रहणं सहार्थ-

मिति भाष्याशयो विरुद्ध इति वाच्यम्, द्व्यादिशब्दानामेकापायेऽप्रयोगेण ऐत्सन्निति सिद्धावुक्तभाष्यस्यैकदेश्युक्तित्वकल्पनेनादोषादिति दिक् ॥४६॥

अन्वादेशे नपुंसके एनद्वक्तव्य इत्यत्र प्राच्यनव्ययोर्विवादो विवेचनीयः ॥४७॥

अत्र परमप्राचीना अम्येवाऽयं प्रवर्त्तते तस्य च लुका लुप्तत्वेऽपि वचनसामर्थ्यात्प्रत्ययलक्षणमित्याहुः। दीक्षितमते तु द्वितीयाटौस्वेन इति सूत्रे एव एनद्वक्तव्यः, तथा च पुँल्लिङ्गे स्त्रीलिङ्गे च त्यदाद्यत्वेन एनमित्यादिसिद्धम्, नपुंसके तकारोच्चारणसामर्थ्येन लुका लुप्तेऽपि अमि एनदादेशे एनदिति; नचैनदस्त्यदाद्यपवादत्वेन येन नाप्राप्तिन्यायेन तद्विषये त्यदाद्यत्वाप्राप्तिरिति वाच्यम्, त्यदाद्यत्वेन सिद्धमिति भाष्येणानपवादत्ववोधनात्। नचैवं एनं श्रितक एतच्छ्रितक इति समासेऽपि एनदापत्तिरिति वाच्यम्, एकपदाश्रयत्वेनान्तरङ्गे स्वमोर्लुकि चरितार्थ्येन बहिरङ्गे सामासिके लुकि एनदोऽप्रवृत्तेरिति। नवीनमते तु भाष्ये नपुंसकैकवचने एनद्वक्तव्यः कुण्डमानय प्रक्षालयैनदित्युक्त्वा अन्यत्रैनो वक्तव्य इति स्पष्टमेवोक्तम्, यद्येनत्क्रियते एनो न वक्तव्यः त्यदाद्यत्वेन सिद्धमिति भाष्यन्तु यदि गर्भतया एकदेशिनोक्तमिति न मदुक्तार्थे बाधकम्, यथालक्षणमप्रयुक्ते इत्यत्रत्यभाष्येण अन्वादेशविषये समासस्यानभिधानेन एतच्छ्रितक इत्यस्यानभिधानमेवेति दिक् ॥४७॥

नरजानां संयोग इत्युक्तिः साध्वी न वेति सप्रमाणं लिख ॥४८॥

वहुर्जिनुम् प्रतिषेध इति वार्त्तिकस्वारस्येनेयमुक्तिः साध्वी, अचः परो यो झल् तदन्तस्य नुमिति। तत्प्रत्याख्यातृभाष्यमते तु नुमोऽत्र प्राप्तिरेव नेत्यसाध्वी। नचैवं कुण्डानीत्याद्यसिद्धिरिति वाच्यम्, इकोऽचीति सूत्रे अचः सर्वनामस्थाने इत्यनुवृत्त्या वाक्यभेदेन अजन्तस्य क्लीवस्य तंत्र नुम्विधानाद् अचः परझलृत्वजातेराश्रयणात्काष्ठतंक्षीत्यादौ न दोष इति दिक ॥४८॥

तद्धितश्चाऽसर्वविभक्तिरित्यस्यार्थे प्रमाणयुक्तिभ्यां विशद्य लिखा॥४६॥

ननु—यस्मात्सर्वाविभक्तिर्नोत्पद्यते इत्यर्थस्य सर्वथाऽसम्भवेन कथमियमुक्तिः। तथाहि—संख्याकारकबोधकैः शास्त्रैः सहैकवाक्यतया सुपां विधानमिति पक्षेऽव्ययार्थे संख्यादेरभावात्ततः सुपामप्राप्तिः अव्ययादाप्सुप इति ज्ञापकाश्रयणे च सर्वासान्तासां प्राप्तिः, स्वादिशास्त्रेण विहितानां नियम इति पक्षे तु सर्वेष्वर्थेषु विधेयतया प्रधानप्रत्ययानुरोधेन गुणभूत-तावत्प्रकृतिभेदकल्पनेन सर्वाविभक्त्युत्पत्तौ लोपेनेव नियमेन जातस्य निवृत्तिः कल्प्या। प्रत्ययनिवृत्तौ च कल्पितगुणीभूतप्रकृतिरूपं स्वत एव निवर्त्तते। नियमशास्त्रसामर्थ्याच्च भुक्तवन्तश्चति माभुङ्क्था इति न्यायबाधः। नियमश्च अर्थनियम-प्रत्ययनियमभेदेन द्विविधः। प्रकृतार्थापेक्षप्रत्ययनियम-सामान्यापेक्षप्रत्ययनियम इति भेदेन अन्त्यः पुनर्द्विविधः। कर्माद्यर्थयोग्यप्रातिपदिकाच्चेत्कर्मणि विभक्तिस्तदा द्वितीयैव कर्मादिरहिते तद्योग्यप्रातिपदिकार्थे प्रातिपदिकात्प्रथमैवेत्यादिरर्थनियमः। अत्र पक्षे विभक्तीनामनियतत्वेन अव्ययेभ्यः सर्वाः सप्तापि प्राप्नुवन्ति। कर्माद्यर्थयोग्यप्रातिपदिकाच्चेद्द्वितीया तदा कर्मण्येव नकरणादौ, कर्मादियोग्ये तद्रहितप्रातिपदिकार्थे एव प्रथमा न कर्मादौ, संख्यावदर्थयोग्यप्रातिपदिकादेकत्वादावेवैकवचनादि न द्वित्वादावित्यादि प्रकृतार्थापेक्षप्रत्ययनियमः। अस्मिन्नपि पक्षे अव्ययेभ्यः सर्वा विभक्तयो लभ्यन्ते। प्रातिपदिकाच्चेद्द्वितीया तदा कर्मण्येव नाऽन्यत्र। प्रातिपदिकाच्चेत्प्रथमा तदा कर्मादियोग्यतद्रहितप्रातिपदिकार्थे एवेत्यादिः सामान्यापेक्षप्रत्ययनियमः। अत्र पक्षे अव्ययेभ्यो विभक्तिप्राप्तिरेव नेति भाष्ये स्पष्टमिति चेन्न, भाष्ये द्विबहोर्द्विवचनबहुवचने एकवचनमिति योगं विभज्य द्वित्वबहुत्वयोर्द्विवचनादेर्विधानादेकवचनस्यैकत्वे सिद्धा एकवचनमिति योगं व्यर्थं सदप्राप्तप्रापणार्थमिति कर्माद्यभावेऽप्येतत्प्रवर्त्तते इति विनिगमनाविरहात्सर्वविभक्त्येकवचनमव्ययेभ्य इत्यदोषात्। अतएव अव्ययादाप्सुप इति सूत्रे प्रत्याहारग्रहणम्। प्रथमातिक्रमे कारणाभावाद् अनेकनियमबाधे गौरवाच्च प्रथमैकवचनस्यैवानेनोत्सर्गत्वं बोध्यते इति कैयट-

स्तन्न, स्वादिसूत्रे प्रथमायाः प्राथम्येऽपि नियमशास्त्रपर्यालोचनया द्वितीयाया अपि प्राथम्येन तस्या विनिगमकत्वादिति दिक् ॥४६॥

गौणेऽव्ययसंज्ञाया वारिकां युक्तिं साकल्येन लिख ॥५०॥

अत्युच्चैसावित्यादौ समासेऽवयवभूतोच्चैःशब्दादव्ययात्परत्वेन लुकमाशंक्य विहितविशेषणेन समाधाय प्रयोजनं सर्वनामाव्ययसंज्ञायामिति भाष्योक्तवाचनिकतदन्तविधिना समुदायस्याव्ययत्वमाशङ्क्य तथापि न गौणे इति मूले समाहितम्, तस्यायम्भावः—सामानाधिकरण्यसम्बन्धेन लिङ्गाद्यनन्वय्यर्थबोधकत्वविशिष्टाव्ययपदवत्त्वेन ह्यव्ययपदं बोधकमिति तादृशमहासंज्ञाकरणात्तादृशार्थानां गणेऽनुकरणावश्यकत्वे इतरेषामनुकरणे मानाभावेन समुदायस्य नाव्ययत्वमिति इदमत्रत्वम्, प्रधानाप्रधानन्यायेन सर्वनामसंज्ञासाहचर्येण च प्रसिद्धान्तरङ्गपदान्तरानपेक्षानुपसर्जनीभूतस्यैव लिङ्गाद्यनन्वयिनोऽर्थस्यात्र ग्रहणेन प्रकृते न समुदायस्य नाप्यवयवस्य संज्ञा। अतएव भाष्ये उपसर्जनप्रतिषेधानुवृत्त्याऽत्युच्चैसावित्यादावव्ययत्वाभावमुक्त्वा तत्प्रत्याख्यानरीत्यैवात्राप्येतत्प्रत्याख्यातम्। उच्चैरौ उच्चैराभ्यामित्यादेरभिधाने तु न मानं भाष्यानुक्तेरिति दिक ॥ ५० ॥

स्त्रियामिति सूत्रव्याख्याने का प्रतिपत्तिर्नागेशस्येति सकलं सप्रमाणं लिख ॥ ५१ ॥

'स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृत' इति लौकिकलिङ्गलक्षणस्य खट्वाद्यचेतनेऽसम्भवेन सत्त्वादिगुणानामुपचयापचयस्थिति-(साम्य)रूपं क्रमेण पुंस्त्रीनपुंसकाख्यम्, एकार्थं शब्दान्यत्वाद्दृष्टं लिङ्गान्यत्वमिति भाष्योक्तेः शास्त्रीयमिदं लिङ्गमर्थनिष्ठं केवलान्वयि। यद्यपि इयं व्यक्तिः, इदं वस्तु, अयं पदार्थ इति त्रिविधव्यवहारस्य पदार्थमात्रे सत्त्वात्कथं लिङ्गनिर्णयस्तथापि केनचिच्छब्देन किञ्चिद्वस्तु एकैकलिङ्गविशिष्टमेव केनचित्पर्यायेण लिङ्गद्वयविशिष्टमेव केनचिल्लिङ्गत्रयविशिष्टमेवेति लिङ्गानुशासनकोशादितो निर्णेयम्। लिङ्गन्तु सर्वत्र

द्योत्यमेव, द्योतकास्तु विसर्गादयः। अत एव च तस्य विशेषणत्वम्, प्रत्ययार्थत्वे तु तस्य विशेष्यतापत्तिः, अतएव वागादिषु विनापि टाबादिकन्तस्य बोध इत्यादिकमवोचत् ॥ ५१ ॥

शूद्राचाऽमहत्पूर्वाजातिरित्यत्र प्राच्यनव्ययोर्मतमविकलं लिख ॥५२॥

अत्र प्राचीनाः—अजादिगणे शूद्रेत्येव पाठ्यम्, गौणमुख्यन्यायेन मुख्ये कार्यसम्प्रत्ययाज्जातिलक्षणो ङीषेव बाधिष्यते। पुंयोगे हि गौणीवृत्तिरिति सिद्धान्तः। एवममहत्पूर्वा इत्यपि न कार्यम्, महाशूद्रीत्यत्र महाशूद्रशब्दो हि विशिष्ट एव जात्यन्तरे वर्त्तते। तत्रावयवस्यानर्थकतया शूद्रशब्दार्थसमवेतस्त्रीत्वाभावेन टापोऽप्रवृत्तेः। महती चासौ शूद्रेत्यर्थे महाशूद्रेतीष्टमेवेत्याहुः। नव्यास्तु—सदृशलाक्षणिकत्वमप्रसिद्धत्वञ्च गौणत्वमित्येव भाष्यादिसम्मतम्, नतु लाक्षणिकत्वापरपर्यायम्, अतएव अजस्य स्त्रीत्यर्थे अजेत्येव भाष्ये उक्तम्। गौणमुख्यन्यायस्य पदकार्यविषयत्वेनेहाप्रवृत्तिश्च। एवञ्च शूद्रा च जातिरिति योगे जातिरित्यस्यावश्यकत्वमेव, अन्यथा पुंयोगे टाबापत्तिः। एवं जातिरित्यनुवृत्तिसहितस्यामहत्पूर्वेत्यस्याप्यावश्यकत्वमेव। अन्यथा जात्यन्तरनिवृत्तिपरत्वेन पूर्वं जातिमात्रविवक्षया महच्छब्दस्य शूद्रशब्देन कुक्कुटाण्डवत्समासे ततः स्त्रीत्वविवक्षायां महती शूद्रेत्यर्थे महाशूद्रेत्यत्र जातिलक्षणो ङीष् स्यात्। आभीरी तु महाशूद्रीत्यमरकोशात् स्मृत्यादिप्रामाण्याच्च अनुलोमसङ्कराणां मातृजातिवृत्तित्वात्तत्र तां जातिमारोप्य शूद्रशब्दप्रयोग इत्ययं शूद्रशब्दोऽर्थवानेवेति तदर्थसमवेतस्त्रीत्वमप्यत्रास्तीति टाप् स्यादतोऽमहत्पूर्वेति। तदर्थसमवेतस्त्रीत्वेऽपि शूद्रशब्दादेव टाप् स्यान्नतु तदन्तात्, ग्रहणवतेति निषेधादिति तदन्तविधिज्ञापकता भाष्योक्ता नासङ्गतेति दिक् ॥ ५२ ॥

डावुभाभ्यामित्यत्रान्यतरस्यां ग्रहणस्य प्रयोजनमुपपाद्य अनुपधालोपिन इत्यस्य नियमार्थत्वं सयुक्तिकं भण ॥५३॥

ननु—निषेधडापोर्विधानादेव पर्याये सिद्धेऽन्यतरस्यां ग्रहणं व्यर्थमिति चेन्न, अन्यतरस्यामितियोगो विभज्यते तत्र योगविभागस्येष्ट-

सिद्धयर्थत्वान्मन इति न सम्बध्यते ततश्चानो बहुव्रीहेर्डाब्वा स्यादित्यर्थः, किमर्थमिति चेत् ऋन्नेभ्य इति विहितेन ङीपा सह विकल्पविधानार्थम्, एवन्तर्हि बहुराज्ञीत्यादिसिद्धौ अनउपधालोपिन इति सूत्रं व्यर्थं सत्, अनो योऽसौ विकल्पः स उपधालोपिनोऽनुपसर्जनस्य बहुव्रीहेरेवेति नियमयति तेनानुपधालोपिनि सुपर्वेत्यादौ न। बहुराज्ञीत्यादौ नियमशास्त्राणां निषेधमुखेन प्रवृत्तिरिति पक्षे ऋन्नेभ्य इत्येव ङीप् विधिमुखेन प्रवृत्तिरिति पक्षेऽनेनेति; एवञ्च बहुधीवरीत्यत्र ऋन्नेभ्य इति ङीपि तत्सन्नियोगेन रादेशः सिद्धयतीति बहुव्रीहौ वेति वचनं भाष्ये प्रत्याख्यातमिति दीक्षितादयः। नवीनास्तु—वचनसामर्थ्याड्डाञ्निषेधयोः पर्याये सिद्धेऽन्यतरस्यामिति स्पष्टार्थमेवेत्याहुरिति दिक् ॥ ५३ ॥

टावृचीत्यत्र प्राच्यनव्ययोः को विशेष इति सोपष्टम्भं लिख ॥५४॥

पूर्वसूत्रप्राप्तङीपोऽपवाद इति प्राञ्चस्तन्न, भाष्ये प्रतिपदविहितसमासान्तानां कपो वैकल्पिकतया तदभावे सावकाशत्वमुक्तम्, तद्वीत्याऽस्यापि पूर्वसूत्रस्य वैकल्पिकत्वेन तदभावे सावकाशत्वेन अपवादत्वासम्भवात्, अतएव भाष्ये पादशब्दसमानार्थकमकारान्तं पदशब्दमङ्गीकृत्यैतत्प्रत्याख्यातम्, एवञ्च ऋच्यपि एकपदी एकपादितीष्यत एव; तथा च सूत्रमते एकपादगिति सिद्धये टावृचीत्यत्रान्यतरस्यां ग्रहणमनुवर्त्यम्, पादन्तस्य ऋच्यनभिधानमिति भाष्याशय इति वक्तुमशक्यम्, ङीबन्तप्रयोगस्य सूत्ररीत्येष्टस्यासिद्ध्यापत्तेः। नषडित्यत्र ङीपोऽनुवृत्तये टावृचीत्यत्र ङीप्सम्बन्धावश्यकत्वेन सूत्ररीत्या ङीबन्तप्रयोगस्येष्टत्वमिति दिक् ॥ ५४ ॥

प्रत्ययस्थादिति सूत्रं सम्यग्व्याख्याय विधौ परिभाषोपतिष्ठते नानुवादे इत्यस्या उपयोगो विविच्य दर्शनीयः ॥ ५५ ॥

अत्र कादित्यत्राकारस्योच्चारणार्थकतया व्यञ्जनमात्रस्य विवक्षितत्वेन पतिकाश्चरन्तीत्यादावकचि इत्वसिद्धिः। पचतकीत्यादिसिद्धये अकत्रः ककारोत्तराकारस्योच्चारणार्थत्वाभ्युपगमादित्याशयेन व्याचष्टे

प्रत्ययस्थककारादित्यादि, वर्णनिर्देश एव हि कारप्रत्ययविधानात्। अनुकार इत्यादिप्रयोगस्तु उच्चैस्तरां वा वषट्कार इति निर्देशरूपयज्ञसाध्यः। नच कारिकेत्यत्राकारेण व्यवधानादाप्परकत्वाभावेन कथमित्वम्, एकादेशेऽपि अचः परस्मिन्निति स्थानिवत्त्वेन व्यवधानमेवेति वाच्यम्, आनन्तर्यांशोपस्थितावपि येन नाव्यवधानमिति न्यायेनाकारव्यवधानेऽपि प्रवृत्तेः। रथकट्येत्यादौ च नातिप्रसङ्गः, अनेकव्यवधानात्। पतिकेत्यादावचः परस्मिन्निति स्थानिवत्त्वेनाकारव्यवधानेऽपि श्रौताव्यवधानमादायेत्वप्रवृत्तिः। नच वर्णग्रहणे पतिकेत्यादावकारद्वयव्यवधानात्कथमित्वमिति वाच्यम्, द्वयोरकारयोरेकादेशे टापा सहैकादेशस्य स्थानिवद्भावादेकेनैवाकारेण व्यवधानात्, पुनः स्थानिवत्त्वन्तु न,लक्ष्ये लक्षणन्यायात्, टापा; सहैकादेशस्य स्थानिवत्त्वं विना पूर्वैकादेशस्य स्थानिव त्त्वन्तु वक्तुमशक्यं तस्य टावेकादेशेनापहारेणादर्शनात्। अत्र कात्पूर्वत्वन्तु अव्यवहितमेव उदात्तस्वरितयोरित्यादाविव अनुवादेऽपि निर्दिष्टपरिभाषाप्रवृत्तेः; विधौ परिभाषेति तु भाष्येऽनादृता तज्ज्ञापकस्य स्थाने ग्रहणस्य प्रत्याख्यानादित्यन्यत्र विस्तरः॥ ५५॥

अनुपसर्जनाधिकारस्याविकलं प्रयोजनं सप्रमाणमुपपादयत॥५६॥

ननु समासप्रत्ययविधाविति तदन्तविधिप्रतिषेधाद्विद्रूपं यत्प्रातिपदिकमित्यर्थेऽपि अवयवेऽचरितार्था अनुबन्धाः समुदायस्योपकारका भवन्ति यं समुदायं यो न व्यभिचरति स तस्योपकारको भवतीति न्यायाभ्यां कुरुचरी बहुकुरुचरेत्यत्र दोषाभावेनानुपसर्जनाधिकारो व्यर्थ इतिचेन्न; स्त्रीप्रत्यये उक्तप्रतिषेधाप्रवृत्तिज्ञापनेन चारितार्थ्यात्। नचैवमपि अनुपसर्जनाधिकारस्य तदन्तविशेषणत्वेन बहुकुरुचरेत्यत्र दोषाभाव इति स वृथैवेतिचेन्न, यावतां विनेति न्यायेन तस्य गृह्यमाणविशेषणत्वज्ञापनेन चारितार्थ्यात्, नचैवमपि स्त्रियामित्यस्यापि गृह्यमाणविशेषणत्वेन प्रकृते दोषाभावेन तद्वैयर्थ्यं स्पष्टमेवेति वाच्यम्; स्त्रियामित्यस्यागृह्यमाणविशेषणताया अपि ज्ञापनेनादोषात्, तेन धीवा-

नमतिक्रान्ताऽतिधीवरीति सिद्धम्। नच कुरुचरस्य यः कुरुचरयस्तस्मादाचारक्विबन्तप्रकृतिककर्तृकिपि अल्लोपयलोपे कुरुचरेत्यत्र ङीभावायानुपसर्जनाधिकारस्य चारितार्थ्येन कथं ज्ञापकतेति वाच्यम्, ज्ञापकतापरभाष्येण एतस्यानभिधानात्; पञ्चगवधन इत्यत्र पञ्चगवेत्यस्यार्थवत्त्वाभावेन प्रातिपदिकत्वाभावादेवाप्राप्तिः; आपिशलिना प्रोक्तमधीते या सा आपिशला ब्राह्मणीत्यत्र प्रोक्ताणः स्त्रियामवर्त्तनेन अध्येत्रणो लुप्तत्वेन चादोषात्, अणो योऽकार इत्यर्थे वर्णाश्रये प्रत्ययलक्षणाभावात्; सति च द्वितदन्तविधौ कौम्भकारेय सिद्धिरिति भाष्ये उक्तम्, अन्यथा कुम्भकारेय इत्यापद्येत। नच—कुम्भेन समासे वृत्तिप्रयोजकैकार्थीभावस्य समुदायवृत्तितया कथमेकदेशात्प्रत्यय इति वाच्यम्, तद्धितार्थेति सूत्रे उत्तरपदग्रहणेन समुदायवृत्येकार्थीभावस्यावयवेनापि क्वचिद्बोधनमिति ज्ञापनेनादोषात्। नच कृद्ग्रहणपरिभाषया समुदायादेव ङीभविष्यतीति न दोष इति वाच्यम्, तस्याः कृन्मात्रविषयत्वेनेहाप्रवृत्तेः। नच कारशब्दस्य व्यपदेशिवद्भावेन अण्णन्तान्तत्वात्ततोऽपि कदाचिन्ङीपि स दुर्वार इति वाच्यम्, ससहाये व्यपदेशिवद्भावाप्रवृत्तेः, तस्यार्थवत्त्वाभावेन प्रातिपदिकत्वाभावाच्च। नच समुदायान्ङीप्यपि स्त्रीप्रत्यये तदादिनियमाभावेन केवलादपि कदाचिद्ङकि स दुर्वार इति वाच्यम्, तदादिनियमाभावेनाधिकस्य कार्यं बोध्यते नतु न्यूनस्येत्यदोषादिति दिक्॥ ५६॥

अपरिमाणेति सूत्रे प्राच्यनव्ययोः को विशेष इति सयुक्तिकं लिख॥५७॥

अत्र परिमाणपदेन 'परिमाणन्तु सर्वत' इति पारिभाषिकमेव गृह्यते कृत्रिमाकृत्रिमन्यायात्, सुवर्णविस्तौ हेम्नोक्ते कम्वल्यमूर्णापलशतमिति कोशवलेनोन्मानभूतविस्तकम्वल्यग्रहणन्तु उन्मानस्य चेद्विस्तकम्बल्ययोरेवेति नियमार्थम्, तेन द्विनिष्कीति सिद्धा, द्विवर्षे भूता द्विवर्षा, द्वाभ्यां शताभ्यां क्रीता द्विशतेति च, तिर्यङ्माने द्विहस्तामित्तिरित्यादौ च निषेधः सिद्धः। काण्डान्तादिति तु क्षेत्रे एवेति नियमार्थन्तेन द्विका-

ण्डीरज्जुरित्यत्र नेति नवीनाः। प्राचीनास्तु परितः सर्वतः आरोहतः परिणाहतश्च येन मीयते तत्परिमाणमिति परिमाणपदं परिच्छेदकमात्रपरन्तु सर्वतो मानार्थकमेव, अतएव भाष्ये विस्तकम्बल्ययोः परिमाणार्थकत्वेन विध्यर्थत्वमुक्तम्। किञ्च संख्यायाः संवत्सरसंख्यस्य चेति सूत्रे भाष्ये परिमाणान्तत्वादेव सिद्धे संवत्सरग्रहणमन्यत्र परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थन्तेनापरिमाणेति सूत्रे परिमाणपदेन कालपरिमाणादेरग्रहणन्तेन द्विशता द्विवर्षेति सिद्धमित्युक्तमित्याद्याहुरिति दिक् ॥५७॥

ञ्येण्येत्यत्र प्राच्यनव्ययोर्मतं सप्रमाणं लिख ॥५८॥

अत्रैतशब्दस्योपसर्जनत्वेऽपि तदन्तमनुपसर्जनमेव अनुपसर्जनादिति चात्र तदन्तविशेषणमेव अतएव गृह्यवृत्तौ नारायणेनात्र बहुव्रीहिं कृत्वाऽनेन ङीबित्युक्तमितिप्राञ्चः। नव्यास्तु अनुपसर्जनादित्यस्य टिड्ढेत्यादौ गृह्यमाणविशेषणत्वस्य क्लृप्ततयाऽत्रापि तथैवौचित्यम्, अतएव उपमानानीति सूत्रभाष्ये शस्त्रीश्यामेत्यादौ श्यामाशब्दः शस्त्र्यामेव वर्त्तते उपमेयन्तु समासवाच्यमिति पक्षे शस्त्रीश्यामो देवदत्त इत्यत्र ह्रस्वत्वं न सिद्ध्यति। यदि चोपसर्जनस्येति ह्रस्वत्वन्तदा कुम्भकपाललोहिनीत्यत्रानुपसर्जनलक्षण ईकारो न प्राप्नोतीत्युक्तम्, तव मते विशिष्टस्यानुपसर्जनत्वेन ङीपि सिद्धे ईकारो न प्राप्नोतीति भाष्यासङ्गतिः स्पष्टैव। एवञ्च ञ्येण्येत्यस्य त्रिषु स्थानेषु एनीत्यर्थो बोध्य इत्याहुः ॥५८॥

वोतोगुणवचनादित्यत्र गुणवचनशब्देन कस्य ग्रहणमिति सप्रमाणमुपपाद्य एतत्सूत्रस्थभाष्योक्तं समर्थयत ॥५९॥

अत्र गुणवचनशब्देन आकडारसूत्रस्थभाष्योपष्टम्भेन समस्तकृदन्ततद्धितान्तसर्वनामजातिसंख्यासंज्ञाशब्दातिरिक्तशब्दो गृह्यते। तत्रहि प्रातिपदिकमात्रस्य गुणवचनसंज्ञामुक्त्वा अग्रे तद्बाधकत्वेन एताः क्रमेण पठिताः। नच लोकप्रसिद्धरूपादीनां गुणवचननिमित्तककार्यं कुतो नेति चेन्न, गुणवचनेत्यन्वर्थसंज्ञया गुणोपसर्जनगुणिवाचकानामेवो-

क्तानामेतत्संज्ञाविधानेन रूपादीनामग्रहणात्। अतएव एतेभ्यो गुणवचनेति ष्यञ् विस्पष्टादीनि चेति स्वरश्च न। अत्र सूत्रे भाष्ये तु "सत्त्वे निविशते उपैति पृथग्जातिषु दृश्यते आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुण" इति गुणलक्षणमुक्तम्, तत्तु बहुविशेषणवैयर्थ्याद् भाष्यकृताऽव्याख्यानाच्चैकदेश्युक्तमिति न प्रपञ्चितं नापि स्वीकृतमिति दिक् ॥५९॥

जातिलक्षणे प्राचीनमतं विविच्य सप्रमाणं स्वमतं लिख ॥६०॥

भिन्नेष्वभिन्नाभिधानप्रत्ययनिमित्तं जातिरिति नित्यमेकमनेकानुगतं सामान्यमिति च दर्शनान्तरीयजातिलक्षणस्य शुक्लादिगुणस्यैकत्वनित्यत्वपक्षे तत्राऽतिव्याप्तिः, एवं जननेन प्राप्यते या सा जातिरिति च जातिलक्षणं युवत्वादावव्याप्तमतो मूले आकृतिग्रहणा जातिरित्युक्तम्। तत्राकृतिरवयवसन्निवेशः, ग्रहणमिति करणे ल्युट्, आकृतिर्ग्रहणं (ग्राहकं) यस्याः सा। तदेवानूद्यते अनुगतसंस्थानव्यङ्ग्येति ईदृशाकारो गौरित्याकृत्युपदेशादिव्यङ्ग्येति यावत्। नचैवमपि बालाद्यवस्थाभेदभिन्नानेकदेहवृत्तिदेवदत्तत्वादेराकृतिव्यङ्ग्यत्वेन तत्राऽतिव्याप्तमिति वाच्यम्, समानकालिकानेकव्यक्तिवृत्त्यनुगतसंस्थानव्यङ्ग्येत्यर्थेनादोषात्। अत्र हि अवस्थाभेदेऽपि तद्भेदाप्रतीतिः-स एवायमिति प्रतीतिः-तज्जातीयोऽयमित्यप्रतीतिश्च तज्जातिबाधिका। अत एव च इन्द्रत्वादिकं न जातिः। यद्यपि उपनिषदादौ पञ्चेन्द्रोपाख्यानादिभिरनेकेषां समकालिकत्वन्तथापि सर्वेषां संस्थानस्यैकत्वे मानाभावः। जलसमीपदेशविशेषो हि तटमित्यनुगतसंस्थानव्यङ्ग्यत्वाज्जातित्वमित्येकस्य जातिलक्षणस्य संक्षेपतो विचारः ॥१॥

ननु अवयवसंस्थानस्य ब्राह्मणादिसाधारण्येन वृषलत्वादिजातेः साक्षादुपदेशगम्यायाः कथं जातित्वमितिचेन्न, लिङ्गानाञ्च न सर्वभागित्यादिद्वितीयलक्षणस्वीकारात्। अस्य च व्याख्यानादिकं मूले स्पष्टम्। अस्मिन्नपि पक्षे एकत्र इन्द्र इत्युपदिष्टेऽन्यत्र तदग्रहणे मानाभावान्नेन्द्रत्वादिकं जातिः। ब्राह्मणत्वन्तु एकत्रोपदिष्टे तत्पित्रादि सुग्रहम्,

वृषलत्वन्तु तदपत्यवत्सहोदरादिषु सुग्रहमिति जातिः। इदमत्र बोध्यम्, आकृतिग्रहणेति लक्षणं नित्यानित्यसाधारणमिति युवत्वादिकमपि जातिरेतन्मते। भाष्ये अपरआहेत्यादिना यावद्द्रव्यभावित्वमिति लक्षणान्तरमनित्यव्यावृत्तये उक्तम्, तथा च भिन्नर्षिकर्तृकलक्षणद्वय-प्रामाण्येन वयोवाचककुमारादिशब्दे जातिकार्यविकल्पः। अतएव युवजातिरित्यत्र पुंवत्त्वं युवतितरेत्यत्र तदभावश्च भाष्ये दर्शित इति॥

ननु अनुगतसंस्थानव्यङ्ग्यत्वाभावेन सर्वलिङ्गत्वेन च औपगवी कठोत्यादौ कथं जातित्वान्ङीषितिचेत्सत्यम्, गोत्रञ्च चरणैः सहेति वचनात्। अस्यार्थस्तु मूले उक्तः। अत्र लौकिकं गोत्रन्तच्चानन्तरापत्य-साधारणमिति प्राञ्चः। नव्यास्तु—शास्त्रीयमेवात्र गोत्रम्, कृत्रिमा-कृत्रिमन्यायात्, अतएव गोत्राद्यूनि प्रत्ययो भवति स्त्रियां लुगिति न्यासे औपगवी माणविकेत्यत्रानुपसर्जनलक्षण ईकारो न प्राप्नोतीति प्रघट्टे युवापत्यस्य जातित्वाभावकथनं संगच्छते। अतएव च ब्राह्मोऽजाता-वितिसूत्रे अपत्ये जातौ नेत्यर्थो भाष्योक्तः संगच्छते, अन्यथा प्राचीन-मते अपत्यस्य जातित्वाव्यभिचारेण तदसंगतिः। ब्राह्मो नारद इत्यु दाहरणासङ्गतिश्चेतिरोत्या शास्त्रीयगोत्रस्यैव ग्रहणमिति सिद्धान्तितम्। वस्तुतस्तु, आकृतिग्रहणेत्येकमेव लक्षणन्तत्राकृतिपदमुपदेशोपलक्षणं, तथा च आकृतिद्वारा साक्षादुपदेशेन वा ग्राह्या जातिरित्यर्थः। लिङ्गा-नामित्यादितु एतत्स्वरूपानुवादकम्, गोत्रञ्चेत्याद्यतिदेशार्थमेव। अत-एव "प्रादुर्भाववियोगाभ्यां सत्त्वस्य युगपद्गुणैः। असर्वलिङ्गां वह्वर्थां तां जातिं कवयो विदुः" इति लक्षणान्तरं भाष्ये उक्तम्, यावद्द्रव्यभावि-नीति तदर्थः। अत एव कः पुनरेतयोर्जातिलक्षणयोर्विशेषः। यथापूर्व-लक्षणं तथा कुमारीभार्य्य इति भाष्ये लक्षणमित्येकवचनमेव प्रयुक्तम्, अतएव च आकडारसूत्रे आकृतिग्रहणा जातिरित्येवोक्तमितिरोत्या वाग्जालं प्रपञ्चितमिति दिक्॥६०॥

नृनरयोरितिवार्त्तिकं सयुक्तिकं व्याख्यायताम्॥६१॥

ननु नारीति नृशब्दस्य सिद्धं नरीति तु पुंयोगे ङीषा दुर्वारम्, अत्र हि जातिरित्यस्यानुवृत्त्या पुंयोगेऽस्याप्रवृत्तिरिति नरग्रहणं व्यर्थ-

मितिचेन्न, नरत्वजातिमात्रविवक्षायां नरीति व्यावृत्त्यर्थं चारितार्थ्यात्। अनेनाद्याकारस्यैव वृद्धिर्व्याख्यानात् । इदमत्र तत्त्वम्, नित्यानां शब्दानां यथाकथंचिदन्वाख्यानं कार्यं रूढ्या सर्वदोषपरिहार इति कैयटोक्त्या नुर्नरस्य च धर्म्या नारीत्यर्थे ऋतोऽञितिसूत्रेण नरस्य चेति वक्तव्यमिति वार्त्तिकेन च नारीति सिद्धौ गणसूत्रमिदं न कार्यम्, रूढ्या योग्यतया तद्धर्म्या नरत्वजातिविशिष्टेव बुद्ध्यते अतएव वस्तुनि भवो वास्तव्य इति दिगादित्वात्संसाध्य वसेस्तव्यत्कर्त्तरीति वचनं भाष्ये प्रत्याख्यातमिति शिवम् ॥६१॥

॥ इति शब्देन्दुसुधायाः स्त्रीप्रत्ययान्तो भागः ॥

प्रातिपदिकार्थत्वविचारे सप्रमाणयुक्तिं प्राच्यमतं नवीनमतञ्चाविकलमुपपाद्य मात्रग्रहणस्य सार्थक्यं समर्थयत ॥१॥

ननु—पञ्चकम्प्रातिपदिकार्थ इति सिद्धान्ते लिङ्गादीनामपि तत्त्वादेव सिद्धे सूत्रे ग्रहणं व्यर्थमितिचेन्न, नियतोपस्थितिकस्यैवात्र तदर्थपदेन ग्रहणमिति ज्ञापनेन चारितार्थ्यात् । तत्र निपूर्वकयम्धातोर्व्यापकत्वमर्थः, आश्रयत्वं क्तप्रत्ययार्थः, व्यापकताया व्याप्यांशे नित्यसाकाङ्क्षतया किञ्चिन्निरूपितव्यापकतेत्याकाङ्क्षायामुपस्थितत्वात्प्रातिपदिकनिरूपितैव गृह्यते। तथाचोच्चरिताभिन्नप्रातिपदिकनिष्ठव्याप्यतानिरूपितव्यापकताश्रयीभूतोपस्थितीयविषयताश्रयः प्रातिपदिकार्थ इति लभ्यते। व्यापकत्वञ्च तत्समानाधिकरणात्यन्ताभावीयप्रतियोगितानवच्छेदकधर्मवत्त्वम्, ततश्च लिङ्गानामुक्तप्रातिपदिकार्थत्वाभावात्स्वांशे चारितार्थ्यम्, अत्रानेकदोषपरिहाराय प्रातिपदिकविशिष्टः प्रातिप्रदिकार्थ इति मन्तव्यः। वै० स्वाभाववत्त्वसम्बन्धेन। अभावीयप्रतियोगितावच्छेदकसम्बन्धश्च स्वजन्यशाब्दबोधीयधर्मितानिरूपितपदार्थसम्बन्धावच्छिन्नप्रकारतावत्त्व-स्वजन्योपस्थितिप्रयोज्यशाब्दबोधनिष्ठभेदीयप्रतियोगितावच्छेदकताश्रयत्वोभयरूपः। अत्र शक्त्यभास्यः सम्बन्धोऽपदार्थसम्बन्धः। एकसत्त्वे द्वयन्नास्तीति कृत्वा सकलदोषः स्वयं परिहार्य इति प्राचीनाशयः ॥

नव्यास्तु—प्रवृत्तिनिमित्तं तदाश्रयो द्रव्यञ्च प्रातिपदिकार्थः। तत्र प्रवृत्तिनिमित्तत्वं वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितीयप्रकारताश्रयत्वम्, यथा घटत्वादिकम्। किञ्च स्वविशिष्टत्वं तत्त्वम्। वै० स्वप्रयोज्योपस्थितिप्रकारताश्रयत्व-स्वविशिष्टापदार्थसम्बन्धावच्छिन्नप्रकारतानाश्रयत्वोभयसम्बन्धेन। द्वितीयवै० स्वप्रयोज्यशाब्दबोधीयधर्मितानिरूपितत्व-स्वेतरपदार्थनिष्ठप्रकारतानिरूपितविशेष्यतासमानाधिकरणत्वोभयसम्बन्धेनेत्यन्यत्र विस्तरः। अत एव लिङ्गग्रहणं सार्थकम्, अन्यथा स्वमोर्नपुंसकादित्यादिप्रामाण्येन लिङ्गस्यापि प्रातिपदिकार्थत्वात्तद्वैयर्थ्यं स्पष्टमेव। तटादिशब्दानामपि लिङ्गं वाच्यमेव, द्योतकास्तु विसर्गादयः। तथा च प्रातिपदिकार्थ इत्यस्य अलिङ्गा लिङ्गप्रवृत्तिनिमित्तकाश्च अव्ययपुमादय एवोदाहरणानि। अन्ये सर्वे लिङ्गाधिक्य इत्यस्य। द्रोणत्वादिप्रवृत्तिनिमित्तकानां द्रोणादिशब्दानां परिमाणत्वेन परिमाणमपि लिङ्गवद्विशेष्यान्वय्येव; ततश्च परिमाणाभिन्नं यद्द्रोणं तत्परिच्छिन्नो व्रीहिरिति बोधः। एवञ्चास्य लिङ्गवत्प्रातिपदिकार्थत्वाभावात्परिमाणग्रहणम्। द्रोणः परिमाणमिति प्रयोगस्तु द्वौ ब्राह्मणाविति‌वद्बोध्य इत्यादिना नियमांशनिवेशे न मानमिति प्रोचुरिति दिक्॥

यत्तु कर्माद्याधिक्ये प्रथमाया अभावार्थं मात्रग्रहणमिति तन्न, सम्बोधने चेति ज्ञापनेन सामान्यत एव कर्माद्याधिक्ये तदप्रवृत्तिज्ञापनेनादोषात्। नच प्रातिपदिकार्थं एवेति नियमात्तदाधिक्येऽप्राप्तौ किं ज्ञापकेनेति वाच्यम्, यथा कर्मण्येव द्वितीयेति नियमेन कर्मत्वाज्ञानसमानकालिकार्थान्तरस्यैव व्यावृत्तिः स्यान्नतु तत्समानाधिकरणकर्मत्वादेरिति ज्ञापकत्वाश्रयणस्यावश्यकत्वात्. नच प्रातिपदिकार्थाभावसमानाधिकरणार्थान्तरस्यासिद्धा नियमव्यावर्त्याऽप्रसिद्धिरिति नियमसामर्थ्यात्तत्समानाधिकरणार्थान्तरस्यापि नियमेन व्यावृत्तिरिति वाच्यम्, प्रातिपदिकार्थसत्त्वे एव प्रथमा नतु तदसत्त्वे इत्येव नियमः स्यात्; एवञ्चानर्थकनिपातेभ्यः प्रथमा नैव स्यात्। मात्रग्रहणसत्त्वे तु कर्मादियोग्यार्थकप्रातिपदिकाच्चेत्तदा तद्रहिते (कर्मादिरहिते) स्वार्थे

एवेति नियमेनादोषात्। इदमेव मात्रग्रहणं सूत्रकारस्य प्रत्ययनियमपक्ष एवाभिमतो नत्वर्थनियमपक्ष इति बोधयति। प्रातिपदिकार्थे प्रथमैव, कर्मणि द्वितीयैवेत्याद्यर्थनियमपक्षमाश्रित्य मात्रग्रहणं सम्बोधने चेति सूत्रं भाष्ये प्रत्याख्यातमिति दिक् ॥१॥

सम्बोधने चेति सूत्रे का वाचो युक्तिः श्रीमतामिति लिख ॥२॥

अत्र सम्बोधनमभिमुखीकरणम्, अर्थात्प्रकृतवाक्यार्थविषयकबोधाश्रयत्वप्रकारकेच्छोद्देश्यत्वबोधनमिति तत्फलं प्रवृत्तिनिवृत्ती। तत्र सम्बोध्यतावच्छेदकरूपेण सम्बोध्यस्य सिद्धिं विना तत्त्वासम्भवादनुवाद्ये एवैषा विभक्तिः। अत एव एतदर्थस्योद्देश्यतया विधेयभूतक्रियायामेवान्वयः, तेन राजा भव युद्धस्व राजन्, युद्धस्वेत्यनयोर्व्यवस्थयैव प्रयोगः। तथा च राम मां पाहीत्यादितः प्रकृतवाक्यार्थविषयकबोधाश्रयत्वप्रकारकेच्छोद्देश्याभिन्नरामोद्देश्यकमत्कर्मकप्रवर्त्तनाविषयो रक्षणमिति बोधः। व्रजानि देवदत्तेत्यादावपि जानीहीत्यादेरध्याहारः। तत्र व्रजनस्य कर्मत्वाद्देवदत्तस्योद्देश्यत्वादुभयोः समानवाक्यस्थत्वेन निघातसिद्धिः। धिङ् मूर्खेत्यत्र गच्छेत्यध्याहारेऽनेन प्रथमा, अनध्याहारे द्वितीयैव। अत एव "सम्बोधनपदं यच्च तत्क्रियायां विशेषणम्, व्रजानि देवदत्तेति निघातोऽत्र तथासति" इति संगच्छत इति नव्याः ॥२॥

कर्त्तुरीप्सिततममित्यस्यार्थं विलिख्य वर्त्तमानत्वं नेह विवक्षितमिति ग्रन्थसङ्गतिं सयुक्तिकं कुरु ॥३॥

कर्त्तुरिति क्तस्य च वर्त्तमान इति कर्त्तरि षष्ठी, आप्नोतेः सन्नन्तान्मतिबुद्धीति वर्त्तमाने कर्मणि क्तः, आप्तिश्चात्र सम्बन्धः, सच स्ववृत्तिव्यापारप्रयोज्यफलाश्रयत्वप्रकारकरूपः, तस्येच्छायामन्वयः। अत्र च प्रयोज्यत्वं प्रकर्षवाचकेन तमपा लभ्यते, तथा च कर्त्तुः स्ववृत्तिप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वप्रकारकेच्छोद्देश्यः कर्मसंज्ञक इत्यर्थः।

अत्र क्तप्रत्ययोपात्तं वर्त्तमानत्वन्तु न विवक्षितम्, तेन कटं कृतवान् करिष्यतीत्यादिसिद्धिरिति मूले उक्तम्। अत्र केचित्—वर्त्तमान-

त्वस्याविवक्षितत्वे क्तस्य च वर्त्तमान इति षष्ठी न स्यादित्याक्षिपन्ति तदसत्, अविवक्षितमित्यस्य कर्मपदशक्यतावच्छेदककुक्षौ वर्त्तमानत्वस्याप्रवेश इत्यर्थेनादोषात्। वर्त्तमानत्वञ्च यस्माद्वर्त्तमानकालिकप्रत्ययश्चिकीर्षितस्तद्धातुविशिष्टत्वम्, वै० स्वाधिकरणत्व–स्वजन्यबोधविषयत्वेन तात्पर्यविषयीभूतक्रियाकलापविशिष्टत्वोभयसम्बन्धेन। अत्र वै० स्वघटकचरमक्रियाध्वंसानधिकरणत्व-स्वघटकाद्यक्रियाप्रागभावानधिकरणत्व-स्वघटकक्रियाधिकरणत्वैतत्त्रितयसम्बन्धेन। अत्रत्य विचारस्त्वन्यत्र विस्तर इति दिक् ॥३॥

अनभिहिताधिकारस्य युक्तियुक्तं फलमुपपाद्य परिगणनविषये स्वसिद्धान्तं विशद्य लिख ॥४॥

ननु कर्मणि द्वितीयेत्यादेर्द्वेकयोरित्यादेश्चैकवाक्यतया बोध इति पक्षे एकस्मिन्कर्मणीत्यर्थे कर्माद्यर्थस्य प्राधान्यन्तदा उक्तार्थानामप्रयोग इति न्यायेन सिद्धे नार्थोऽधिकारेणेति चेन्न, कर्मगत एकत्वे द्वितीयैकवचनमित्याद्यर्थे संख्यायाः प्राधान्ये अधिकारस्यावश्यकत्वात्। नच द्योतकविषये द्विर्वद्धं सुबद्धं भवतीति न्यायेन द्वौ ब्राह्मणौ व्यतिलुनीत इत्यादावुक्तार्थानामप्रयोग इत्यस्याप्राप्तिरिति कथं प्रकृते तेन न्यायेन सिद्धिरिति वाच्यम्, द्योतकविषयेऽपि लक्ष्यानुरोधाद्बहुशो भाष्ये उक्तन्यायप्रवृत्तिदर्शनान्नियमत्वानुपपत्त्या कर्मादिषु विभक्त्यर्थत्वव्यवहारो द्योत्यतयैवेति न तेषां शक्यत्वम्। पञ्चकं प्रातिपदिकार्थ इतिवत्पञ्चकं धात्वर्थः, क्रियात्वक्रियाकालकारकसंख्यारूपम्। अत एवैतद्विषयेऽपि भावकर्मणोरित्यादेर्द्वेकयोरित्यादेश्च नियमत्वं भाष्योक्तं संगच्छत इति दिक् ॥

अभिधानन्तु तिङ्कृत्तद्धितसमासैरिति परिगणनादेव कटं भीष्मं कुर्वित्यादौ विशेष्यादुत्पन्नद्वितीयया कर्मत्वोक्तावपि विशेषणाद् द्वितीया सिद्धा। भाष्ये तु प्रक्रियादशायां कटोऽपि कर्म भीष्मादयोपीत्याश्रयणात् उभयतः कर्मत्वबोधार्थं सावश्यकी। बोधस्तु तयोर्विशेष्यविशेषणभावेनैव। कारकाणां भावनान्वयनियमस्तु साक्षात्स्वाश्रय (स्व-

विशेषस्य) द्वारावाऽन्वयविषय इति परिगणनं प्रत्याख्यातम् । मूलोक्त-फलानि तु न युक्तानि तिङादिभिरभिधाने शब्दात्कर्मादेः क्रियाजनक-त्वेन विभक्तिवाच्यतावच्छेदकोद्भूतशक्तिमत्त्वेन च न भानमिति विभक्त्य-प्रसक्तेः, अधिकारश्चात्रैव तात्पर्यग्राहकः । ततश्च औपवगश्चित्रगुरिति प्रत्युदाहरणं युक्तम् । अत्र हि सम्बन्धस्य येन रूपेण षष्ठ्या भानन्तेनैव रूपेण तद्धितान्तादिभिः समुदायशक्त्या । अत्र च प्राप्तां षष्ठीं वारयि-तुमनभिहिताधिकारः । वस्तुतस्तु, चित्रगुरित्यादौ षष्ठ्यर्थस्य नियमेन भानात्षष्ठी प्राप्नोतीत्याशङ्क्य अभितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः सम्पन्न इति प्रथमेत्युक्तं भाष्ये । ततश्चाशेषत्वात्षष्ठ्यप्राप्तावित्यपि प्रत्यु-दाहरणन्नेति । शत्य इत्यादौ कारकान्वययोग्यतावच्छेदकसाध्यत्वेन न क्रियादेर्भानमिति न द्वितीयाप्रसक्तिः । अत एव च न तत्रेतरकारका-णामन्वयः । एवं प्राप्तानन्द इत्यादावपि न विभक्तिप्राप्तिरित्यादिरीत्या वृत्तिविग्रहयोः समानार्थत्वे प्रपञ्चश्च प्रदर्श्य अनभिहिताधिकारो वृथेति सिद्धान्तितमिति दिक् ॥४॥

कर्त्तुरीप्सिततमं कर्म तथायुक्तञ्चानीप्सितम् , अत्र धातूपस्थाप्य-फलशालिकर्मेति न्यासेन सिद्धे ईप्सितानीप्सितयोः प्रयोजनं लिख ॥५॥

अत्रोक्तन्यासे ग्रामं गच्छतीत्यादौ ईप्सिततमत्वोपलक्षितस्योद्देश्य-त्ववोधस्य भाष्यसम्मततया तद्बोधानापत्तिः । किञ्च ईप्सिततमपदा-भावे अग्नेर्माणवकं वारयतीत्यत्रापवादत्वान्माणवकादपि पञ्चम्या-पत्तिः, तत्सत्त्वे तु ईप्सितमात्रेऽग्नौ सावकाशस्य वारणार्थानामित्यस्य परत्वादीप्सिततमे माणवकेऽनेन वाधान्न दोषः । ईप्सिततमत्वञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वम्, वार-यतेश्च संयोगानुकूलव्यापाराभावानुकूलव्यापारोऽर्थ इति नाग्नेरी-प्सिततमत्वम्, एवञ्च द्वेष्योदासीनयोः कर्मणोः संग्रहार्थन्तथायुक्तं चानीप्सितमित्यस्याप्यावश्यकत्वम् । वस्तुतस्तु व्याख्यानादेव द्वेष्य-संग्रहे सिद्धे अनीप्सितग्रहणं स्पष्टार्थमेव, तथायुक्तमित्येतावतैव सिद्धेः । अनन्यलभ्यो हि शब्दार्थ इति न्यायेन इच्छाविषयत्वानिच्छा-

विषयत्वयोः संज्ञाप्रवृत्तावुपयोगेऽपि द्वितीयावाच्यकोटावप्रवेशेन न तयोः शाब्दबोधे भानम्, किन्तु ईप्सिततमत्वोपलक्षितमुद्देश्यत्वादिकमेव भासते। एवञ्च भासमानोद्देश्यत्वतदभावाभ्यामर्थत इच्छाविषयत्वादिलाभ इति दिक् ॥५॥

अकथितञ्चेति सूत्रस्य प्रयोजनं विविच्य लिख ॥६॥

अत्र दुह्याजिति परिगणनान्नटस्य गाथां शृणोतीत्यादौ नातिप्रसङ्गः। नच कर्मयुक्तत्वाभाव इति वाच्यम्, तदंशस्यापि परिगणनलभ्यत्वात्। नटस्य न कदाचिदुपादानत्वसम्भवः आख्यातोपयोग इति सूत्रे उपयोगग्रहणात्। अकथितशब्दोऽत्रासङ्कीर्त्तितपरः। एवञ्च पूर्वविधिविषयप्रसक्तिपूर्वकं तदविवक्षायां सर्वथा पूर्वविधेरप्राप्तौ चैतत्प्रवृत्तिः। अत्र प्राञ्चः—गां दोग्धीत्यादौ त्यजनोपसर्जनं त्याजनं दुहेरर्थः। गौः पयस्त्यजति गवा गोपः पयस्त्याजयतीति प्रतीतेः। एवञ्च व्यापारद्वयार्थकत्वेन कर्त्तुरिति कर्मत्वे सिद्धे सूत्रं व्यर्थमिति चेन्न, कर्मणः शेषत्वविवक्षायां प्राप्तां षष्ठीं बाधितुमावश्यकत्वात्। एवञ्चात्र सम्बन्धमात्रं द्वितीयार्थः। अपादानत्वमात्रविवक्षायां पञ्चम्येव। गोः क्षीरविशेषणे तु षष्ठ्येवेत्याद्याहुः। नव्यास्तु—यदा पयोनिष्ठविभागानुकूलव्यापार एव धात्वर्थस्तदाऽपादानत्वाऽविवक्षायामन्येनाप्राप्तकर्मत्वविधानार्थं सूत्रस्यावश्यकत्वम्, षष्ठ्यपवादत्वमात्रेण सम्बन्धार्थकत्वमपि न युक्तं तथासति कर्त्रादेरपि षष्ठ्यपवादत्वेन तृतीयादेरपि सम्बन्धार्थकत्वापत्तेः। व्यापारद्वयार्थकत्वेन बहूनान्धातूनां द्विकर्मकत्वं भाष्यादिसिद्धम्, अतएव प्रधानकर्मण्याख्येये लादीनाद्विर्द्विकर्मणाम्, अप्रधाने दुहादीनामित्यादिहरिकारिका संगच्छते। प्रधानकर्मत्वञ्च कर्तृप्रत्ययसमभिव्याहारे कर्तृनिष्ठप्रधानधात्वर्थव्यापारमात्रविशेषणफलाश्रयत्वम्। अन्यत्सर्वं मूलतोऽवसेयम् ॥६॥

अर्थनिबन्धनेयं संज्ञेत्यत्र दीक्षिताशयमुपवर्ण्य स्वसिद्धान्तं विविच्य लिख ॥७॥

अहमपीदमचोद्यञ्चोद्ये इति कैयटादिप्रयोगे पृच्छिपर्यायस्य चुदेरपि द्विकर्मकत्वदर्शनेन 'मारीचमुच्चैर्वचनं महार्थ'मिति भट्टिप्रयोगेण

'शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेवे'ति कालिदासप्रयोगेण 'उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेन्द्रः' इति भारविप्रयोगेण च अर्थनिबन्धनेयं संज्ञेति ज्ञायते, तेन मूलोक्तफलसिद्धिरिति दीक्षिताशयः । नव्यास्तु दुहियाचिरुधिप्रच्छिभिक्षिचिञ्जाभिति भाष्योक्तपरिगणने भिक्षिग्रहणवैयर्थ्यनेदमयुक्तम्, भाष्योक्तपरिगणितातिरिक्तानां येषां द्विकर्मकत्वमिष्टन्तेषां व्यापारद्वयार्थकत्वस्वीकारेण कर्त्तुरित्यनेनैव कर्मत्वम् । लादिव्यवस्था कथमितिचेदित्थम्, प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्, अप्रधाने दुहादीनां ण्यन्ते कर्त्तुश्च कर्मण इति भाष्योक्तेः । प्रधानकर्मत्वञ्च कर्तृप्रत्ययसमभिव्याहारे कर्त्तृनिष्ठप्रधानधात्वर्थव्यापारविशेषणफलाश्रयत्वम् । नच भाष्ये दुहादिण्यन्तवुद्ध्याद्यर्थातिरिक्ता द्विकर्मकाः के इति प्रश्ने "नीवह्योर्हरतेश्चापि गत्यर्थानान्तथैव च । द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः" इति परिगणनरूपेणोत्तरदानात्कथं तदतिरिक्तानां द्विकर्मकतेति वाच्यम्, तव न्यादिग्रहणस्य कृञ्युपलक्षकत्ववत्, ममापि न्यादिग्रहणस्य सकलव्यापारद्वयार्थकधातूपलक्षकत्वेन "यश्चोभयोः समो दोषः परिहारोऽपि तादृशः । नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे" इति न्यायेनादोषात् । पचञ्च गर्गाः शतं दण्ड्यन्तामर्थिनश्च राजानो हिरण्येन भवन्तीति भाष्ये गर्गाणामेव प्रधानत्वेन तत्रैव कर्मणि लकारः। उद्देश्यत्वरूपमार्थप्राधान्यन्तु शतस्येत्यनुद्देश्यत्वेनाप्रधानगर्गानुरोधान्न शतावृत्तिरिति न कोऽपि विरोध इत्यास्तां तावत् ॥७॥

अकर्मकधातुभिर्योग इत्यादिवार्त्तिकव्याख्याने प्राच्यनव्ययोः को विरोध इत्यविकलं लिख ॥८॥

इदमेव कर्मसंज्ञाविधायकमिति प्राञ्चः । नव्यास्तु नैतद्भाष्ये कर्मसंज्ञाविधायकं वचनन्दृश्यते; किन्तु एषां लक्ष्यानुरोधात्स्वकरणकव्यापने शक्त्या व्याप्तिरूपफलाश्रयत्वेन कर्त्तुरिति कर्मत्वम् । तथाच मासमास्त इत्यादितो मासमासनेन व्याप्नोतीत्यादिक्रमेण बोधः । अत एव अकर्मकप्रकृतिकण्यन्तानां कथं द्विकर्मकत्वमित्याशङ्क्य कालभावा-

ध्वगन्तव्याः कर्मसंज्ञाह्यकर्मणान्देशश्चेति हिशब्दघटितं भाष्ये उक्तम्। अस्य वार्त्तिकस्य कर्मसंज्ञाविधायकत्वे तु उक्तं वा प्राकृतं वेति वदेत्। अत एव च समां समां विजायत इति सूत्रे समायां समायां विजायत इति भाष्योक्तविग्रहवाक्यं संगच्छते, अन्यथाऽनेन कर्मत्वे द्वितीयाया एव तत्र साधुत्वेन तदसङ्गतिः स्पष्टैव। अत एव 'कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः। सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते' इति मदुक्तार्थानुवादिका हरिकारिका च संगच्छते। नच कथमेषामकर्मकत्वव्यवहार इति वाच्यम्, द्रव्यकर्माभावात्। अत एव 'अतस्तैः कर्मभिर्युक्तो धातुर्द्रव्यैरकर्मकः। लस्य कर्मणि भावे च निमित्तत्वाय कल्पते' इत्युक्तं भाष्ये। प्रधानाऽप्रधानकर्मव्यवस्था चेत्थम्, कालादेराधारत्वेन द्रव्यद्वारैव क्रियासम्बन्धात्कालादिकर्माऽप्रधानम्, द्रव्यकर्म तु प्रधानमिति दिक् ॥८॥

गतिबुद्धीति सूत्रस्य नियमार्थत्वं विध्यर्थत्वं वेति सयुक्तिकमुपपाद्य आकडारसूत्रस्थं भाष्यादिकं नियमपक्षे विधिपक्षे वा साधकमिति सम्यगुपपाद्यताम् ॥९॥

अत्र परमप्राचीना नवीनाश्चेत्थं प्राहुः—अन्यानधीनत्वरूपार्थप्राधान्यस्य शाब्दप्राधान्यस्य च प्रयोजकव्यापारे सत्त्वेन तदनुरोधिकर्मत्वस्यान्तरङ्गादपि कर्तृत्वाद्बलवत्त्वेन कर्तुरिति कर्मत्वे सिद्धे गतिबुद्धीति सूत्रं व्यर्थं सत् णिजर्थव्यापारप्रयोज्यफलाश्रयाणां यदि कर्मत्वं स्यात्तर्हि गत्यर्थादीनामेवेति ज्ञापयति तेन पाचयत्यादियोगे नेति भाष्ये स्पष्टम्। प्रधानकार्यं सर्वतो बलवदिति आकडारसूत्रे कैयटः। अत एव "गुणक्रियायां स्वातन्त्र्यात्प्रेषणे कर्मताङ्गतः। नियमात्कर्मसंज्ञायाः स्वधर्मेणाभिधीयते" इति कारिका च संगच्छते। स्वधर्मेण तृतीयया। प्रयोज्ये कर्त्तरि तृतीयैवेति भावः। एवञ्चोक्तयुक्तिविरोधाद् उद्देश्यत्वरूपार्थप्राधान्यस्य प्रयोज्यव्यापारनिष्ठस्य पुरस्कारेण तु विधायकत्वमेवोचितमिति मनोरमोक्तिः तुनाऽरुचिगर्भिता आकडारसूत्रस्थभाष्यकैयटाभ्यां विरोधात्, तत्रत्य भाष्यकैयटप्रणाली बहुविस्तृतेति न प्रपञ्चितेति दिक ॥९॥

नीवह्योर्नेति वार्त्तिकस्योपयोगः सयुक्तिकमुपपाद्यः ॥१०॥

यद्यप्यनयोः प्रापणमर्थो न गतिस्तथापि गतिरपि विशेषणीभूय प्रापणमध्ये प्रविष्टा। प्रापणस्य च उत्तरदेशसंयोगानुकूलव्यापार-रूपत्वात् एतावतैव प्राप्ति मत्वा प्रतिषेध उक्तः। अत एव न गतीति सूत्रे भाष्ये वहिर्न गत्यर्थः देशान्तरप्रापणो हि वहेरर्थ इत्युक्तम्, अनेन च प्रापणस्य च गतित्वाभावबोधनान्न गत्यर्थकत्वेन तेषां ग्रहणं युक्तम्, अत एव ग्रामं प्रापयति देवदत्तेनेत्येव भाष्ये उक्तम्, ग्रामं प्राप्त इत्यादौ तत्प्राप्तेर्गतिं विनाऽसम्भवेन आक्षिप्तगत्यापि गत्यर्थत्वमित्यभिमानेन वार्तिकारम्भः। प्राप्तिश्च सम्बन्धमात्रं न संयोग एव, सुखं प्राप्तो धनं प्राप्तो भूप्राप्तेत्यादिव्यवहारात्। वस्तुतस्तु, उक्तभाष्यप्रामाण्यादप्राप्ति-रेव युक्तेति वार्त्तिकं निष्प्रयोजनमेव। नयतेस्तु या प्रापणे इत्यादेरिव गत्युपसर्जनं प्रापणं वाच्यमिति तस्य गत्यर्थकत्वं भाष्यसिद्धमेवेति दिक् ॥१०॥

शब्दायतेर्नेति वार्त्तिकं सफलयत ॥११॥

धातोरर्थान्तरे वृत्तेर्द्धात्वर्थेनोपसंग्रहादित्यादिवलेन शब्दस्य कर्मणो धात्वर्थकुक्षिप्रविष्टतयाऽकर्मकत्वेन कर्मत्वप्राप्ताविदमारब्धमिति प्राचीनाः। नवीनास्तु—गतिबुद्धीति सूत्रे भाष्ये शब्दक्रियाणामि त्यर्थे ह्याययति-शब्दाययति-क्रन्दयतीनां प्रतिषेध उक्तो नतु शब्दकर्मकाणामि-त्यर्थे। एवञ्च तत्र पक्षे शब्दाययतौ प्रतिषेधानुक्त्या तस्याकर्मकत्वे मानाभावः। शब्दस्य धात्वर्थसंगृहीतत्वेऽपि वहिर्भूतपुत्रादिकर्मणोऽ-भावे मानाभावेन चिन्त्योऽयन्निषेध इत्याहुः ॥११॥

येषां देशकालादिभिन्नं कर्म न भवतीत्यादेर्व्याख्याने का विप्रति-पत्तिः प्राच्यनव्ययोरिति सप्रमाणं भण ॥१२॥

ननु—देवदत्तेन पाचयतीत्यादावविवक्षितकर्मत्वेनाकर्मकत्वाद्-गतिबुद्धीति कर्मत्वं कुतो नेति चेन्न, गतिबुद्धिप्रत्यवसानार्थशब्दकर्मा-कर्मकाणामणीत्यादिसूत्रे नियमस्य सजातीयापेक्षत्वात्सकर्मकधातुप्रकृ-तिकणिजर्थव्यापारप्रयोज्यफलाश्रयाणां यदि कर्मत्वं स्यात्तर्हि गत्याद्यर्थ-कानामेवेति नियमेनैव सिद्धे अकर्मकग्रहणं व्यर्थं सद् येषां देशेत्यादि

बोधयतीत्यदोषात्। अयं भावः—अकर्मकग्रहणं सामर्थ्यादत्र शास्त्रेऽकर्मकपदेन देशकालादिभिन्नकर्माभाववत एव ग्रहणमिति बोधयति, तेन मासमास्यते देवदत्तेनेत्यत्र भावे लकारसिद्धिरिति कैयटादिमतम्। नव्यास्तु, कृतपूर्वीकटमिति साधनाय अविवक्षितकर्मत्वेनाकर्मकत्वस्य भाष्यकैयटसम्मतत्वेनेदमयुक्तम्। अत एव कर्मणः शेषत्वविवक्षयाऽकर्मकत्वेन मातुः स्मर्यत इत्यत्र भावे लकार इति भाष्ये उक्तम्। कैयटेनापि निवृत्तप्रेषणाण्णिचि लावयति केदारं देवदत्त इत्यत्राऽकर्मकत्वात्कर्मत्वेन द्वितीयोक्ता। कालकर्मणाम्नुपसंख्यानमित्यादिभाष्यसन्दर्भस्यायमभिप्रायः—अकर्मकग्रहणसामर्थ्यादत्र शास्त्रे सर्वथा द्रव्यकर्माभावस्य तत्त्वेनाविवक्षितस्य च ग्रहणम्, अत एव "यत्कर्म भवति नच भवति तेनाकर्मकाणां नचैतत्कर्म क्वचिदपि न भवती"ति भाष्येण कालादेः कर्मणोऽव्यभिचारित्वं द्रव्यकर्मणो व्यभिचारित्वञ्च प्रदर्शितमिति। अत एव अकर्मकाधिकारे श्रुदृश्यादिभ्य आत्मनेपदविधानं संगच्छते। अतिप्रसङ्गस्त्वनभिधानाद्वारणीय इत्याहुरिति दिक् ॥१२॥

स्वतन्त्रत्वं निर्दुष्टं परिष्करणीयम् ॥१३॥

तद्धातुजन्यबोधविषयत्वेन तात्पर्यविषयीभूतप्रधानधात्वर्थाश्रयत्वम्। प्राधान्यञ्च कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वम्, कर्मप्रत्यये फलस्य प्राधान्येऽपि व्यापाराश्रयस्य कर्तृत्वसिद्धये कर्तृप्रत्यय इत्यादि। णिचस्तु वाचकत्वमेव तेन ण्यन्तधातुतत्प्रकृतिधात्वेतदुभयवाच्यव्यापारयोः स्वार्थम्प्रति प्राधान्यादेवदत्तेन यज्ञदत्तः पाचयतीत्यादौ प्रयोज्यव्यापाराश्रयस्यापि कर्तृत्वसिद्धिः; द्योतकत्वे तु नैतत्सिद्ध्येत्। वस्तुतः, तद्धातुविशिष्टव्यापाराश्रयस्तद्धातुकर्त्ता। वै० स्वजन्यबोधविषयत्वप्रकारकतात्पर्यविशेष्यत्व-स्वप्रयोज्यण्यर्थाऽवृत्तिविशेष्यतानिरूपितजनकत्वसम्बन्धावच्छिन्नप्रकारतानाश्रयत्वोभयसम्बन्धेन। एवञ्च णिचो द्योतकत्वेऽपि फलस्य प्राधान्येपि च नोक्तदोष इति दिक् ॥१३॥

साधकतममिति सूत्रे को विशेषो नागेशस्येति विविच्य लिख ॥१४॥

अत्र यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिस्तत्प्रकृष्टन्तदेव च करणम्। ननु कारकाधिकारात् करणल्युडन्तकरणेति महासंज्ञया च साधकत्वे लब्धे साधकग्रहणमेव साधकतमार्थं भविष्यतीति तमप्-ग्रहणं व्यर्थमितिचेन्न; इह कारकाधिकारे शब्दसामर्थ्यगम्यः प्रकर्षो नाश्रीयत इति ज्ञापनेन चारितार्थ्यात्। अन्यथा अधिकरणमित्यधिकरण-ल्युडन्तमहासंज्ञयैव सिद्धे आधारग्रहणात्सर्वावयवव्याप्त्या य आधार-स्तस्यैव ग्रहणमित्यर्थापत्तौ तिलेषु तैलं दध्निसर्पिरित्यादावेव स्यान्न तु गङ्गायां घोष इत्यादिगौणाधारे। नहि मङ्गा तीरं वा सर्वावयवैर्व्याप्तं तीरधर्मस्य घोषाधारत्वस्यात्यन्तसामीप्यात्प्रवाहे आरोप इति प्राञ्चः। नव्यास्तु—महासंज्ञया तादृशार्थकरणासमर्थम्प्रति आधारादिपदं चरि-तार्थमित्युक्तप्रयोगसाधनाय कारकप्रकरणे उद्देश्यवाचके स्वरितत्व-प्रतिज्ञया स्वरितेनाधिकं कार्यमित्यर्थाद्गौणाधारस्यापि ग्रहणम्। तमपा च प्रकृते स्वरितत्वाभावो बोध्यते तेन व्यवधानेन फलोत्पादके करणत्वविवक्षया तृतीयान्तप्रयोगस्यासाधुत्वमित्याहुरिति दिक्॥१४॥

सहयुक्तेऽप्रधान इत्यत्र प्राच्यनव्ययोर्मतमविकलं लिख ॥१५॥

पितुरत्र क्रियासम्बन्धः शाब्दः पुत्रस्य त्वार्थ इति तस्याप्राधान्यम्, अप्रधानग्रहणं शक्यमकर्तुं, नच पितुस्तृतीयापत्तिरिति वाच्यम्, अन्तरङ्गत्वात्प्रधानत्वाच्च उपपदविभक्तेरितिन्यायेन पितुस्तृतीयावाधा-दिति प्राञ्चः। नव्यास्तु—सहेनाप्रधान इत्येव सिद्धे युक्तग्रहणसाम-र्थ्यात् शब्दविशेषानादरेणार्थयोगेऽपि भवतीति बोध्यते। अत एव विनापि तद्योगं तृतीयेत्यादिमूले उक्तम्। अत्र ज्ञापकमप्यस्तीति वृद्धो यूनेत्यादि च। अत्र सहार्थः साहित्यन्तच्च स्वसमभिव्याहृतक्रियादि-समानकालिकतत्क्रियादिमत्त्वम्, क्वचित्समानदेशक्रियावत्त्वमपि साहित्यम्। अत एव तिलवापोत्तरन्तत्रैव क्षेत्रे माषवापे तिलैः सह माषान्वपतीति सिद्धम्। सहैव दशभिः पुत्रैर्भारं वहति गर्दभीत्यत्र पुत्रेषु भारवहनकर्तृत्वाभावेऽपि विद्यमानत्वं सहार्थः, दशानां पुत्राणां

विद्यमानत्वेपीत्यर्थात्। यद्यपि आगमनक्रियाकर्तृत्वादेव पुत्राच्तृतीया-सिद्धा तथापि पुत्रेण सह स्थूल इत्यर्थमिदम्। अतएव साहित्यलक्षणं आदिपदमुपात्तमित्याहुः ॥१५॥

दिवः कर्मचेत्यत्र प्राच्यनव्ययोः को विशेष इति लिख ॥१६॥

अत्र करणशब्दानुवृत्त्या अन्यतरस्यां ग्रहणापकर्षणेन वा संज्ञयोः पर्याये लब्धे समावेशार्थश्चकारस्तेन मनसादेव इत्यत्र कर्मण्यण् करण-त्वात्तृतीया चेत्युभयं सिद्धति। अतएव अक्षैर्देवयते यज्ञदत्तेनेत्यत्र सक-र्मकत्वादणि कर्तुर्णौ कर्मत्वन्न अणावकर्मकादिति परस्मैपदञ्च न। नचैवं दीव्यन्ते अक्षा इत्यत्र कर्मणोऽभिहितत्वेऽपि करणत्वस्यानभि-हितत्वात्तृतीया स्यादिति वाच्यम्, एकैव शक्तिः संज्ञाद्वयोपयोगिनी-त्युभयत्रापि अभिधानत्वाक्षतेरिति प्राञ्चः। नव्यास्तु—अक्षान्दीव्यती-त्यत्र यदा अक्षाणां कर्मत्वविवक्षा तदा द्वितीयैव। अक्षैर्देवयते इत्यत्र परत्वात्तृतीयैव। कर्मत्वाच्च अकर्मकत्वप्रयुक्तपरस्मैपदाभावः। अत्र विप्रतिषेधशास्त्रबलात्तृतीयैव शक्तिद्वयबोधिका। अक्षाणां देवितेत्यादौ तृतीयातः परत्वात्कृद्योगलक्षणाषष्ठी। मनसादेव इत्यादौ हेतुतृतीया-न्तेन पचाद्यजन्तदेवशब्दस्य समासः। एकैव शक्तिः संज्ञाद्वयस्योप-योगिनीति तु चिन्त्यम्, कर्मादिपदानां कर्मत्वादितत्तच्छक्तिरूपेण बोधकतया तयोर्भेदस्यैवौचित्यादित्याहुः। केचित्तु—शक्तेरेकत्वस्वीका-रेऽपि कर्मत्वत्वकरणत्वत्वयोर्भेदेन बोधवैलक्षण्यान्न दोष इत्याहुः ॥१६॥

इत्थंभूतलक्षणे—इत्यत्र प्राच्यनव्ययोः को भेद इति सप्रमाणं विशद्य लिख ॥१७॥

इत्थंभूतस्य यत्र लक्षणवाचकात्पृथगुपस्थितिस्तत्रैवानेन तृतीया, तेन कमण्डलुपाणिं छात्रमद्राक्षीदित्यत्र कमण्डलुशब्दान्न तृतीया। न चोत्पन्नायास्तृतीयायाः सुपो धात्विति लुकि न दोष इति वाच्यम्, कृते समासे तस्या उत्पत्त्या समासरूपप्रातिपदिकानवयवत्वे न लुकोऽप्राप्तेरिति कैयटादयः। नव्यास्तु—कमण्डलुपाणिशब्दात्तृतीया-

पत्तिर्वक्तुमुचिता, कमण्लुयुक्तपाणिरूपस्य कमण्डलुपाणित्वस्य लक्षणत्वेन तस्यैव तद्वाचकत्वात्। अतएव भाष्ये सकृदसौ कमण्डलुपाणिश्छात्रो दृष्टस्तस्य तदेवलक्षणं भवतीत्युक्तम्। तत्र तदेवेत्यस्य कमण्डलुपाणित्वमेवेत्यर्थः। कमण्डलोर्लक्षणत्वे हि स एवेति वदेत्। किञ्च तन्मध्यपतितन्यायेन तृतीयाविशिष्टस्य प्रातिपदिकत्वेन लुकोदुर्वारतया अनवयवत्वेन समाधानं निर्युक्तिकमेव। अत एव नरम्मन्य इत्यादाविजन्तस्योत्तरपदपरत्वाय पूर्वं सुपो लुकि उत्पन्नस्यामः सुपो धात्विति लुकमाशङ्क्य अस्विधिसामर्थ्येन वारितो भाष्ये इत्याहुः। अत्र केचित्—उद्देश्यप्रतिनिर्देश्ययोरैक्यमापादयत्सर्वनाम अविशेषेण तत्तल्लिङ्गभाग्भवतीत्यभियुक्तोक्त्या लक्षणशब्दस्य नपुंसकत्वेन तदितिनपुंसकनिर्देशो युक्त एव। तन्मध्यपतितन्यायस्य तु विषय एव नास्ति तन्मध्यपतितत्वाभावात्। तत्त्वञ्च—समुदायविशिष्टत्वम् वै० स्वघटकावधिपूर्वत्व—स्वघटकावधिकोत्तरत्व स्वनिष्ठोद्देश्यतानिरूपितविधेयताश्रयत्वैतत्त्रितयसम्बन्धेनेति प्राहुः। अत्रत्य विचारस्तु निर्दिश्यमानपरिभाषाव्याख्यावसरे प्रपञ्चित इति दिक्॥१७॥

कर्मणा यमभिप्रैति स सम्प्रदानमिति सूत्रं सम्यग्व्याख्यायताम्॥१८॥

दानार्थककर्मणा यं सम्बन्धुमिच्छति स सम्प्रदानमिति सूत्रार्थः। कर्मणा सम्बन्धश्च स्वत्वादिरूपः, तेनाजां नयति ग्राममित्यादौ न। दानं च स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्यनुकूलो व्यापारः। अत एव रजकस्य वस्त्रं ददातीति सिद्धः। अत्र हि अधीनीकरणव्यापारो दाधात्वर्थः। एतच्च सम्प्रदानमित्यन्वर्थसंज्ञावलाल्लभ्यते इति वृत्तिकारः। भाष्यविदस्तु—शिष्याय चपेटां ददाति, न शूद्राय मतिंदद्यादिति भाष्यादिप्रयोगेण नान्वर्थतायामाग्रहः। अत एव क्रियाग्रहणं कर्त्तव्यमिति वार्त्तिकं भाष्ये प्रत्याख्यातम्। ततश्च धात्वर्थकर्मणेत्याद्येवार्थः। रजकाय वस्त्रं ददातीति भाष्यरीत्या इष्टमेव। शेषत्वविवक्षया वा षष्ठी। अत एव पुत्राय पत्रं प्रेषयतीत्यादिप्रयोगाः संगच्छन्ते। अजां नयतीत्यादौ न दोषः। यमभिप्रैतीत्युक्त्या यमिति

निर्दिष्टस्य शेषित्वं (उद्देश्यत्वं) कर्मणश्च शेषत्वं (अप्रधानत्वरूपं) लभ्यते। एवञ्च ग्रामस्याजां प्रति शेषित्वं नास्ति। यद्यपि ग्रामसंस्कारार्थमजानयने ग्रामस्य शेषित्वमस्ति तथापि परत्वात्कर्मसंज्ञया बाधान्न दोष इत्याहुः। पदकृत्यन्तु नागेशप्रदर्शितरीत्या मूलादवधार्यमिति दिक् ॥१८॥

रुच्यर्थानामिति सूत्रं सयुक्तिकं व्याख्यायताम् ॥ १९ ॥

अत्र यद्यपि रुच्यभिलष्यतिभजतीनां प्रीत्यनुकूलो व्यापारोऽर्थः समानस्तथापि फलतावच्छेदकसम्बन्धभेदप्रयुक्तधात्वर्थभेदः। तथाहि विषयतासम्बन्धावच्छिन्नप्रीत्यनुकूलः प्रीतिसमानाधिकरणो व्यापारो रुचेरर्थः। तत्र विषयतारूपफलतावच्छेदकसम्बन्धेन प्रीत्याश्रये भक्त्यादौ कर्मसंज्ञायाः कर्तृसंज्ञयापरत्वाद्बाधान्न सकर्मकत्वम्। हर्यादेः समवायसम्बन्धेन प्रीतावन्वयविवक्षायां प्रष्टोप्राप्तावनेन सम्प्रदानत्वं विधीयते। अभिलष्यादेस्तु समवायसम्बन्धावच्छिन्नप्रीत्यनुकूलप्रीतिव्यधिकरणो व्यापारोऽर्थः। तत्र समवायात्मके फलतावच्छेदकसम्बन्धेन प्रीतिरूपफलाश्रयत्वात्कर्मत्वमिति। अत एवान्यकर्तृकोऽभिलाषो रुचिरिति व्याख्यातम्। यत्किञ्चिद्विषयकप्रीत्यनुकूलव्यापाराश्रयोऽभिलषतिकर्त्ता, यत्किञ्चिन्निष्ठप्रीत्यनुकूलप्रीतिव्यधिकरणो यो व्यापारस्तदाश्रयो रोचयतेः कर्त्तेत्यादिनागेशोक्तेरुक्त एवाशय इति दिक् ॥१९॥

ध्रुवमपाय इत्यत्र ध्रुवत्वं सम्यग्विविच्य तत्रत्य नागेशोक्तविशेषं सप्रमाणं लिख ॥ २० ॥

प्रकृतधातूपात्तगत्यनाविष्टत्वे सति तज्जन्यविभागाश्रयत्वं ध्रुवत्वमिति स्वीकाराद्धावतोऽश्वात्पततीत्यत्र न दोषः। एवं कुड्यात्पततोऽश्वात्पततीत्यत्रापि बोध्यम्। परस्परस्मान्मेषावपसरत इत्यत्र तु सृधातुना गतिद्वयस्याप्युपादानादेकनिष्ठां गतिम्प्रति अपरस्य अपरनिष्ठां गतिं प्रत्यन्यस्य ध्रुवत्वसिद्धिरिति प्राञ्चः। अत्र मेषपदोपात्तयोरेव क्रियाश्रयत्वात्कर्तृत्वम्। परस्परपदोपात्तयोरेव विभागाश्रयत्वा-

दपादानत्वमिति मेषपदोपात्ते तदविवक्षणान्न ततः पञ्चमी, प्रयोगानुसारित्वाद्विवक्षायाः। सृधातुना गतिद्वयस्यापीत्यादि समाधानन्तु न युक्तम्, वस्तुतस्तन्निष्ठव्यापारयोर्भेदेऽपि सृधातुना निवृत्तभेदस्यैवापायस्योपादानादुभयोरपि तत्क्रियाश्रयत्वेन परत्वात्कर्तृत्वापत्तेरिति नव्याः।

भाष्यानुसारिणो नव्यास्तु—अत्र विभागश्च न वास्तवः किन्तु बुद्धिपरिकल्पितोऽपि। अत एव माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यत्र बुद्धिपरिकल्पितापायाश्रयणेनैव भाष्ये पञ्चमी साधिता। धावतोऽश्वात्पततीत्यादौ लौकिकस्य ध्रुवत्वस्याऽश्वेऽभावेऽपि अध्रुवत्वस्याविवक्षितत्वेनापादानत्वम्। अत एव भाष्ये त्रस्तादश्वात्पततो धावतः पततीत्यादौ ध्रुवत्वाभावादपादानत्वं न स्यादित्याशङ्क्य अध्रौव्यस्याविवक्षितत्वमत्र यतः सतोप्यविवक्षा भवतीति समाहितम्, अन्यथा त्वदुक्तध्रुवत्वस्य पतधात्वर्थव्यापाराश्रयत्वस्यात्राऽसत्त्वेन सतो ध्रौव्यस्याविवक्षेत्यस्यासङ्गतिः स्यात्। सिद्धान्तेऽपि त्वदुक्तध्रुवपदार्थकथनमेवोचितमिति तदसङ्गतिश्च। लौकिकव्युत्पत्त्याऽन्वयव्यतिरेकलब्धस्य स्थिरार्थकध्रुवपदस्य अतिरिक्तार्थे शक्तिकल्पने गौरवञ्च। हरिकारिकायामतदावेशादित्यस्य तदावेशाविवक्षणादित्येवार्थः। एवञ्च अपाये गतिविशेषे सति यद्ध्रुवमवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्य अवधित्वोपयोगिव्यापारस्यानाश्रयं तदपादानमिति सूत्रार्थ इत्याद्याहुः। वस्तुतस्तु, विभागानुकूलव्यापारविशिष्टत्वन्तत्वम्। वै० स्वानाश्रयत्व-स्वजन्यविभागाश्रयत्वोभयसम्बन्धेन। व्यापाराणां व्यापारत्वेनैकत्वेऽपि वस्तुतो भेदस्य त्वयाप्युक्तत्वात्। उक्तरीत्या कैयटस्यापि युक्तत्वमेव। भाष्ये धावत इत्यादौ सामान्यतो विभागानुकूलव्यापाराश्रयत्वमादाय शङ्का। अध्रौव्यस्याविवक्षितत्वमित्यनेन पतधात्वर्थरूपव्यापाराश्रयत्वस्याभावरूपाविवक्षया ध्रवत्वात्तत्सिद्धिरिति केचित्। अत्रत्य विचारो बहुकालसाध्य इति दिक् ॥ २० ॥

अन्यारादितिसूत्रे अन्येत्यर्थग्रहणमित्यत्र प्राच्यनव्ययोः को विशेष इति सप्रमाणं सफलं लिख ॥ २१ ॥

अन्येत्यर्थग्रहणमितरग्रहणं प्रपञ्चार्थम् । अत एव अस्मान्नीचः अस्मात्पर इत्यादिसिद्धम् । तदर्थश्च भेदवान्, तेन घटाद्भिन्न इत्यादिसिद्धिरिति प्राञ्चः । नव्यास्तु-अर्थग्रहणे मानाभावादिदं चिन्त्यम्, अत एव घटादेक इति न साधुः । घटाद्भेद इत्यत्र तु ध्रुवमितिसूत्रे अपायशब्देन भेदस्यापि ग्रहणमिति भाष्यबलेन अपादाने पञ्चमी । अस्यैव सम्बन्धत्वेन विवक्षायां घटीयो भेद इति सिद्धः । अन्यशब्दार्थस्याक्रियत्वेनापादानत्वाभावात्तद्योगे पञ्चम्यर्थमन्यग्रहणम् । अत एव घटः पटो नेत्यादौ नञो भेदवदर्थकत्वेऽपि अक्रियत्वान्न पञ्चमी । अस्मान्नीच इत्यादौ "तु पञ्चमीविभक्ते" इति पञ्चमी बोध्या । अतएव भाष्येऽर्थग्रहणन्न कृतमित्याहुः ॥ २१ ॥

प्रभृतियोगे पञ्चमीत्यस्य सप्रमाणमाशयमुपवर्ण्य नागेशोक्तविशेषः प्रदर्शनीयः ॥ २२ ॥

यतश्चाध्वकालनिर्माणन्ततः पञ्चमी कार्त्तिक्या आग्रहायणी मास इति वार्त्तिकप्रत्याख्यानाय इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते कार्त्तिक्याः प्रभृत्याग्रहायणीमास इति भाष्येण प्रभृत्यर्थयोगे पञ्चमीति वचनबोधनम्, अन्यथा प्रभृतिपदाभावे पञ्चम्यर्थं वार्त्तिकस्यावश्यकत्वेन तत्प्रत्याख्यानासङ्गतिः स्यात् । ततश्च तदर्थकाऽऽरभ्य योगेऽपि मेरुपृष्ठादारभ्येत्यादौ पञ्चमी । अवीचीमारभ्येत्यत्र आरभ्येत्यस्य गृहीत्वेत्यर्थेन प्रभृत्यर्थत्वाभावान्न पञ्चमीत्याशयः । वस्तुतस्तु, कार्त्तिक्या इत्यादावपादानत्वादेव पञ्चमी । अपादानत्वं चात्र गम्यमानक्रियापेक्षम्, कार्त्तिकीतो विभक्ते इत्याद्यर्थप्रतीतेः । एवं भवात्प्रभृतीत्यस्य भवकालाद्विभक्ते इत्याद्यर्थादिति नागेशः पन्था इति दिक् ॥ २२ ॥

कृत्वोर्थप्रयोग इतिसूत्रे ज्ञोऽविदर्थस्य दिवस्तदर्थस्येति सूत्रयोश्च शेष इति सम्बध्यते नवेति प्रमाणयुक्तिभ्यां विविच्य लिख ॥२३॥

अधीगर्थेति सूत्रे कर्मादीनामविवक्षाशेष इति भाष्ये बहुवचनेन एषु शेषपदसम्बन्धो बोधित इति केचित् । मनोरमायान्तु दिवस्तदर्थस्येति

सूत्रे शेष इति न सम्बध्यते उत्तरसूत्रारम्भात्। अत एवास्य तिङन्ता-न्येवोदाहरणानि भाष्यादौ दत्तानि। अत एव च द्वितीया ब्राह्मण इति सूत्रं गार्ग्यस्य तदहः सभायान्दीव्येयुरित्यत्र नित्यं षष्ठीप्राप्तौ द्वितीयार्थमिति भाष्ये उक्तम्। कृत्वोर्थ इतिसूत्रे मण्डूकप्लुतिन्यायेन शेषपदसम्बन्धः। अत एव समासाभाव इत्याद्युक्तम्। नव्यास्तु कर्माश्रयषष्ठीविषये सूत्रोपात्तसकर्मकाणामकर्मकवचनमितिवार्त्तिकप्रत्याख्यानाय शेष इति वर्त्तते इति भाष्योक्ते परेण शेषश्च क इति पृष्टे शेषे षष्ठीति सूत्रोक्तं कर्मादीनामविवक्षाशेष इति सिद्धान्तिना स्मारितम्, नैतावता कृत्वोर्थ इतिसूत्रे शेषपदसम्बन्धो लभ्यते, अपि च एतद्भाष्यबलाद्विवस्तदर्थस्येति सूत्रेऽपि तत्सम्बन्ध आवश्यकः। अन्यथा वार्त्तिकरीत्येष्टस्य शतस्य दीव्यते इति भावे लस्यानापत्तिः। अत एवोक्तवार्त्तिकव्याख्यायां कैयटेन अधीगर्थादयः प्रेष्यन्तुपर्यन्ताः कर्माश्रयपदेनोच्यन्ते इत्युक्तम्, एवं च शेष इत्यनुवृत्त्या वार्त्तिकप्रत्याख्यानवदेतत्सूत्रद्वयप्रत्याख्याने एव भाष्यतात्पर्यम्। नित्यं षष्ठीप्राप्तौ द्वितीयार्थमिति द्वितीया ब्राह्मण इति सूत्रस्थभाष्यन्तु वार्त्तिकरीत्येति न तद्विरोधः। एवञ्च शेऽविदर्थस्येत्यत्रापि तदसम्बन्ध एव युक्तः। अधीगर्थेत्यादौ मण्डूकानुवृत्तिरित्याहुरिति दिक् ॥२३॥

कर्तृकर्मणोः कृतीतिसूत्रं नागेशरीत्या विविच्य व्याख्यायताम् ॥२४॥

अत्र शेष इति न सम्बध्यते सूत्रवैयर्थ्यापत्तेः। समासस्तु कृद्योगा षष्ठी समस्यत इति वार्त्तिकेनेष्ट एव। ननु स्तोकं पाक इत्यादौ षष्ठी कुतो नेतिचेन्न, कर्तृसाहचर्यात्कर्मापि धात्वर्थे भेदेनान्वय्येव गृह्यत इत्यदोषात्। अत एव च क्रियाविशेषणस्थलेऽसामर्थ्यात्समासाभावः। द्वितीया श्रितेत्यादेस्तु सामर्थ्यादवयवद्वारकसामर्थ्येऽपि प्रवृत्तिः। अत एव दारुणं यथा भवति तथाऽध्यापक इत्यर्थकस्य दारुणाध्यापक इत्यस्य साधनार्थं भाष्ये मलोपो विहितः। अन्यथा समासेनैव सिद्धे प्रत्ययैरर्थ्य स्पष्टमेव। ननु तृजकाभ्यामित्यादिनिषेधैरवयवद्वारकसामर्थ्येऽपि षष्ठीसमासप्रवृत्तिरितिबोधनेन प्रकृते षष्ठ्या समासः कुतो

नेतिचेन्न, अनेनैव भाष्येण तत्र षष्ठ्यभावबोधनात्। नच भिन्नपदत्वेऽपि तथा प्रयोगार्थं मलोपवचनमिति वाच्यम्, तथासति वाक्ये मलोप इति वदेदिति दिक्॥

अत्र कृति किं तद्धिते मा भूत्, कृतपूर्वीकटमिति मूले उक्तम्॥

तस्यायम्भावः—ननु कर्तृकर्मभ्यां क्रिया सन्निधाप्यते तद्वाची च धातुरेव, कारकान्वययोग्यतावच्छेदकरूपेण साध्यत्वेन धातुभिरेव क्रियोपस्थितेः। धातोश्च द्वये प्रत्ययास्तिङः कृतश्च, तत्र तिङ्योगे न लोकेति निषेधात्कृद्योग एव भविष्यतीति। नच न लोकेति सूत्रे कृदव्ययस्यैव ग्रहणाय कृद्ग्रहणमिति वाच्यम्, अव्ययार्थस्य ये कर्तृकर्मणी इत्यर्थेनैव सिद्धेः। उभयप्राप्तावित्यत्र बहुव्रीहिलाभार्थन्तदिति न शङ्क्यम्, एकाचो द्वे इति वदन्यपदार्थस्यानुच्चरितत्वेऽपि व्याख्यानादेव सिद्धेरिति कृतीति व्यर्थमितिचेन्न, कृदन्तपर्यायशक्तिप्रयोज्योपस्थितिविषयीभूतक्रियानिरूपितकर्तृकर्मणोरेव यथा स्यात्, तद्धितान्तनिष्ठशक्तिप्रयोज्योपस्थितिविषयीभूतक्रियानिरूपितकर्तृकर्मणोर्मा भूदिति बोधनार्थत्वात्; तेन कृतपूर्वीकटमित्यत्र न। अत्र पूर्वं कर्मविशेषस्यान्वयाऽविवक्षयाऽकर्मकत्वाद्भावे क्ते कृतं पूर्वमनेनेति विग्रहे सुप्सुपेति समासे सपूर्वाच्चेतीनिस्तदनन्तरं विशेषरूपेण कर्मयोगविवक्षायां कृतपूर्वीकटमित्यत्र तद्धितान्तशक्त्या क्रियाकर्मणः सत्त्वान्न षष्ठी। नचाविवक्षितकर्मत्वेन भावे क्तविधानं व्यर्थम्, नपुंसके भावे क्त इत्यनेनैव सकर्मकेभ्योऽपि सिद्धेरिति वाच्यम्, अत्रत्य भाष्येणैव अकर्मकेभ्य एव तद्विधानबोधनात्। "ददैर्दुःखस्य माद्दग्भ्यो धायैरामोदमुत्तममिति" भट्टिपद्ये गृहीत्वेत्यध्याहृत्य तद्योगे आमोदमुत्तममित्यत्र द्वितीयेति दिक्॥२४॥

छात्रस्य हसितमित्यत्र कथं षष्ठीति विशद्य लिख॥ २५॥

न लोकेति सूत्रे भाष्ये अस्यापवादभूतं नपुंसके भावे क्तस्य योगे षष्ठ्या उपसंख्यानमिति वार्त्तिकं पठितन्तेनात्र षष्ठी सिद्धति। नचैवं भ्रान्तन्देशमित्यादौ षष्ठी कुतो नेति वाच्यम्, वार्त्तिके प्रतिपदोक्तस्य

नपुंसके भावे क्त इत्यस्यैव ग्रहणेन प्रकृते गत्यर्थाकर्मकेति क्तयोगेऽप्रवृत्तेः। नपुंसके भावे क्त इत्यस्य अकर्मकेभ्य एवेष्टत्वात्। अविवक्षितकर्मतयाऽकर्मकत्वेन क्तस्तु कृतपूर्वीत्यादिवृत्तिविषय एवेति भाष्यसिद्धान्तः। अहेः सृप्तमित्यादौ क्तोऽधिकरणे चेति भावे क्ते शेषत्वविवक्षयैव षष्ठीसाधनस्यावश्यकतया इदं वार्त्तिकं शेषत्वविवक्षया सिद्धिमाश्रित्य भाष्ये प्रत्याख्यातम्। कारकषष्ठीनिषेधविषये शेषत्वविवक्षा नेत्यनेन वार्त्तिकेन बोधनम्। भाष्योक्ततत्प्रत्याख्यानेन तु क्तातिरिक्तविषये अनभिधानाच्छेषत्वविवक्षा नेति ज्ञाप्यते इत्याद्युक्तमिति दिक्॥ २५॥

आधारोऽधिकरणमिति सूत्रं सयुक्तिकं व्याख्यायताम्॥ २६॥

कारके इत्यधिकारात्साक्षात्क्रियाधारस्य कर्तृकर्मसंज्ञाभ्यां बाधाद् आधारपदे स्वरितत्वप्रतिज्ञानाच्च कर्तृकर्मद्वारा क्रियाधारस्याधिकरणसंज्ञा। यद्यपि कालस्य साक्षात्क्रियापरिच्छेदकत्वन्तथापि भूतानि कालः पचतीतिवत्तस्य कर्तृत्वमेव। यस्य यद्द्वारा कारकत्वन्तस्य तद्द्वारैव क्रियान्वय इति व्युत्पत्त्या अस्य क्रियान्वयोऽपि कर्त्रादिद्वारैव। मूले वृक्षः कपिसंयोगीत्यादावपि अस्ति क्रियामध्याहृत्य तस्याः स्वकर्तृकपिसंयोगिवृक्षद्वारा मूलवृत्तित्वादाधारत्वम्। अयञ्चाधारस्त्रिधेति मूले उक्तम्। सकलावयवव्यापी व्यापकाधारत्वम्, यथा तिलेषु तैलम् सर्वस्मिन्नात्मास्ति। इदमेव मुख्यमधिकरणमिति भाष्ये स्पष्टम्। उपसमीपे श्लेषः सम्बन्धस्तत्कृतमौपश्लेषिकमिति व्युत्पत्त्या यन्मासेऽतिक्रान्ते दीयते तस्य समास औपश्लेषिकमधिकरणमित्यादिभाष्ये उक्तम्। कटे आस्ते इति तु एकदेशावच्छेदेन श्लेषेऽपि श्लेषस्य समीपमुपश्लेषन्तत्कृतमिति व्युत्पत्त्यभिप्रायेण तदुदाहरणम्। वस्तुतस्तु सर्वमिदं गौणमधिकरणं गङ्गायां गाव इत्यादिकञ्चेति भाष्ये स्पष्टमिति दिक्॥ २६॥

यस्य च भावेत्यत्र का वाचो युक्तिर्नागेशस्येति युक्तियुक्तं लिख॥ २७॥

अत्र भावः क्रिया तदाश्रयः कर्त्ता कर्म च तत्र ज्ञापकक्रियाश्रयवाचकादनेन सप्तमी, तेन गोपददुह्यमानपदयोरुभयोरप्यनेन सप्तमी सिद्धा। ब्राह्मणेषु अधीयानेषु गत इति कर्त्तर्युदाहरणम्। अस्योदाहरणे काचित्क्रिया स्वाधारकालेनान्यां क्रियां परिच्छिनत्ति यथा गोषु दुह्यमानास्वित्यत्र। काचित्स्वाधारकालाव्यवहितपूर्वकालेनान्यां परिच्छिनत्ति यथा गोषु धोक्ष्यमाणास्वित्यादौ। काचित्स्वाधारकालानन्तरकालेनान्यां परिच्छिनत्ति यथा गोषु दुग्धास्वित्यादौ। शब्दबोध्य एव लक्ष्यलक्षणभाव एतच्छास्त्रप्रवृत्तौ निमित्तम्, नतु भूयोदर्शनादिरूपमानान्तरगम्यः। अन्यथा उदिते आदित्ये तमो नष्टमित्यादावेव स्याच्चतु प्रकृते कदाचिद्धि गोषु दुह्यमानास्वसौ गतः। यत्र च मानान्तरेण ज्ञातस्वरूपस्यार्थस्य कालविशेषादिज्ञापनार्थं शब्दप्रयोगस्तत्रैवैतत्सूत्रं प्रवर्तते। अत एव राहूपरागे स्नायादित्यत्र राहूपरागपदेन तदाश्रयकालग्रहणादधिकरणसप्तम्येव। एवं विवाहे नान्दीमुखं कुर्यादित्यत्र विवाहपदेन तत्प्राक्कालग्रहणादधिकरणसप्तम्येव। एतद्धितसप्तम्या ज्ञापकत्वमर्थ इति नागेशोक्तिः। केचित्तु—वर्त्तमानार्थकप्रत्ययसमभिव्याहारे स्वसमानकालिकत्वं सप्तम्यर्थः। भूतार्थकप्रत्ययसमभिव्याहारे स्वपूर्वकालिकत्वं भविष्यदर्थकप्रत्ययसमभिव्याहारे स्वकालाव्यवहितोत्तरकालिकत्वञ्च तदर्थः। ज्ञाप्यज्ञापकभावस्तु वस्तुसन्निमित्तं नतु सप्तम्यर्थः। एवञ्च राहूपरागसमानकालिकं स्नानमिति बोधेऽनेनैव सप्तमीत्याहुरिति दिक्॥ २७॥

यतश्च निर्द्धारणमित्यस्यार्थो विभक्त्यर्थो बोधश्च वाच्यः। तत्र कश्चित्स्वाभिमतार्थोऽपि लेख्यः॥ २८॥

अत्र जातिगुणक्रियासंज्ञाभिरिति विशिष्टस्याध्याहारः। तद्विशिष्टस्यैकदेशस्य(यतः)स्वघटितसमुदायात् स्वेतरसमुदायघटकव्यावृत्तकर्मकरणकं पृथक्करणरूपं निर्द्धारणन्ततः षष्ठीसप्तम्यौ स्त इति सूत्रार्थः। अत्र यत इत्यस्याभावे यस्य जात्यादिविशिष्टस्य स्वेतरव्यावृत्तधर्मवत्त्वबोधनन्तत एव स्यात्। एतद्धितविभक्तेस्तु स्वघटितसमुदाया-

वधिकस्वेतरसमुदायघटकव्यावृत्तधर्मकरणकपृथक्करणकरूपनिर्धारणविषयत्वरूपोऽवयवावयविभावरूपश्च सम्बन्धोऽर्थः। अत एव नृसमुदायावधिकद्विजेतरनरव्यावृत्तश्रेष्ठत्वकरणकपृथक्करणरूपनिर्धारणविषयो नृसमुदायावयवो द्विजः श्रेष्ठ इति बोधः। अत्रोद्भूतावयवभेदविवक्षया बहुवचनमेव भाष्यप्रामाण्यात्, तेन तिरोहितावयवभेदविवक्षयाऽत्रैकवचनमसाध्वेव। वस्तुतस्तु, निर्धारणविभक्त्यन्तार्थस्य द्विजादिरूपोद्देश्येऽन्वये तु पुरुषोत्तम इत्यादावसामर्थ्यात्समासो न स्यात्, तस्मात्प्रकृत्यर्थस्य स्वघटकत्व-स्वघटकद्विजेतरत्वावच्छिन्नप्रतियोगिताकश्रेष्ठत्वावच्छिन्नभेदकत्वोभयसम्बन्धेन श्रेष्ठपदार्थे एवान्वय इत्यादि केचिदाहुरिति दिक् ॥२८॥

समर्थः पदविधिरित्यत्र नागेशाशयो विविच्य वर्णनीयः ॥२९॥

अत्र विधिशब्दः कर्मसाधनः शेषषष्ठ्यासमासस्तेन पदसम्बन्धीविधिरित्यर्थो लभ्यते। पदविधित्वञ्च पदसंज्ञाप्रयोजकसुप्तिङ्प्रयोजकसंज्ञोद्देश्यतावच्छेदकसम्पादकत्वम्, पदसंज्ञाप्रयोजकौ यौ सुप्तिङौ, तत्प्रयोजकसंज्ञे धातुप्रातिपदिके, तदीयोद्देश्यतावच्छेदकानि सन्नन्तत्वादि कृत्तद्धितसमासत्वानि, तत्सम्पादका विधयः धातोः कर्मण इत्यादयः कृदादिविधायकाश्चेति लक्षणसमन्वयः। अत एव पदविधिसहचरितोऽपि पदविधिशब्देन गृह्यत इत्युक्तम्। समाससंज्ञादिरूपपदविधेः सामर्थ्यं न साक्षाद्विशेषणमसम्भवादतः समर्थाश्रित इत्युक्तम्। सामर्थ्यञ्चात्रैकार्थीभावः संसृष्टार्थे समर्थमिति भाष्यात्। सच विशेष्यविशेषणभावावगाह्युपस्थितिजनकत्वम्, अथवा पदविशिष्टत्वम्। वै० स्वघटितत्व-स्वनिष्ठशक्तिज्ञानप्रयोज्यज्ञानविषयकशक्तिपर्याप्त्यधिकरणत्वोभयसम्बन्धेन। अत एव राजपुरुषैकदेशे राज्ञि ऋद्धस्येत्यादिविशेषणान्वयो न, पदार्थैकदेशत्वात्। विशेषणे संख्याभानञ्च न, संख्याविशेषप्रकारेण तत्तदर्थभाने पृथगुपस्थितेस्तन्त्रत्वात्। तावकीन इत्यादौ विग्रहवाक्यैकवचनत्वारोपेण शास्त्रप्रवृत्तिमात्रन्तु तद्बोधः वृत्तिस्वभावविरोधात्। उक्तोपस्थितिश्च समुदायशक्तिसाध्या। तथा

च कृतशक्तित्यागे मानाभावात्प्रत्येकशक्तिसहकृतया समुदायशक्त्या तथोपस्थितिः। अयमेव चैकार्थीभावो जहत्स्वार्था वृत्तिः। पदानामानर्थक्यमिति तु न युक्तं, महाबाहुः सुपन्था इत्यादावात्वाद्यनापत्तेः। अथवत्वे भूतपूर्वगत्याश्रयणन्तु सत्यांगतावयुक्तम्। अतएव जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनीति वृद्धैरुक्तम्, अवयवार्थविरुद्धो यत्र समुदायार्थस्तत्रैव सेति तदर्थः। यथा गौरखरकृष्णसर्पादौ। इयञ्च परिभाषा पदविधिरिति सूत्राक्षरस्वारस्यात् समासेऽङ्गुलेः सङ्ग इत्यादौ समासग्रहणात् गतिर्गताविति सूत्रे पदस्येत्यधिकारात्समर्थपरिभाषोपस्थितिरिति कैयटाद्य पदत्वेन सुवन्तत्वेन वा यत्र साक्षादुद्देश्यता तत्रैव प्रवर्त्तते तेनान्यारादिति सूत्रे नास्याः प्रवृत्तिः। यथा शत्रादौ द्वितीयासामाधिकरण्यं दृष्ट्वा लकारेऽपि तत्कल्पना। एवञ्चार्थेऽन्यपदार्थे च समर्थ इत्यनुवादबलादेकार्थीभावस्य अलौकिकविग्रहवाक्ये एव कल्पना। समर्थग्रहणफलन्तु पश्य कृष्णं श्रितो राममित्यादौ कृष्णश्रितयोः परस्परसम्बन्धाभावेनैकोपस्थित्यजनकत्वेनासामर्थ्यान्न समास इति दिक् ॥२९॥

सहसुपेत्यत्र सुवित्येकत्वं विवक्ष्यते न वेति सप्रमाणं सफलञ्च लिख ॥३०॥

अत्र लक्ष्यानुरोधादनुवाद्यत्वेऽपि सुवित्येकत्वं विवक्ष्यते तेन महिष्या अजायाश्च क्षीरमित्यत्र क्षीरशब्देन न सुवन्तसमुदायस्य समास इति कैयटादय आहुः। नव्यास्तु—सुवित्यत्र जातिविवक्षा, एवञ्च स्वाङ्गग्रहणेन स्वाङ्गसमुदायस्याग्रहणवत् सुवन्तग्रहणेन सुवन्तसमुदायस्याग्रहणान्नोक्तदोषः। भाष्यस्वरसोऽप्येवमेव। किञ्च एकत्वविवक्षायामेकेनैव केनचित्सुवन्तेन किञ्चिदेकं सुवन्तं समस्येत नत्वन्यैरन्यानीति बहुलक्ष्यासिद्धा कैयटाद्युक्तिरसङ्गतैवेत्याद्याहुः ॥३०॥

भूतपूर्वे चरडिति पङ्त्याशयं विशद्य लिख ॥३१॥

ननु पूर्वं भूतो भूतपूर्व इत्यत्रोभयोः प्रथमान्तपदबोध्यतया विनिगमनाविरहादुभयोः पूर्वनिपातापत्तौ प्रकृतनिर्देशोपपत्त्या ज्ञापका-

सम्भव इतिचेन्न; उपसर्जनमिति महासंज्ञया समासावयवीभूतसमास-शास्त्रीयप्रथमान्तपदबोध्यविशेषणरूपोपसर्जनं पूर्वं प्रयोज्यमित्यर्थात्। प्रकृतवाक्यात्पूर्वकालिकभवनाश्रय इति बोधे शास्त्रीयोपसर्जनत्वस-मानाधिकरणलौकिकोपसर्जनत्ववतः पूर्वशब्दस्यैव पूर्वनिपातप्राप्तौ निर्देशासङ्गतेः स्पष्टत्वात्। नच भवनाश्रयपूर्वकालिक इत्यर्थे भूतशब्द-स्यापि विशेषणताप्रयोजकत्वेन पूर्वनिपातसिद्धौ प्रकृतप्रयासो विफल इति वाच्यम्, क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिकेतिसिद्धान्ता-त्प्रकृतबोधासम्भवात्। वस्तुतस्तु सुप्सुपेति शास्त्रस्य सुबन्तार्थनिष्ठ-प्रकारतानिरूपितमुख्यविशेष्यताप्रयोजकत्वेनाभिमतो यः सुबन्तस्तेन तत्समस्यत इत्यर्थेन पूर्वशब्दस्यैव पूर्वनिपातप्राप्तौ निर्देशासङ्गतिः स्पष्टैव। अत एव निर्देशादीदृशे विषयेऽवयवद्वारकसामर्थ्येऽपि समा-सप्रवृत्तिः। विस्पष्टपटुरित्यादावपि विस्पष्टादीनि गुणवचनेष्विति ज्ञापकात्समासः। तत्र हि विस्पष्टमित्यादि पटुत्वादिविशेषणमिति दिक् ॥३१॥

प्रथमानिर्दिष्टमुपसर्जनमित्यस्य सयुक्तिकं सप्रमाणं विविच्य व्याख्या कार्या ॥३२॥

अस्य समासगतेऽन्तविभक्त्याश्रये प्रथमान्तत्वे आश्रीयमाणे कष्ट-श्रितादिसमासे श्रितस्य पूर्वनिपातापत्तिरतः समाससंज्ञाविधायके शास्त्रे इत्यर्थो वर्णितः। नच राज्ञः कुमारीं श्रितो राजकुमारीश्रित इत्यत्र कुमारीशब्दस्य प्रथमानिर्दिष्टत्वेन पूर्वनिपातापत्तिरिति वाच्यम्, अप्रधानमुपसर्जनमिति शास्त्रान्तरोक्तमहासंज्ञया समासशास्त्रे प्रथमा-निर्दिष्टमप्रधानत्वसमानाधिकरणोपसर्जनवदिति वाच्यार्थे जाते अप्र-धानत्वस्य ससम्बधिकतया यम्प्रति यदप्रधानं तम्प्रति तदुपसर्जन-मिति भाष्यसम्मतेर्थेऽदोषात्। प्रकृते हि न राजनिरूपितमप्राधान्यं कुमार्या इति न तदपेक्षोऽस्य पूर्वनिपातः। नच कार्यनिरूपिताप्राधा-न्यस्य पूर्वपदार्थेऽसत्त्वेन पूर्वकाय इत्यसिद्धिरिति वाच्यम्, समास-शास्त्रे यम्प्रति यदप्रधानं तम्प्रति तदुपसर्जनमित्यर्थेनादोषात्। तथाहि

सहयुक्ततृतीयान्तार्थस्य शाब्दगुणान्वयित्वाभावरूपाप्राधान्येऽपि तत्समभिव्याहृतप्रथमान्ताद्यर्थे तदधीनत्वरूपाप्राधान्यप्रतीतेः । अत एव समकक्षयोरप्येकस्य परेण सहागन्तव्यमित्युक्ते दुःखं दृश्यते लोके । सर्वमिदं प्रकृतसूत्रे भाष्ये स्पष्टमिति दिक् ॥३२॥

राज्ञः कुमार्या इति परिनिष्ठितविभक्त्या समासे कस्य पूर्वनिपात इति सप्रमाणं सयुक्तिकमुपपाद्यताम् ॥३३॥

ननु राज्ञः कुमार्या इति समासे विनिगमनाविरहादुभयोः षष्ठ्यन्तत्वेन प्रथमानिर्दिष्टत्वादुपसर्जनत्वेन कुमार्या अपि पूर्वनिपातो दुर्वार इतिचेन्न, षष्ठ्यन्तयोः समासेऽर्थाभेदात् (अर्थस्य प्रधानस्य अभेदात् समस्यमानराजपदार्थनिरूपितसम्बन्धाभावात्) प्रधानस्यापूर्वनिपातः प्रधानरूपस्य षष्ठ्यन्तस्य प्रथमानिर्दिष्टत्वाभावान्न पूर्वनिपात इति भाष्येणैव समाधानात् । अत एव राज्ञः पुरुषस्येत्यत्र राजापेक्षया पुरुषः प्रधानमेवेति नासौ भिद्यते राजापेक्षया नव्यतिरिच्यते इत्यप्रधानस्येव पूर्वनिपात इति कैयटे उक्तम् । षष्ठीतिसूत्रे अप्रधानषष्ठ्यन्तमेव प्रथमानिर्दिष्टमित्याशय इति दिक् ॥३३॥

गोस्त्रियोरुपसर्जनस्येत्यत्र आक्षेपनिरसनेन स्वसिद्धान्तं लिख ॥३४॥

अत्रोपसर्जनस्येति गोस्त्रियोर्विशेषणम् , प्रत्ययग्रहणपरिभाषया च स्त्रीशब्देन तदन्तग्रहणन्ताभ्याञ्च प्रातिपदिकविशेषणात्तदन्तविधिरिति मूलोक्तार्थलाभः । अत्र गोन्तस्त्रीप्रत्ययान्तयोरुपसर्जनयोरित्यर्थ इति यत्प्राचोक्तन्तदसत्, चित्रगुरित्यादौ गोशब्दस्योपसर्जनत्वेऽपि तदन्तस्यानुपसर्जनत्वात् । नच चित्रगो इति समुदायार्थस्य चित्राभिन्नगोरूपस्य अन्यपदार्थे प्रत्युपसर्जनत्वमस्त्येवेति वाच्यम् , तथासति गौरीपतिरित्यादावपि ह्रस्वापत्तेः । कथन्तर्हि सुगोकुलं राजकुमारीपुत्र इतिचेच्छणु, अप्रधानमुपसर्जनमिति सम्बन्धिशब्दावेतौ, तत्र सम्बन्धादेतद्गन्तव्यं यम्प्रति यदप्रधानं तस्यचेत्सोन्तो भवतीति भाष्येण यस्य प्रातिपदिकस्य ह्रस्वो विधीयते तदर्थम्प्रति उत्तरपदयोर्गोस्त्रियोर्यदा गुणीभावस्तदैव ह्रस्वत्वमिति बोधनेनादोषात् (यत्समासशास्त्रे प्रथमानिर्दिष्टं तस्य तद्घटितसमासस्य स अप्रधानशब्द

इति भाष्यार्थः)। अत्र इद्गोण्या इति सूत्रस्थभाष्येण ङाङ्ङीयोपसर्जनस्यैव ग्रहणन्तेन कुमारीमिच्छन् ब्राह्मणः कुमारी, गोवष्कयणीत्यादौ कुमारीवष्कयणीशब्दयोर्लौकिकोपसर्जनत्वेऽपि न ह्रस्वः, कुक्कुटमयूर्यावित्यादिद्वन्द्वे द्वन्द्वे नेति वचनादेव ह्रस्वो न। अतिराजकुमारिरित्यादौ स्त्रीप्रत्यये तदादिनियमनिषेधाद्राजकुमारीत्यस्य स्त्रीप्रत्ययान्तत्वमिति दिक् ॥३४॥

यथासादृश्य इतिसूत्रे प्राच्यनव्ययोर्मतं सप्रमाणं विविच्य लिख ॥३५॥

अत्राऽसादृश्य इति च्छेदस्तत्रैव वर्त्तमानो यथा शब्दः समस्यते इत्यर्थः। यथा हरिरित्युदाहरणम्, तथा हर इत्यत्र तथाशब्दस्य सादृश्यार्थकत्वेऽपि न समासप्राप्तिः, सदृश इत्युक्तेर्नियमेन प्रतियोग्याकाङ्क्षादर्शनेन सादृश्यप्रतियोगिवाचकेनैव तद्बोधकाव्ययस्य समासविधानादिति प्राञ्चः। नव्यास्तु-यथाशब्दः सुबन्तेन समस्यते सादृश्ये द्योत्ये नेत्यर्थः। यथाशक्ति यथाबलमित्युदाहरणम्। अत्र यथार्थत्वेन तु न सिद्धिः, सूत्रगृहीताव्ययेन सह तेन समासाविधानात्। अत्र चेदमपि सूत्रं ज्ञापकम्। अत एव भाष्ये असादृश्ये इति किमर्थं यथा देवदत्तस्तथा यज्ञदत्त इत्येवोक्तं नतु सूत्रमेव किमर्थमिति। नचोक्तोदाहरणे प्रकारवचने थाला निष्पन्नस्य यथाशब्दस्य सादृश्यद्योतकत्वेन सूत्रं व्यर्थमेवेति वाच्यम्, अव्युत्पन्नस्य वीप्साद्यर्थकस्यैव यथाशब्दस्यात्र ग्रहणेनादोषात्। अत एव असादृश्य इत्युच्यते तत्रेदं न सिद्ध्यति यथाशक्ति यथाबलम्, प्रकारेयस्थाल् तदन्तस्य सादृश्य एव वृत्तेरित्याशङ्क्य वीप्सादिवाचिनोऽत्र सूत्रे यथाबलमित्याद्युदाहरणे च ग्रहणमित्यर्थकोक्त्यनन्तरं अथ यः प्रकारवचने थाल् तदन्तस्य ग्रहणं कस्मान्न भवति, पूर्वेण प्राप्नोति सादृश्यसम्पत्तीति पूर्वपक्षिणोक्ते प्रतिषेधवचनसामर्थ्यान्न भविष्यतीत्युत्तरितं भाष्ये। अत्र प्रतिषेधसामर्थ्यादित्यस्य प्रतिषेधयुक्तैतद्वचनसामर्थ्यादित्यर्थः। इत्यादिवाग्जालमाहुरिति दिक् ॥३५॥

विभाषाधिकारस्य सार्थक्यं विशद्य लिख ॥३६॥

नन्वेकार्थीभावविवक्षायां समासस्य व्यपेक्षाविवक्षायां वाक्यस्य च सिद्धया विभाषाधिकारो व्यर्थः। नचैकार्थीभावे एव समाससंज्ञा-विकल्पार्थः स इति वाच्यम्, अनिष्टत्वात्। एवं निषेधविषये एकार्थी-भावाभावेन समासाप्राप्त्या नित्याधिकारविषये च विभाषाधिकारा-भावेन वाक्याप्राप्त्या च समासनिषेधसूत्राणि नित्यग्रहणानि च व्य-र्थानीति चेन्न, लक्षणैकचक्षुष्कान्मन्दान्प्रति क्वैकार्थीभावो नित्यः क्व पाक्षिकः क्व नास्त्येवेत्यर्थबोधनार्थत्वात्। लक्ष्यैकचक्षुष्कान्प्रति तु भाष्ये प्रत्याख्यातानि। ततश्च विशेषणीभूतैकार्थीभावस्य विकल्पादि-बोधकानीमानीति भाष्ये स्पष्टम्। अत एव पारे मध्ये इति सूत्रे एक-या वृत्तिर्विभाषा परयावृत्तिविषयेऽनित्योपवाद इति भाष्ये उक्तम्। अत्र वृत्तिरेकार्थीभाव इति दिक् ॥३६॥

समासान्ता इत्यधिकारविषये प्राच्यनव्यमतं फलप्रमाणाभ्यां विशद्य लिख ॥३७॥

समासान्ताः अन्त इत्यादिसूत्रस्थभाष्योक्त्या समासस्य चरमा-वयव इत्यर्थः। सरूपसूत्रस्थकैयटरीत्या तु समासपदस्य तदर्थोत्तर-पदे लक्षणा। तेन समासार्थोत्तरपदस्यान्तश्चरमावयव इत्यर्थः, तेनोप-शरदमित्यत्र नाव्ययीभावादित्यम् द्विपुरीत्यादौ द्विगोरिति ङीप् च सिद्ध्यतीति प्राञ्चः। नव्यास्तु—गोस्त्रियोरिति सूत्रे समासपदेनोपचा-रात्तदर्थवाक्यस्यैव ग्रहणमिति भाष्येण उक्तार्थे लक्षणायां मानाभावः। अत एव बहुकुमारीक इत्यत्र अलौकिकविग्रहवाक्ये समाससंज्ञासम-कालमेव समासान्तप्रवृत्त्या गोस्त्रियोरिति ह्रस्वो न। द्विपुरीति द्विगौ स्त्रीत्वस्य लोकतः सिद्धत्वेन फलाभावः। अनेकशो भाष्यविरुद्धं चोत्त-रपदावयवत्वम्। अत एव अन्त इति सूत्रे समासस्यान्तोदात्तत्वमुत्तर-पदस्य वेति विकल्पे आद्ये इदं प्रथमका इत्यादौ कपोऽन्तोदात्तत्वा-पत्तिमुक्त्वा अस्तु तर्हि उत्तरपदस्येत्युक्त्वा तत्पक्षे अनृच इत्यत्रान्तो-दात्तत्वासिद्धिरित्युक्त्वा उभयोरपि प्रकरणेन लक्ष्यानुसारात् क्वचिदु-

त्तरपदान्तस्य क्वचित्समासान्तस्योदात्तत्वमिति समाहितं भाष्ये। नच सरूपसूत्रे कृतद्वन्द्वानां विभक्तौ परत एकशेष इति पक्षे ऋक् च ऋक् च ऋचौ असारूप्यादेकशेषो न प्राप्नोतीति भाष्योक्तिः कथं संगच्छत इति वाच्यम्, समासान्तानां समासावयवत्वेऽपि तत्प्राग्भागस्य विभक्तिपरत्वाभावः तद्विशिष्टस्य तु न सरूपत्वमित्येकशेषो न प्राप्नोतीत्येवंरीत्या सङ्गतेः। सच समासान्तः अलौकिके वाक्ये सुपः परस्तादेव। ततः पूर्वत्वे तु वाच्यार्थविरोधः। नहि सुब्रहितं समासार्थं किन्तु तद्विशिष्टमेव। नच विशिष्टस्य सुबन्तत्वाभावेन सुबन्तात्तद्धित इति सिद्धान्तविरोध इति वाच्यम्, समासान्तानामर्थाभावेन परिपूर्णं पदमिति तत्मूलभूतन्यायस्यात्र विषयाभावादित्याद्याहुरिति शिवम् ॥३७॥

❀ इति शब्देन्दुसुधाया अव्ययीभावान्तो भागः ❀

शुचौ शुक्लपक्षे गुरौ पूर्णतिथ्यां शके नन्दवेदाष्टचन्द्रे सुधायाः।
समाप्तिं विधाता महेशोऽवतात्तान्सदा ये परीक्ष्यानिमग्ना इहैव ॥१॥

महामहेत्युपाध्याय 'तात्याशास्त्री'ति विश्रुताः।
रामकृष्णापराभिख्या विद्वन्मण्डलमानिताः ॥२॥

तेषां शिष्येण रचिता रामलोचनशास्त्रिणा।
छात्रोपकृतये सैषा भूयाद्विद्वत्प्रमोदिनी ॥३॥

❋ सकलपरीक्षोपयोगिपुस्तकानां सूचीपत्रम् ❋

मनोरमारत्नविवेकोऽव्ययीभावान्तः	१॥)	पारस्करगृह्यसूत्रम्	२)
परिभाषेन्दुर्दीपिका[प्रश्नोत्तरीरूपा]	॥=)	श्रौतपदार्थनिर्वचनसूत्रम्	६)
भूषणसारचन्द्रिका ,, यंत्रस्थ		रुद्राष्टाध्यायी	॥=)
मुक्तावलीविवृत्तिः ,,	॥)	अद्वैतदीपिका	८॥)
शिशुतोषिणी [सूत्रार्थसारभूता]	॥।)	आगमप्रामाण्यम्	॥।)
फक्किकामर्मविवृत्तिः	१।)	खण्डनखण्डखाद्यम्	७॥)
बटुतोषिणी यंत्रस्थ		वेदार्थसङ्ग्रहः	४॥)
किरातार्जुनीयम् सर्गत्रयम्	।=)	साङ्ख्यकारिका किरणावलीसहिता	२)
रघुवंशकाव्यम् पञ्चसर्गम्	।=)	योगदर्शनम् ,, ,,	२)
मेघदूतम् सटीकम्	।=)	प्रामाण्यवाददीपिका	॥।)
तर्कसङ्ग्रहः सटीकः सप्रश्नः	।-)	सिद्धान्तमुक्तावली किरणावली	२॥)
श्रुतबोधः	≡)	परिभाषेन्दुशेखर लघु-जटा-जूट	२)
नवाह्निकमहाभाष्यकुञ्चिका	१॥)	न्यासशास्त्रार्थकला	॥।)
मञ्जूषारत्न [प्रश्नोत्तरीरूपः]	॥।)	शाकटायनव्याकरणम्	७॥)

प्राप्तिस्थानम्—

मास्टर खेलाड़ीलाल ऐण्ड सन्स,

संस्कृत बुकडिपो,

कचौड़ीगली, बनारस।